अध्यात्मग्रन्थावलिः

# गीताशास्त्रोपदेशसोपानपङ्क्तिः

प्रणेतारः

**श्री श्री सच्चिदानन्देन्द्रसरस्वतीस्वामिनः**

क्रमाङ्कः

**Price List Catalog SL NO : 10A**


प्रकाशनस्थनम्

अध्यात्मप्रकाशकार्यालयः

Holenarasipura - 573 211, Hassan District,
Karnataka State, INDIA.
Phone: 08175-273820

website: www.adhyatmaprakasha.org
E-mail: secretary@adhyatmaprakasha.org
coordinator_apk@yahoo.com

**Bangalore Branch :**

Adhyatma Prakasha Karyalaya
# 68, (New No. 6) 6th Main, 2nd Block,
Thyagarajanagara, Bangalore-560 028.
Phone : 080-26765548
email: shankara.bhaskara@gmail.com

**2018**

**Gītā Śāstropadesha Sopāna Pankti ;**

**Written by** : SWAMI SATCHIDANANDENDRA SARASWATI,
**Published by :** Adhyatma Prakasha Karyalaya, Holenarasipur - 573 211,
Hassan District, Karnataka State, India.

First Print : 2018 Copies : 1000

Paper used : 80 GSM NS Maplitho

Pages : 67 + 261 = 328

**Price Rs. : 150/-**

© Adhyatma Prakasha Karyalaya

**Copies Available at :**

Adhyatma Prakasha Karyalaya
Holenarasipura-573 211, Phone: 08175-273820
www.adhyatmaprakasha.org.
email: secretary@adhyatmaprakasha.org

**Bangalore Branch :**
Adhyatma Prakasha Karyalaya
# 68, (New No. 6) 6th Main, 2nd Block,
Thyagarajanagara, Bangalore-560 028.
Phone : 080-26765548
email: shankara.bhaskara@gmail.com
coordinator_apk@yahoo.com

**Printed at :**
Sri Rama Printers
No. 47, BKM Complex, Suprajanagara
Chunchaghatta Main Road
Bangalore - 560 062.

# प्रकाशकानां निवेदनम्

**वसुदेवसुतं देवं कंसचाणूरमर्दनम् ।**
**देवकीपरमानन्दं कृष्णं वन्दे जगद्गुरुम् ।।**

**श्रुतिस्मृतिपुराणानामालयं करुणालयम् ।**
**नमामि भगवत्पादं शङ्करं लोकशङ्करम् ।।**

**वन्दे तं सच्चिदानन्दं यतिवर्यं महामतिम् ।**
**वेदवेदान्तसारज्ञं सद्गुरुं प्रणतोस्म्यहम् ।।**

**सदाहं संप्रदायज्ञं संयमीन्द्रं सदाश्रयम् ।**
**सद्गुरुं सच्चिदानन्दं सदाचारं समाश्रये ।।**

**गीतास्वर्थविगीतासु साधनाद्विमुखान्जनान् ।**
**संस्थापयतु गीतोक्तसाधनपथि हे गुरो ।।**

## ग्रन्थरचने निमित्तम्--

भगवान् वासुदेवः सर्वभूतानामात्मभूत आत्मा नारायणाख्यो विष्णुः भूभारहरणव्याजेन श्रीकृष्णरूपेण धरण्यामवतीर्णः सकलजनानां शोकमोहजन्ममरणादिलक्षणसंसारभारस्यात्यन्तमपनयनाय तदेकोपायत्वेन पुरुषनिश्वासवल्लीलया स्वस्मादेवोत्पन्नस्य वेदस्य धर्मद्वयलक्षणस्य सारं जिग्राहयिषया तदन्तरकालिकान् सर्वानेव जनानुद्दिधीर्षुः अर्जुनं निमित्तीकृत्योपादिशत् वेदोक्तधर्मद्वयस्य सारम् । तस्यैव भगवतः साक्षादंशभूतः अपान्तरतमा नाम पुराणर्षिर्लोकस्थितिहेतोः प्रवृत्तिनिवृत्तिलक्षणरूपवेदवेदार्थरक्षणाधिकारे परमेश्वरेण नियुक्तः सन् भगवान्वेदव्यास इति प्रसिद्धिं गतेन कृष्णद्वैपायनरूपेण कलिद्वापरयोः सन्धाववतीर्य वेदोक्तधर्मद्वयस्य सारसङ्ग्रहभूतं भगवतार्जुनाय यथोपदिष्टं तमुपदेशं गीताख्यैः सप्तभिः श्लोकशतैरुपनिबबन्ध ।।

स चोऽपदेशोऽनेकैर्व्याख्यातोऽपि दुर्विज्ञेयत्वात् लौकिकैर्विरुद्धा-नेकार्थत्वेन गृहीतो ग्राहयितश्चासंप्रदायविद्भिः स्वबुद्धिकौशल्यैकप्रमाणैः । एवं स्वोपदेशमन्यार्थत्वेनानर्थत्वेन च गृह्यमाणं ग्राहयमाणंचोपालभ्य स एव भगवान् स्वप्रयोजनाभावेऽपि लोकानुजिघृक्षया 'यदा यदा हि धर्मस्य ग्लानिर्भवति, तदा तदा धर्मसंस्थापनार्थमात्मानं सृजामि' इति स्वप्रतिज्ञावचनमनुरुन्धानः श्रीमच्छङ्करभगवत्पादरूपेणावतीर्य ऐदंयुगीनानां कृते पुरा स्वोपदिष्टस्यैव गीताख्यस्य शास्त्रस्य विवेकतोऽर्थनिर्धारणार्थं संक्षेपतो विवरणं कृतवान् ।।

एवं जनानामुद्धरणे भगवता पुनः पुनः यत्नः कृतोऽपि तदनन्तरकालीनाः बहुसंख्याकाः गीतोपदेशतद्विवरणपठनपाठन पटवोऽपि, गीताशास्त्रस्य परमप्रयोजनात्संसारस्य सहेतुकस्यात्यन्तो-परमलक्षणाद्वञ्चिता एव दृश्यन्ते प्रायेण, कामासूयामात्सर्याद्यासुरगुणयुक्त त्वात्, तत्परिहारार्थमुक्तसाधनानुष्ठाने तात्पर्येण प्रवृत्यभावाच्च तेषाम् । निःश्रेयसप्रयोजनाद्वञ्चितत्वे कारणान्तरमपि विद्यते यत्, अधुनातनाः प्राकृता जना गीतोपदेशस्य विविधपरस्परविरुद्धव्याख्यानैः शुद्धशाङ्कर संप्रदायबहिर्भूतैराकुलीकृताः सन्तः साध्यसाधनसिद्धान्तविषयेष्वयमेव भगवतोऽभिप्राय इति निर्णेतुमशक्ता जाता इच्छाद्वेषसमुत्थद्वन्द्वमोहेना पहृतधियोऽन्धेन नीयमाना अन्धा इव । अत्राप्यासुरगुणाधिक्याद्दैवसंपद-संपादनेन चित्तशुद्ध्यभाव एव कारणमुपदेशग्रहीतृग्राहयितॄणाम् । एवमास्तिकानामप्यत्यन्तशोचनीयामिमामनुक्रोशार्हां स्थितिमालक्ष्य कथं नु नामेदानीन्तना जना अनेनैव गीतख्योपदेशेन बोधिताः सन्तः तदुक्तं परं निःश्रेयसं प्रयोजनं प्राप्नुयुरथवा, तत्प्राप्त्यर्थमपि वा तन्मार्गे एव क्रमेण प्रवर्तेरन्निति विचिन्त्य तदर्थं ग्रन्थमिमं **गीताशास्त्रोपदेशसोपानपङ्क्तिर्नामकं** व्यरचयन् **श्रीमत्सच्चिदानन्देन्द्रसरस्वतीस्वामिपादाः** शाङ्करवाक्योपजीविनः ।।

ननु पङ्कदेशे आर्द्रमृत्क्षेपणवत् किमर्थमिदानीं नूत्नो ग्रन्थः श्रीमद्भगवद्गीता अधिकृत्य ? उक्तं किल भवतैव विविधभाष्यव्याख्यानैर्जना आकुलीकृतधियो गीतार्थं यथार्थं निर्णेतुमसमर्था इति । अपि च, श्रीचरणैर्गीता अधिकृत्य **गीताशास्त्रार्थविवेकः** इति ग्रन्थः संस्कृतभा-षामयः पूर्वमेव रचितः, तेनोपकृता अपि बहवो जिज्ञासवः । अतः को विशेषोऽस्मिन्नूतनग्रन्थे, येनानेनापि मुमुक्षुजना महत्प्रयोजनं प्राप्नुयुरिति ।।

उच्यते । अस्त्यस्य ग्रन्थस्य विशेषो येन मुमुक्षवो गीताशास्त्रोक्तं परं निःश्रेयसं मोक्षाख्यं प्रयोजनं सुखेन प्राप्नुयुः । नायं ग्रन्थो गीताश्लोकानां व्याख्यानरूपः । नापि तद्भाष्यस्य कस्यचिद्वा विशदीकरणरूपः । अत्र हि यो गीताशास्त्रोपदेशो यथैव भगवतोक्तः, यथा श्लोकैर्वेदव्यासेनोपनिबद्धः, यथा श्रीमच्छङ्करभगवत्पादाचार्येणार्थः कृतः, स एवोपदेशोऽत्रोपस्थाप्यते श्लोकानां विपरिणामितक्रमेण । भगवान् ह्यर्जुनस्याधि-कारिविशेषमालक्ष्य तस्य दैवीसंपदा युक्तत्वं सात्त्विकश्रद्धाभक्तियुक्तत्वं च मनसि निधायैव तस्मा आरम्भ एव साङ्ख्यबुद्धिः योगबुद्धिरिति द्वे निष्ठे शिष्ट्वा ते एव पुनर्विशदीकृत्य प्रायेण शास्त्रान्त एव साङ्ख्ययोग बुद्ध्यनुष्ठानार्थमपेक्षितानि पूर्वसिद्धरूपाणि साधनानि दैवीसंपच्छ्रद्धादि-लक्षणान्युक्तवान् । अपि चार्जुनाय क्वचित्कष्टतरसाधनानि पूर्वमुक्तानि तदनन्तरमेव तेभ्योऽपि सुखतरानुष्ठेययोग्यानि साधनानि उपदिष्टानि, नारोहणक्रमेण, अभिमुखेऽवस्थितमर्जुनमेवोपलक्ष्य कृतत्वा दुपदेशस्य ।।

किन्तु, नाद्यतनश्रोतारोऽर्जुनसदृशाः । एते ह्यल्पवीर्याः प्रायशः कामाभिभूता हीनविवेकज्ञानाः 'इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् । इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।' (गी. १६-१३) इत्याद्यासु रगुणानां जीवितोदाहरणाः । तथापि शोकमोहादिलक्षणसंसारात्तितीर्षव आस्तिकाः भगवति श्रद्धाभक्तियुक्ताः स्वोद्धरणार्थं शास्त्रे प्रमाणबुद्धियुक्ताश्च

अतोऽत्र येन क्रमेणार्जुनं निमित्तीकृत्य भगवतोपदिष्टं शास्त्रं स एव क्रमो न कार्यक्षमः स्यादद्य । तस्मात् पाठक्रमादर्थक्रमो बलीयानिति न्यायेनेदानीन्तनानामपि विविधमतिभूमिकानामर्थे य एव गीतोपदेशः भगवता कृतः, यस्य च श्रीमच्छङ्कराचार्येणार्थो व्याख्यातः स एव विपरिणामितक्रमेणोपस्थाप्यतेऽस्मिन्ग्रन्थे, न तु नूतनं यत्किञ्चित् यथा शङ्कते । अतः पङ्कस्य स्पर्शनमन्तरेण साधकानां साधनमार्गे सुखेन गमनार्थोऽयं दारुफलकस्थानीयो ग्रन्थः । तथा हि ग्रन्थकर्ता प्रतिजानीते ग्रन्थारम्भे- ''**(जिज्ञासवो) गीतार्थमन्यथान्यथा गृह्णन्तो ग्राहयन्तश्च परान्, तावतैव कृतार्थमात्मानं मन्यन्ते, न तु भगवदुपदेशमिदानीमप्यनुष्ठानेन परमपुरुषार्थसाधनत्वेन समासादयितुं सुशकमिति श्रद्दधते । तदेवं कान्दिशीकतां गतानां श्रद्धालूनां कृते गीतोपदेशः केन क्रमेणानुष्ठानक्षेत्रे प्रवेशयितुं शक्य इत्येतत्प्रदर्शनायायं यत्नः करिष्यते ।**'' (खं.२) इति ।।

किञ्च, अस्ति वैलक्षण्यमस्य ग्रन्थस्य पूर्वकृतात् '**गीताशास्त्रार्थविवेक**'ग्रन्थात् । गीताशास्त्रार्थविवेके भगवत्पादीय भाष्यवचनानामेवाश्रयणेन प्रप्रथमं शास्त्रे प्रयुज्यमानानां पारिभाषिकशब्दानां साङ्ख्य-योग-कर्म-ध्यान-ज्ञानादिपदार्थानामर्थविवेकं कृत्वा तदनु कर्मयोग-ध्यानयोग-भक्तियोग-ज्ञानयोगानां परस्परसम्बन्धो निरूपितः । न तत्र शास्त्रोक्तानां साधनानामनुष्ठाने केन क्रमेण प्रवृत्ते सति सुकरं स्यादिति क्रमो दर्शितः । अतो गीताशास्त्रार्थविवेकतः शास्त्रार्थविवेकमधिगम्य साधनानुष्ठाने क्रमेण प्रवर्तनायायं ग्रन्थः ।।

## पूर्वाचार्यैर्दर्शितः क्रमः --

ननु पूर्वाचार्या अपि एकैकस्याध्यायषट्कस्य एकैकं काण्डमिति अष्टादशाध्यायात्मकं समस्तं गीताशास्त्रं काण्डत्रयेण विभज्य कर्मनिष्ठा, भक्तिनिष्ठा, ज्ञाननिष्ठेति क्रमेण साधनानुष्ठानं दर्शितवन्तः।

तत्र चाद्यकाण्डद्वये त्वंपदार्थं, तत्पादार्थं च क्रमेण पृथङ्निरूप्य तृतीयकाण्डे तत्त्वमोरैक्यरूपो वाक्यार्थो निरूप्यते इति च ज्ञानप्राप्तये क्रमोऽपि दर्शितः इति । सत्यमेवं दर्शितः क्रमः, किन्तु न स पेशलो यतः प्रत्यध्याये पठिता उपदेशपराः श्लोकाः सर्वे नैकविषयपराः, किन्तु कर्मभक्तिज्ञानमिति विषयत्रयपराः श्लोका अप्येकस्मिन्नेवाध्याये पठिता दृश्यन्ते प्रायेण । तथा हि प्रथमषट्के कर्मकाण्डे षट्स्वप्यध्यायेषु न कर्ममात्रं प्रदर्शितं येन तस्य कर्मकाण्डमिति नाम अन्वर्थं स्यात् । प्रथमाध्याये तु भगवत उपदेश एव नास्ति । शोकमोहादिरूपस्य संसार बीजस्य प्रदर्शनेनैव समाप्तः सोऽध्यायः । द्वितीयाध्याये ज्ञानज्ञा निनोर्विषयकाः श्लोका एव बाहुल्येन पठिताः । एवमेव चतुर्थ-पञ्चमाध्याययोरपि कर्मपरश्लोका अतिविरला एव दृश्यन्ते । षष्ठे तु नास्त्येव कर्मपरश्लोका आद्यश्लोकद्वयं कर्मफलत्यागस्तुतिपरं मुक्त्वा । अपि च द्वितीयतृतीयकाण्डयोरपि कर्मविषयकाः श्लोका बहवो दृश्यन्ते । एवं स्थिते कथं प्रथमषट्कं कर्मकाण्डाभिधानमर्हतीति चिन्त्यम् ।।

अन्यच्च, द्वितीयाध्याये यथा जीवस्याव्यभिचरत्स्वरूपमुपदिष्टम्, तथैव तस्य कर्म कर्तव्यत्वमप्युपदिष्टम् । तृतीये च काम्यं कर्मापि विहितम्, 'इष्टकामधुक्' (गी. ३-१०) इत्यादि वचनेन । षट्कस्य त्वंपदार्थबोधकत्वे सति कर्तृत्वमपि जीवस्य स्वरूपभूतमेवेति व्यामोहो जायेतेति विरुद्धार्थबोधकत्वं प्रसज्येत । किञ्च द्वितीयतृतीयषट्कयोरपि त्वंपदार्थप्रकटनपराः श्लोकाः विद्यन्ते । एवं स्थिते कथमिदमादिमं षट्कं त्वंपदार्थविवेचनात्मकमिति युक्तं वक्तुमिति चिन्त्यम् ।।

यदुक्तं द्वितीयं काण्डं तत्पदार्थबोधकमिति तदपि पुनश्चिन्त्यम् । ननु अस्त्येव निर्विशेषब्रह्मणो वर्णनं द्वितीये काण्डे । 'अक्षरं ब्रह्म परमं स्वभावोऽध्यात्ममुच्यते ।' (गी.८-३), 'येत्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते' (गी. १२-३) इति हि निर्विशेषब्रह्मणोऽक्षरमित्यादिनिर्देशः, अतो न दोष इति चेत् । तर्ह्यस्ति तत्रैव त्वंपदार्थनिर्देशः तत्त्वमोरैक्योपदे-

शश्चेति प्रथमतृतीयकाण्डयोरपेक्षाभावेन कृतं काण्डविभागेन । आद्यश्लोकार्धस्य भाष्यम् – ''**अक्षरं न क्षरतीति अक्षरं परमात्मा 'एतस्य वा अक्षरस्य प्रशासने गार्गि' (बृ.३-८-७) इति श्रुतेः । ... परमम् इति च निरतिशये ब्रह्मणि अक्षरे उपपन्नतरं विशेषणम् । तस्यैव परस्य ब्रह्मणः प्रतिदेहं प्रत्यगात्मभावः स्वभावः, स्वतो भावः स्वभावः अध्यात्मम् उच्यते । आत्मानं देहमधिकृत्य प्रत्यगात्मतया प्रवृत्तं परमार्थब्रह्मावसानं वस्तुस्वभावः अध्यात्मम् उच्यते अध्यात्मशब्देनाभिधीयते**'' (गी.भा. ८–३) इति । एवं ब्रह्माध्यात्मयोर्व्याख्यानेनैव ह्यैक्यमपि बोधितं भवति त्वंपदार्थकथनपूर्वकम् ।।

अस्मिन्नेव षट्के 'वासुदेवः सर्वम्' (गी. ७–१९) इत्यैक्यमेव बोधयति, 'प्रकृतिं विद्धि मे पराम्' (गी. ७–६) इति त्वंपदार्थकथन पूर्वकम् । अतो नेदं षट्कमेकान्तेन तत्पदार्थविषयकमिति वक्तुं शक्यते ।।

किञ्च, तृतीये काण्ड एव त्रयोदशेऽध्याये तत्त्वंपदार्थयोः तदैक्यस्य च बोधनमस्तीति नास्त्येवापेक्षा पूर्वकाण्डद्वयस्येति कृतं काण्डक्रमबोधनेन । अपि च पञ्चदशोऽध्यायः 'इति गुह्यतमं शास्त्रमिदमुक्तं मयानघ । एतद्बुद्ध्वा बुद्धिमान्स्यात् कृतकृत्यश्च भारत ।।' (गी.१५–२०) इति भगवता शास्त्रत्वेन व्यपदिष्टः । तत्र भाष्यम्– ''**यद्यपि गीताख्यं समस्तं 'शास्त्रम्' उच्यते, तथापि अयमेव अध्यायः इह शास्त्रम् इति उच्यते स्तुत्यर्थं प्रकरणात् । सर्वो हि गीताशास्त्रार्थः अस्मिन् अध्याये समासेन उक्तः । न केवलं गीताशास्त्रार्थ एव, किंतु सर्वश्च वेदार्थः इह परिसमाप्तः । 'यस्तं वेद स वेदवित्' (गी.१५-१) 'वेदैश्च सर्वैरहमेव वेद्यः' (गी. १५-१५) इति च उक्तम् ।...एतत् शास्त्रं यथादर्शितार्थं बुद्ध्वा बुद्धिमान् स्यात्, भवेत् न अन्यथा, कृतकृत्यश्च भारत ।।**''

(गी. भा. १५-२०) इति । एवं समस्तस्याध्यायस्य शास्त्रत्वे तृतीयकाण्डस्य ऐक्यबोधनपरत्वं ज्ञानमात्रकाण्डत्वं वा न समञ्जसं स्यात् । षोडशेऽध्याये सप्तदशेऽध्याये च तत्वंपदार्थयोः तदैक्यवाक्यार्थस्य वा साक्षात्परोक्षेण वा परामर्शगन्धोऽपि नास्ति । अष्टादशेऽध्याये च कर्मपरश्लोका एव बाहुल्येन पठिताः । एवं स्थिते कथं तृतीयकाण्डस्य ज्ञानपरत्वं वाक्यार्थ परत्वं वा युज्यत इति चिन्त्यम् । अतः पूर्वाचार्यैः कृतः काण्डविभागो वा त्वंपदार्थतत्पदार्थतद्वाक्यार्थबोधनक्रमविभागो वा न पेशलमिति यदुक्तं तत्स्थितम् ॥

## प्रकृतग्रन्थस्य वैलक्षण्यं विशेषश्च --

प्रकृतग्रन्थस्त्वेतस्माद्विलक्षण एव । गीतासु षोडशेऽध्याये पठितस्य दैवासुरसंपद्विभागस्यैव प्रथमतो ग्रहणं कृतमस्मिन्ग्रन्थे । तत्रापि प्रप्रथममासुरसंपदामेव विवरणं कृतं न तु दैवसम्पदाम्, आसुरसंपदः परिवर्जनं विना श्रेयोमार्गे प्रवृत्तिरेव न स्यादिति । एवं मूलशास्त्रे विद्यमानमध्यायक्रममविगणय्यैवात्राध्यायाः सोपानाभिधा रचिताः । गीताश्लोका मूलाध्यायविभागात्, तदन्तर्गतपाठक्रमाच्च व्युत्थाप्य प्रकरणानुसारमनेनैव क्रमेणोपनिबद्धाः । यथा लोके सोपानेन सुलभतया प्रासादमारोहन्ति जनाः, एवमेवात्र प्रदर्शितक्रमेण मुमुक्षुजिज्ञासवः साधनानुष्ठानेन क्रमश उत्तरोत्तरसाधनभूमिकामारुह्य गीताशास्त्रोपदिष्टप्रयोजनं परं निःश्रेयसं निश्चयेन सुखेन च प्राप्तुं समर्था भवन्तीत्येतदेवास्य ग्रन्थस्य वैलक्षण्यं विशेषश्च । अत्र न केवलं गीताशास्त्रोक्तसाधनानि विपरिणामितक्रमेण सोपानरूपेण दर्शितानि, अपि च प्रत्येकस्याः सोपानभूमिकायाः पूर्वापरक्रमे यथाप्रदर्शिते हेतुश्च दर्शितः । तत्तत्प्रसङ्गानुसारं गीताश्लोकानुदाहृत्य तदर्थश्च संक्षेपेण दर्शितः । क्वचित्तु श्लोकानां तात्पर्यमपि विस्तरेण प्रतिपादितम् । भाष्यवाक्यानि चोदाहृतानि तत्र तत्र स्वोक्तेरुपोद्बलकत्वेन । विभिन्नाध्यायेषु पठिताः समानविषयकश्लोकाः तत्र तत्र प्रकरण एकत्र

पुञ्जीकृत्य दर्शिताः प्रधानग्रन्थशरीरे, विशेषेण च ग्रन्थस्य परिशिष्टभागे । तद्यथा ग्रन्थशरीर एव मोक्षः, ब्रह्मभावः, अमृतत्वप्राप्तिः, शान्तिः इत्यादिभिः शब्दान्तरैरभिधीयमानस्य परमपुरुषार्थस्य परामर्शकाः श्लोकाः तत्तच्छब्दानुरूपमेकत्र पुञ्जीकृत्य दर्शिताः षष्टे सोपाने, तथा च मायापराभिधानायाः प्रकृतेः परामर्शात्मकाः श्लोका अष्टादशे सोपाने पुञ्जीकृत्य दर्शिताः । ग्रन्थपरिशिष्टे च - पुरुषार्थबोधक वाक्यानि, भक्तिपरामर्शकवाक्यानि इत्येवमादीनि पुञ्जीकृत्य दर्शितान्येकत्र । अस्मिन्ग्रन्थे प्रतिपाद्यमाना विषयाः सोपाननामाङ्कितेषु षड्विंशतीष्वध्यायेषु विभक्ताः । अन्ते परिशिष्टभागे भगवद्गीताश्लोकाः विविधविषयानुरूपेण विभज्य प्रकरणाभिधेषु नवस्वध्यायेषु तत्तद्विषया-नुगुणं दर्शिताः ॥

## अत्र दर्शितक्रमः श्रुतिस्मृत्यनुगुणः --

प्रप्रथमतयासुरसंपदः परिवर्जनेनैव सन्मार्गे जिगमिषूणां सुगमः पन्था स्यादिति ग्रन्थेऽस्मिन् तत्प्रदर्शनेनैव साधनारम्भ उक्त इत्यत्र श्रुत्यनुगमोऽप्यस्ति । तथा हि वाजसनेयके श्रूयते - 'असतो मा सद्गमय, तमसो मा ज्योतिर्गमय, मृत्योर्मा अमृतङ्गमय' (बृ.१-३-२८) इति । श्रुतेरर्थस्त्वयम् - असत् इति मृत्युशब्दवाच्यं स्वाभाविककर्मविज्ञाने । अर्थात् देहादि-संघातमेव स्वपरमार्थस्वरूपं नातोऽन्यदस्तीति मत्वा तत्सुखप्राप्तिरेव परमपुरुषार्थ इति तद्विषयकज्ञानं तदर्था च सर्वा चेष्टा - असत् । एषा ह्यासुरी प्रवृत्तिः । अत्यन्ताधोगतिरेव तस्याः फलमिति मृत्युरित्युच्यते । सत् इति अमृतशब्दवाच्यं शास्त्रीयकर्मविज्ञाने दैवीसंपल्लक्षणे अमरणहेतुत्वादमृतमित्युच्यते । तस्मादसतोऽसत्कर्मणोऽहङ्काराख्याज्ञानाच्च मा मां सत् शास्त्रीयकर्मविज्ञाने गमय देवभावसाधनात्मभावमापादयेत्यर्थः । अर्थान्माममृतं कुर्वित्यर्थः । अथ द्वितीयमन्त्रस्यायमर्थः- तम इति अज्ञानशब्दवाच्यं मृत्युः, मरणहेतुत्वादज्ञानं मृत्युरित्युच्यते । ज्योतिरिति अज्ञाननाशकज्ञानशब्दवाच्यममृतम् । अमृतत्वहेतुत्वात्

ज्ञानममृतमित्युच्यते । तस्मात् मृत्युवाच्यात् तमसोऽज्ञानलक्षणात् मा मां ज्योतिः ज्ञानहेतुभूतममृतत्वं गमयेऽत्यर्थः । तृतीयमन्त्रस्य तु पूर्वमन्त्रयोरेव समुच्चितोऽर्थः – स्वाभाविकासुरप्रवृत्तेः मां निवर्त्य श्रद्धाभक्तिपुरस्सरं शास्त्रीयकर्मध्यानादिदैवप्रवृत्तौ नियोजय । दैवप्रवृत्तेरप्यज्ञानमूलत्वात्, ततो निवर्त्य प्राजापत्यसायुज्यक्रमेण ब्रह्मात्मैक्यज्ञानेन मोक्षाख्यममृतत्वं प्रापय इत्यर्थः । एवमिमां श्रुतिमनुसृत्य तया दर्शितक्रमेणैव आसुरसंपदस्त्यागादारभ्य क्रमशो निःश्रेयसप्राप्तिपर्यन्तानि गीतासूक्तानि साधनानि सोपानक्रमेण दर्शितानि । नातो ग्रन्थकर्त्रा गीताश्लोकानां ग्रन्थे प्रदर्शितो विपरिणामितक्रमः ग्रन्थकर्तुः स्वकपोलकल्पित इति शङ्कनीयम् । एवंक्रमः श्रुतेरेव लब्धसत्ताक इति निश्चित्य विचारान्तरं परित्यज्य तत्रोक्तसाधनेषु प्रवर्तेरन् श्रेयोऽर्थिभिः ।।

सोपानक्रमेण साधनानुष्ठानं सुकरं भवतीति गीतास्वेव भगवता दर्शितम्, किन्तु विपरीतपाठक्रमेण । तथा हि द्वादशेऽध्याये विश्वरूपोपासनं पूर्वं विधाय (गी. १२-८), तत्राशक्तस्य अभ्यासयोगः (गी. १२-९), तत्राप्यशक्तस्य भगवत्कर्मपरमत्वम् (गी. १२-१०), तत्राप्यशक्तस्य भगवद्योगमाश्रित्य सर्वकर्मफलत्यागः कर्तव्य इति साधनानुष्ठाने वैपरीत्येन क्रमो दर्शितः । अतः पाठक्रममनादृत्य सोपानक्रमानुसारं यथानुष्ठानं सुकरं भवति तथा श्रेयोऽर्थिनो बोधनीया इत्यर्थमेवायं प्रयत्नः श्रीचरणानाम् ।।

किञ्च, अर्जुनायोपदिष्टेनैव क्रमेणाधुनातना अपि साधनानुष्ठाने प्रवर्तेरन्निति न भगवतापि विवक्षितम् । एवमनुष्ठानाशक्यत्वात् भगवद्वचनविरोधाच्च । शास्त्रे द्वितीयेऽध्याये, प्रथमं साङ्ख्यबुद्धिमुपदिश्य तदनन्तरमेव योगबुद्धिरुपदिष्टा । भगवता तु 'न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते' (गी. ३-४) इति वदता यथोक्तविधिना कर्मानुष्ठानेनैव साङ्ख्यबुद्ध्यनुष्ठानयोग्यता संपादिता भवतीत्युच्यते । अतो गम्यते पाठक्रमानुगुणं साधनानुष्ठानं

भगवदविवक्षितया तद्विरुद्धमेव भवेदिति । अपि च । साक्षाद्भ-गवद्वचनमपि विद्यतेऽस्मिन्विषये । तथा हि षोडशेऽध्याये भगवतोक्तम् – ‘एतैर्विमुक्तः कौन्तेय तमो द्वारैस्त्रिभिर्नरः । आचरत्यात्मनः श्रेयस्ततो याति परां गतिम् ।।’ (गी. १६-२२) इति – एतैरिति आसुरगुणाः कामक्रोधादयः, तेषां परित्यागानन्तरमेवात्मनःश्रेयस्साधनानि शास्त्रोक्तानि कर्मध्यानादीनि आचरति श्रेयोऽर्थी पुरुष इति । एतदनुगुणमेवास्मिन्ग्रन्थे आसुरसंपत्परित्यागेनैव साधनान्तराणामनुष्ठानारम्भः शिष्टः श्रीचरणैः ।।

## अनुबन्धचतुष्टयम्––

श्रीमद्भगवद्गीतामूलत्वादस्य ग्रन्थस्य गीताशास्त्रस्य संबन्धाभिधेय प्रयोजनान्येवास्यापीति ग्रन्थकृता न तानि पृथगुक्तानि । गीताशास्त्रस्य प्रयोजनादीन्येवमुक्तं श्रीमच्छङ्कराचार्यैः सम्बन्धभाष्ये –**‘तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम् । तच्च सर्वकर्मसंन्यासपूर्वकादात्मज्ञाननिष्ठारूपात् धर्मात् भवति ।...इमं द्विप्रकारं धर्मं निःश्रेयसप्रयोजनम्, परमार्थतत्त्वं च वासुदेवाख्यं परंब्रह्माभिधेयभूतं विशेषतोऽभिव्यञ्जयत् विशिष्ट प्रयोजनसंबन्धाभिधेयवद्गीताशास्त्रम् ।।** (गी.भा. उपो.) इति । अस्मिन्ग्रन्थे सर्व एते विषया उपलभ्यन्त एव । अत्राधिकारी तु परमनिः-श्रेयसाकाङ्क्षी सन् गीताशास्त्रोपदिष्टानि साधनानि क्रमशोऽनुष्ठानपथम् आनिनीषुः ।।

## अध्यायगतविषयाः ––

अथ विविधाध्यायगतान् कांश्चन विशेषविषयान् संक्षेपेणा-नुक्रमयिष्यामः ।

१. ‘**प्रकरणारम्भप्रतिज्ञा**’नामके प्रथमे सोपाने ग्रन्थस्य प्रणयने हेतुः तथा ग्रन्थोद्देशश्च ग्रन्थकृतैव दर्शितः । उक्तश्चेत्थं तत्र हेतुः -

''जिज्ञासवः...गीतार्थमन्यथान्यथा गृह्णन्तो ग्राहयन्तश्च परान्, तावतैव कृतार्थमात्मानं मन्यन्ते, न तु भगवदुपदेशमिदानीमप्यनुष्ठानेन परमपुरुषार्थसाधनत्वेन समासादयितुं सुशकमिति श्रद्दधते'' इति । उद्देशश्चैवमुच्यते - ''तस्मात् इदानीन्तनानां गीतार्थविचारणे सकुतूहलादराणाम् अस्वतन्त्रप्रज्ञानां विविधमतिभूमिकानामुपकृतयेऽपि यथा गीतोपदेशे सुखप्रवेशः स्यात् तथाऽत्र प्रयत्यते'' इति ।।

ननु ग्रन्थकर्तुर्ग्रन्थारम्भप्रतिज्ञा कथं साधनसोपानत्वं भजेत? नैष दोषः । विविधगीतविगीतगीताव्याख्यानपठनपाठनेनैव नाहं कृतार्थो जातः; गीतोक्तसाधनानि मयाऽवश्यमनुष्ठेयानि, तदर्थं केन साधनविशेषेण प्रारभेऽहमिति वीक्षापन्नस्य, अस्त्यत्र ग्रन्थो यो साधकान् सोपानक्रमेण साधनमार्गे प्रवर्तयति, येन दर्शितमार्गेण प्रवृत्ताः सन्तः परमपुरुषार्थमपि सुखेन प्राप्तुं शक्नुवन्तीति विश्वासो भवति प्रकरणारम्भप्रतिज्ञादर्शनेनेति सोपानत्वमस्य सेत्स्यत्येव । यथा ग्रामान्तरं जिगमिषोः स्वगृहद्वारे तिष्ठन् वाञ्छितमार्गस्य दर्शनमपि तस्यापेक्षितमार्गगमने साधनत्वं प्रतिपद्यते, एवमत्रापि ।।

२. '**भारतदेशदुरवस्थावर्णन**'मिति द्वितीयं सोपानम् । पुण्यवशात् भारतदेशे लब्धजन्मा सन्नपि य इतोऽपि गीतोक्तसाधनेषु तात्पर्येण न प्रवृत्तः, तं साधकपुरुषं वक्ष्यमाणसाधनानुष्ठानेषु त्वरयति, ''उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत'' (का. १-३-१५) इति काठकश्रुतिवदेव मातृवदिति सोपानत्वमस्याध्यायस्यापि सेत्स्यति । अत्र ग्रन्थकर्तुरिदं वचनं विशेषावधारणमर्हति । **'यद्यपि गीताशास्त्रपठनपाठनरीतिरद्याप्यनुस्रियत एव भारतवर्षनिवासिभिः, तथापि शास्त्रीयसाधनानुष्ठाने न कोप्यादरं बध्नाति भगवद्विमुखत्वादासुरसम्पद्भावभावितचेतस्त्वाच्च शास्त्रविदुषामपि; उक्तं हि भगवतैव- न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः । माययापहृतज्ञाना आसुरं भावमाश्रिताः ।।**'(गी. ७-१५) इति'' इति ।।

३. ‘**दैवासुरसम्पद्विभागा**’भिधं तृतीयं सोपानं बन्धमोक्षसाधनविभागज्ञानार्थम् । अत्र प्रकृतिपुरुषयोः क्षेत्रक्षेत्रज्ञापराभिधानयोः विवेकाभावनिबन्धनसंयोग एव प्राणिनां स्थावरजङ्गमलक्षणयोनिषु जन्मनः परमकारणमित्यपि दर्शितम् । अत्र प्रत्येकमासुरगुणं यथामूलमनूद्य तज्जयार्थमपेक्षितं तद्विपरीतं दैवगुणमपि तत्र तत्रैव पट्टिकारूपेण दर्शितम् ।।

४. आसुरगुणपरित्यागेन दैवगुणसंपादनेन च सात्त्विकश्रद्धायुक्तस्यैव शास्त्रोक्तकर्मसु प्रवृत्तिः कार्यक्षमा भवेदिति ‘**श्रद्धात्रयविभाग**’-दर्शनस्य चतुर्थं सोपानत्वम् ।।

५. एवं श्रद्धायुक्तस्य शास्त्रीयकर्मणि प्रवृत्त्यर्थं तद्विवरणात्मकं पञ्चमं सोपानं ‘**शास्त्रीयकर्मफलवर्णनम्**’ ।।

६. शास्त्रीयं कर्मापि दृष्टादृष्टफलभोगार्थत्वेन क्रियमाणं न संसारादुत्तारणायालम्, तत्फलस्य स्वर्गपर्यन्तस्यापि संसारान्तर्गतत्वमेवेति । अतः संसाराद्विपरीतः नित्यभूतो मोक्षसंज्ञकः परमपुरुषार्थः किंस्वरूपः ? कथं च स प्राप्य इत्येतन्निर्धारणार्थं षष्टं सोपानम् ‘**परमपुरुषा-र्थस्वरूपनिर्धारणा**’ख्यम् । अत्र गीतासु परमपुरुषार्थः केन केन शब्दविशेषेण परामृष्टः ? कश्च तत्प्राप्तिहेतुरिति परामर्शकाः श्लोका एकत्र पुञ्जीकृत्य दर्शिताः ।।

७. दर्शितस्य परमपुरुषार्थस्वरूपस्य मोक्षाख्यस्य प्राप्त्यर्थं किं सर्वं कर्म सर्वथा आरम्भत एव त्यक्तव्यमाहोस्वित् कर्मैकदेशं विशेषरूपेणानुष्ठाय क्रमेण सम्यग्दर्शनलभ्यो मोक्षः प्राप्तव्य इति विशये प्राप्ते कर्मकर्तव्यतत्संन्यासयोर्विवेकार्थप्रकाशनाय सप्तमं सोपानम् ‘**कर्मसंन्यासविभागोपदेशा**’ख्यम् । तत्र सर्वैषणापरित्यागपूर्वकं विविदिषुणा क्रियमाणस्तुरीयाश्रमप्रवेशार्थं विधिवत्कर्मणां संन्यासो मुख्यः । सङ्गफलाभिसन्ध्योस्त्यागपूर्वकं क्रियमाणं नित्यं कर्म त्यागसामान्यात् गौणोऽयं कर्मसंन्यासः । मुक्तस्य ज्ञाननिष्ठस्य स्वभावसिद्धः परमार्थसंन्यास इति संन्यासस्याधिकारिभेदेन त्रिविधत्वमत्र निरूपितम् ।।

८. अथ त्रिविधेषु संन्यासेषु यो गौणसंन्यासः स केन साधनेन सम्पादनीय इत्येतदष्टमे सोपाने निरूप्यते **'कर्मयोगोपदेशा'**भिधे । ज्ञाननिष्ठायोग्यता प्राप्त्यर्थं कर्म कर्तव्यम्, तच्च कथमिति नानाध्यायेषूक्ताः श्लोका अत्र सङ्गृहीताः ॥

९. अतः परं चेष्टारूपकर्मकरणभूमिकात उत्तरभूमिकागतं मानसक्रियासाधनं क्रमप्राप्तं दर्शयितुं **'विभूतियोगोपदेश'**नामकं नवमं सोपानम् । अत्र गीतासु दशमेऽध्याय उक्तानां भगवद्विभूतीनामुपासनमधि-कृत्य विचारः कृतः । अर्जुनेन विशिष्य पृष्टत्वात् दशमेऽध्याय उक्ता विभूतय एवात्र गृहीता उपलक्षणार्थत्वेन । अत्रैवाध्यायान्तरेषूक्ता अपि विभूतयो ग्राह्याः । तद्यथा सप्तमे 'रसोऽहमप्सु' (गी. ७-८) इत्यारभ्य 'धर्माविरुद्धो भूतेषु कामोऽस्मि' (गी. ७-११) इति पर्यन्तम्, नवमे 'अहं क्रतुः' (गी. ९-१६) इत्यारभ्य 'सदसच्चाहम्' (९-१८) पर्यन्तम्, पञ्चदशे च 'यदादित्यगतं तेजः' (गी. १५-१२) इत्यारभ्य 'वेदविदेव चाहम्' (गी. १५-१५) पर्यन्तमुक्ता विभूतयः । अष्टमे प्रकरणेऽपि सर्वा विभूतयः सङ्गृह्य दर्शिताः ॥

१०. नानाविभूतीनामुपासनोपदेशानन्तरं यद् भगवतो ज्ञानैश्वर्यबल-वीर्यतेजोभिः सम्पन्नं ऐश्वरमाद्यं रूपं यस्मिन्पूर्वोक्तसर्वविभूतीनामन्तर्भावः, तस्य रूपस्योपासनं क्रमप्राप्तं दशमे सोपाने **'विश्वरूपोपासनोपदेश'** नामके प्रकृतम् ॥

११. सोपाधिकब्रह्मविषयकविश्वरूपोपासनानन्तरं क्रमप्राप्तं निरुपाधिकब्रह्मोपासनं भावनारूपं वक्तव्यमिति **'अक्षरब्रह्मोपासनोपदेशः'** इत्येकादशं सोपानम् ॥

१२. निर्गुणब्रह्मणः प्रणवोपासनं भावनारूपं क्रममुक्तिफल-कमुक्त्वा इहैव ब्रह्मात्मैकत्वज्ञानेन मोक्षफलप्राप्त्यर्थं वस्तुतन्त्रज्ञाने पर्यवसीयमानं ध्यानयोगम् अध्यात्मयोगमनोनिग्रहनिदिध्यासना-पराभिधानम्, **'ध्यानयोगोपदे**शा'ख्ये द्वादशे सोपाने उपदिशति । अत्र

प्रणवोपासनानन्तरमेव ध्यानयोगो ग्राह्यो न तु विपर्ययेणेत्यत्र हेतुर्दर्शितः । तत्प्रसङ्गेन द्वादशाध्यायेऽर्जुनेन योगवित्तमत्वेन निर्णयार्थं परामृष्टा अक्षरोपासकाः के इति विचारः कृतः । अर्जुनस्य प्रश्नं भगवतः प्रतिवचनं तद्गतभाष्यकारवचनानीत्येतत्सर्वं पर्यालोच्यात्र अक्षरोपासका इति न केवलं सम्यग्ज्ञाननिष्ठा ग्राह्याः, किन्तु साङ्ख्ययोगध्यानयोगतदुपायनिष्ठा अपीति निर्णयः कृतः । तथैव भगवत्प्रतिवचनगतयुक्ततमा इति न केवलं विश्वरूपोपासका ग्राह्याः, किन्तु प्रणवोपासका अपि ग्राह्याः प्रणवोपासनस्यापि ज्ञानध्यानयोगापेक्षया सुलभानुष्ठानत्वात् इति निर्णयः कृतः । अतो ये भगवद्भावनारूपोपासनामार्गे प्रविष्टाः, ये च ज्ञाननिष्ठोपायमार्गे त एव पृच्छ्यन्ते 'तेषां के योगवित्तमाः' इत्यत्रेत्युपासनारूपभेदेन विवेकः कृतः ॥

'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते । ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥' (गी. १२-१) इत्यर्जुनप्रश्ने अक्षरोपासकाः के ग्राह्या इत्यत्र कृते विचारे '**द्वितीयप्रभृतिषु विभूत्यन्तेष्वध्यायेषु परमात्मनो ब्रह्मणः अक्षरस्य विध्वस्तसर्वोपाधिविशेषस्य उपासनमुक्तम्**' (गी.भा. १२-उपो) इति गीतासु द्वादशाध्यायस्योपोद्घातभाष्यवचनस्याधारेण, युक्तिदर्शनेन च यद्यपि अक्षरोपासका इति ओङ्कारोपासका न गृह्यन्त इति, 'ते मे युक्ततमा मताः'(गी. १२-२) इति भगवत्प्रतिवचनेनापि ओङ्कारोपासकाः नाक्षरोपासकानां कोट्यां प्रवेशयितव्याः किन्तु विश्वरूपोपासकैः सहैव ग्राह्या इति चोक्तम्, तथापि परिशिष्टेऽष्टमे प्रकरणे (खं. २०६) अधस्तादुदाहृतस्य 'द्वितीयप्रभृतिषु' इत्यादिभाष्यवाक्यस्य विवरणावसरे 'अक्षरोपासनमुक्तम् इति तु विविच्य ज्ञेयम् - अवगतिपूर्वकात्मज्ञानं प्रतीकद्वारेणोपासनमेव वा' इत्युक्त्या ओंकारोपासका अप्यक्षरोपासकानां कोट्यामेव गृहीताः ॥

गीतासु षष्ठेऽध्याये योगभ्रष्टमधिकृत्यार्जुनस्य प्रश्नः, भगवतः प्रतिवचनं चात्रैवानुसन्धेयमिति सोपानपङ्क्तिमेतावतारूढाः स्वयमेव

जानन्तीति कृत्वा स भागो ग्रन्थकर्त्रा नात्र परामृष्ट इति भाति । संन्यासिनामेवाधिकारत्वेनोक्ते ध्यानयोगे प्रकृते, गीतासु षष्टाध्यायस्यान्ते परामृष्टस्य योगभ्रष्टपदार्थस्य विषये किञ्चिद्वक्तव्यमस्ति । केचनाधुनातना भाषणकारा अस्य पदस्यार्थमत्यन्तं विरुद्धमेव गृहीतवन्तो ग्राहयन्ति चान्यान् । अर्जुनस्य प्रश्ने 'योगाच्चलितमानसः'(गी. ६-३७), 'उभयविभ्रष्टः' (गी. ६-३८) इति च य उक्तः, स एव 'योगभ्रष्टः' (गी. ६-४१) इति पदेन परामृष्टो भगवतः प्रतिवचने । इहलोक परलोकप्राप्तिनिमित्तानि सर्वाणि कर्माणि संन्यस्यैव ध्यानयोगे प्रवर्त-तेऽधिकारी । साधने प्रवृत्तस्य यत्नप्रकर्षाभावात्तस्यास्मिन्नेव जन्मनि ध्यानयोगफलभूतं सम्यग्ज्ञानं मोक्षसाधनभूतं न प्राप्तम् । अतो मरण-काले एष साधको योगमार्गाच्चलितचित्तो भवति । कर्मफलदा यककर्माणि पूर्वमेव त्यक्तानि, ध्यानयोगफलं च न प्राप्तमित्येवं स उभयविभ्रष्टो जातः । अर्थात् कर्ममार्गात् योगमार्गाच्च प्रच्युतोऽभवत् । अतस्तस्य का गतिरिति अर्जुनस्य प्रश्नः (गी. ३७,३८,३९) । एष एवात्र 'योगभ्रष्ट' इत्युच्यते ।।

केचन 'योगभ्रष्टः' इति 'आरूढपतितः' इत्यर्थं गृहीत्वा तस्य विषयत्वेनैव 'पार्थ नैवेह नामुत्र विनाशस्तस्य विद्यते' (गी. ६-४०) इत्यादि भगवत्प्रतिवचनं वर्णयन्ति । इदं त्वत्यन्तं विरुद्धम् । यः संन्यासी सन् स्त्रियमुपैति स आरूढपतित इति शास्त्रेषु प्रसिद्धः । संन्यासधर्मादेवं रूपं प्रच्यवनमप्रतिसमाधेयपतनमिति मन्यन्ते केचनाचार्याः । अन्ये त्वारूढपतितत्वमुपपातकमिति मन्यन्ते, न तु महापातकमिति । यदि ऊर्ध्वरेतसां नैष्ठिकवानप्रस्थसंन्यासिनां स्वाश्रमेभ्यः प्रच्यवनं महापातकम्, यदि वा उपपातकम्, उभयथापि शिष्टैस्ते पापिनो बहिष्कर्तव्या निन्दा तिशयस्मृतिवचनेभ्यः शिष्टाचाराच्च - इति **शारीरकमीमांसाशास्त्रे** (ब्र.सू. ३-४-४१,४२,४३), **तद्भाष्ये** च निर्णीतम् । अतो योगभ्रष्ट इति पदेनैतादृशस्य आरूढपतिताख्यस्य पुरुषाधमस्य ग्रहणमत्यन्तं विरुध्यते शास्त्रेण । गीतासु योगभ्रष्टः 'अयतिः श्रद्धयोपेतः' (गी. ६-३७) इति

विशेषितः । न ह्यारूढपतितः श्रद्धयोपेतः स्यात् । श्रद्धाया अभावाद्धि स पापक्रियायां प्रवृत्तः । ध्यानयोगे यस्य यत्नो न प्रकर्षेण भवति स अयतिरित्युच्यते । न चारूढपतितः कल्याणकृत्त्वेन गृहीतुं शक्यते । नापि पुण्यकृतां लोकानां प्राप्तिस्तस्य, श्रीमतां योगिनां कुले वा जन्म । अत्यन्ताधोगतिरेव तस्य भवति । ''**यस्तु प्रव्रजितो भूत्वा पुनः सेवेत मैथुनम् । षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः ।।**'' – इति लघुशातातपस्मृतिः । अन्यास्वपि स्मृतिष्वेवमेवाधोगतिरारूढपतितस्य प्रोक्ता ।।

अन्यच्च ध्यानयोगस्य प्रकरणमिदम् । ध्यानयोगिनं विहाय आरूढपतितस्यात्रानयनं शास्त्रविषयापरिज्ञानादेवेति स्पष्टम् । न वक्तव्यम्, ध्यानयोग्येव कुत आरूढपतितो न स्यात् '**बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति**'(मनुः. २–२१५) इति स्मरणादिति । गीताश्लोक-गतस्य 'श्रद्धयोपेतः' इति विशेषणस्यासामञ्जस्यं स्यादारूढपतितत्वपक्षे, कल्याणकृत् इत्यादिवचनानां च । अतो योगभ्रष्टो नारूढपतितः । तावत्यन्तभिन्नावेवेत्यलं प्रसङ्गागतेन ।।

**१३.** अथ गीताशास्त्रोपदिष्टानां सर्वेषां योगसोपानानामन्तिमं सोपानं साङ्ख्ययोगं त्रयोदशे सोपाने '**साङ्ख्ययोगोपदेशः**' इत्यभिधे निरूपयन्ति श्रीचरणाः । अत्र साङ्ख्ययोगादीनामर्थो वर्णितो भाष्यवाक्योदाहरणपूर्वकम् । मोक्षसाधनभूतब्रह्मात्मैकत्वज्ञानप्राप्त्यर्थं गीतासूक्तासु विभिन्नासु प्रक्रियासु या भगवता श्रीकृष्णेन सर्वप्रथमोपदिष्टा बाल्याद्यवस्था निरूपणरूपा, सा संक्षेपेण विवृतास्मिन् सोपाने, यया सर्वप्रत्यगात्मभूते परमात्मनि साक्षादवगतिर्जायते । तत्र तावत् 'देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा । तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।।' (२–१३) इति श्लोकेनानुभवानुसारी तर्क उपक्षिप्तो भगवता । तद्यथा – बाल्याद्यवस्थासु व्यभिचरत्सु तद्द्रष्टुरात्मनोऽव्यभिचरितस्वरूपेणैवानुभूयमानत्वात्, आत्मा स्वरूपेण निरवस्थ एव सन्नवस्थावानिव लक्ष्यते ।

एवमेवाव्यभिचरितस्वरूप एवात्मनि देहान्तरसंबन्धास्तित्वं बोधयितुं प्रवृत्तो यथा केचिन्मन्यन्ते । 'पापमेवाश्रयेदस्मान्'(१-३६), 'सङ्करो नरकायैव' (१-४१), 'धर्मसंमूढचेताः'(२-७) इत्यादिभिरर्जुनस्य वचनैः स ह्यात्मनो लोकान्तरदेहान्तरसंबन्धं जानात्येवेति गम्यते, तेन तं प्रति तद्बोधनं व्यर्थ एव भवति । अतोऽयम् 'देहिनोऽस्मिन्' श्लोक आत्मनोऽव्यभिचरत्स्वरूपत्वमेव बोधयितुं प्रवृत्तः ।।

केचित्वन्येऽयं श्लोक आत्मनो नित्यत्वेऽनुमानमुच्यत इति मन्यन्ते । तन्न, वाक्यशेषात् । 'नायं हन्ति न हन्यते' (२-१९), 'न जायते म्रियते वा कदाचित्' (२-२०) इति वाक्यशेषभूतेन भगवद्वचनेन नायमात्मनित्यत्ववादः, किन्तु शरीरतद्धर्मतत्कर्मतत्फलादे रात्मन्यसत्त्ववादोऽर्थादात्मनोऽविक्रियस्वरूपत्वेनात्मनः सत्यत्ववाद इति गम्यते । अपि च, येषामत्रात्मनो नित्यत्वमेव बुबोधयिषितमिति मतम्, तेषाम् 'नासतो विद्यते भावो' (२-१६) इति सत्त्वासत्त्वलक्षणविभाग वचनं नैवोपपद्येत । 'अविनाशि तु तद्विद्धि' (२-१७) इति श्लोके आत्मनोऽविनाशित्वे 'येन सर्वमिदं ततम्' (२-१७) इति यत्परमात्मनो विशेषणं तदेव हेतुत्वेन दर्शयन्नात्मनः सतत्त्वबोधनपरमेवेदं प्रकरणमिति द्रढयति । तदनन्तरपठितेन 'अन्तवन्त इमे देहाः' (२-१८) इति श्लोकेन सर्वेषामपि देहानामयमेवात्मेत्यात्मनोऽद्वितीयस्वरूपमेव दर्शयदिदं कृत्स्नं प्रकरणमात्मनः स्वरूपकथन एव तात्पर्यवदिति गमयति । अतः 'देहिनो ऽस्मिन्' (२-१३) इति श्लोको नात्मनो नित्यत्वमात्रबोधनपरं किन्त्वा त्मनोऽव्यभिचरितस्वरूपबोधनपरमिति निश्चीयते ।।

एवमेव 'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः । आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत ।।' (२-१४) इति श्लोकोऽप्यात्मनोऽव्यभिचरितस्वरूपकथन एव तात्पर्यवान्भवति । यथैव स्थूलशरीरतद्धर्मतत्कर्मतदवस्थाभिरसंबद्ध एवात्मा, दृश्यस्य शरीरादेर्व्य भिचरत्स्वरूपस्य दृग्रूपात्मसंबन्धानुपपत्तेः, तथैव सूक्ष्मशरीरतद्धर्म

तत्कर्मतदवस्थाभिरसंबद्ध एवात्मा, व्यभिचरत्स्वरूपत्वात्सुखदुःखादेः । अत्र 'आगमापायिनोऽनित्या' इति शीतोष्णादिद्वन्द्वस्यानित्यत्वमेव विवक्षितं न तु तस्यासत्वमिति केचिन्मन्यन्ते । तदपि न समीचीनं यतः प्रागुक्तप्रकारेण वाक्यशेषभूतश्लोका आत्मनोऽद्वितीयाव्यभिचरित सत्यस्वरूपमेव बोधयितुं प्रवृत्ताः । अपि च 'यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः । धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत्' (१-४६) इति मरणादप्यबिभ्यतोऽर्जुनस्य मात्रास्पर्शान् बाह्यसुखदुःखे तितिक्षस्वेत्युपदे शस्तत्तात्पर्यवानिति न सङ्गच्छते । तस्माद्यथा 'देहिनोऽस्मिन्' इति श्लोकेन स्थूलदेहव्यभिचारेऽप्यात्मनोऽव्यभिचरत्स्वरूपत्वमुक्तम्, तथा 'मात्रास्पर्शास्तु' इति श्लोकेन सूक्ष्मदेहविकारेप्यात्मनोऽ व्यभिचरत्स्वरूपत्वमुच्यत इत्यपि सूक्ष्मदृष्ट्या श्लोकद्वयस्य तात्पर्यं निरूपितः । एतादृशविचारेणैतत्सोपानमारूढानामपेक्षितवस्तुपरीक्षणक्षमां सूक्ष्मदृष्टिं काङ्क्षावधारयन्ति श्रीचरणाः ।।

अस्मिन्नेव प्रकरणे 'येन सर्वमिदं ततम्' (गी. ८-३२ इत्यादि) इति गीतास्वक्षरशोऽर्थतश्चासकृदभ्यस्यमानं परमात्मनः सर्वव्यापकत्व बोधकश्लोकपादः स्थाननिर्देशपूर्वकमेकत्र पट्टिकारूपेण दर्शितः । इदं दृष्ट्वा वेदान्तरसिकानाम् 'ऐतदात्म्यमिदं सर्वम्' (छां. ६-८-७) इति छान्दोग्योपनिषदि पुनः पुनरभ्यस्यमानं समस्तवेदान्ततात्पर्यबोधकं वाक्यं स्मृतिपथं आगच्छतीति न चित्रम् ।।

१४. **'साङ्ख्ययोगसम्बन्धोपदेशः'** इति चतुर्दशं सोपानम् । ननु समनन्तरातीतमेवान्तिमं सोपानमिति तत्रोक्त्वा कथं सोपानान्तरं दिश्यते । सत्यमुक्तम्, किन्तु गीतासूक्तेषु योगविशेषेष्वन्तिममित्युक्तं तत्र, न तु कृत्स्नस्योपदेशस्यान्तिममिति । अन्यच्च, वक्ष्यमाणान्यपि सोपानानि तत्सम्बन्धान्येवेति तेषामपि सोपानत्वं न विरुध्यते । तथा हि समन न्तरातीताध्यायान्ते ग्रन्थकृता - 'अस्य विस्तरस्तु यथास्थाने भवितेति इहोपरम्यते' इत्युक्तत्वादेव सोपानान्तराणि सन्तीति ज्ञेयम् । अस्मिन्सो पाने कर्मयोगसाङ्ख्ययोगयोः सम्बन्धो व्याख्यातः ।।

**१५.** अथ '**ज्ञानयज्ञोपदेशः**' इति पञ्चदशं सोपानम् । इदं सिंहाव-लोकनस्थानीयत्वेन ग्राह्यम् । लोके यथा निःश्रेणिमारूढप्राय आरूढानां सोपानानामवलोकनार्थं स्वदृष्टिमारूढसोपानेषु प्रसारयति तद्वदेवेदं सोपानम् । गीतासु द्वितीयतृतीयाध्याययोरुक्तस्य कर्मयोगोपायज्ञानयो-गस्य स्तुत्यर्थमेव चतुर्थोऽध्यायः शास्त्रसम्प्रदानसंप्रदायकथनपूर्वकं प्रवृत्तः प्राधान्येन । तस्मिन् चतुर्थेऽध्याय उक्ता विषया एवास्मिन्सोपाने प्रस्तुताः ।।

**१६.** सिंहावलोकनसम्बन्धतयैव प्राप्तो ज्ञानिभिः क्रियमाणः परमार्थसंन्यासः । स कीदृशः ? तस्य च किंस्वरूपम् इति निरूप्यतेऽस्मिन् '**परमार्थसंन्यासोपदेश**'नामके षोडशे सोपाने । अत्रापि चतुर्थाध्यायगतविषया एव प्राधान्येन चिन्तिताः ।।

१७. ज्ञानी परमार्थसंन्यासी त्रीनपि गुणानतीत्य निस्त्रैगुण्ये पथि विचरति । कर्मानुष्ठाने प्रवृत्तस्य निस्त्रैगुण्यभावप्राप्तिः कथं भवेदिति विचारः सप्तदशे सोपाने '**निस्त्रैगुण्यभावोपदेशा**'ख्ये कृतः । अत्र हि श्रीचरणाः ११० तम खण्डे - ''मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च । अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ।। मन एव मनुष्याणां कारणम् बन्धमोक्षयोः । बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम् ।।''- इति श्लोकद्वयमुदाहरन्ति । तयोर्मूलं **ब्रह्मबिन्दूपनिषदि**ति चोल्लिखितवन्तः । इदं त्वत्र चित्रं यत् प्रस्थानत्रयभाष्येषु प्रमाणत्वेन स्वीकृतानामेव श्रुतिस्मृतीनां वाक्यानि श्रीचरणाः प्रायशः स्वग्रन्थेषूदाहरन्ति । ब्रह्मबिन्दूपनिषत्तु न भाष्यकारैः परामृष्टा प्रस्थानत्रयभाष्येषु । यदप्रतिषिद्धं तद्ग्रहणे न दोष इति न्यायोऽत्रानुसृतः श्रीचरणैरिति भाति । उदाहृतद्वितीयश्लोकः क्वचित्पाठान्तरेण **विष्णुपुराणे**ऽप्युपलभ्यत इत्यन्यदेतत् ।।

**१८.** क्षेत्रक्षेत्रज्ञयोर्ज्ञानमथवा ब्रह्मात्मैक्यज्ञानमेव परमपुरुषार्थस्य साक्षात्साधनमिति यदुक्तमतीतेषु सोपानेषु, तत्र भगवतो जीवस्य च

सतत्त्वनिर्धारणार्थं '**भगवत्स्वरूपसतत्त्वोपदेशः**' इति अष्टादशं सोपानम् । अत्र हि तत्पदार्थविषयको विचारः कृतः ॥

१९. भगवत्स्वरूपसतत्त्वनिर्धारणानन्तरं त्वंपदार्थवाचकस्य '**जीवसतत्त्वोपदेशः**' एकोनविंशं सोपानम् । यद्यपि जीवस्य स्वरूपेणाव्यभिचारित्वं पूर्वमेव त्रयोदशे सोपान उक्तं तथापि शास्त्रार्थनैर्मल्याय जीवसतत्त्वं पृथङ्निरूप्यतेऽत्र । तत्त्वंपदार्थयोरैक्यमप्यत्रैव बोधितम् । जीवस्य पारमार्थिकस्वरूपनिर्णयार्थम् 'ज्ञेयं यत्तत्प्रवक्ष्यामि', 'सर्वतः पाणिपादं तत्', 'सर्वेन्द्रियगुणाभासम्' (गी. १३-१२,१३,१४) इति श्लोकान् क्रमेणोदाहरन्ग्रन्थकर्ता - ''अध्यारोपापवादाभ्यां निष्प्रपञ्चं प्रपञ्च्यते''- इति **भाष्यकारोदाहृतं सम्प्रदायविदां वचन**मेवा-नुसरतीति गम्यते ॥

२०. जीवब्रह्मणोः सतत्त्वमुक्तम् । तज्ज्ञानेनैव मोक्षाख्यपरमपुरुषा-र्थप्राप्तिरिहैव विशिष्टाधिकारिणाम्, परम्परया चान्याधिकारिणामित्युक्तम् । तज्ज्ञानप्राप्त्यर्थं साक्षात्साधनभूतो 'ज्ञानयोग' उक्तः । परम्परासा धनभूतकर्मध्यानादय उक्ताः । अथ सहकारिसाधनानि वक्तव्यानीति सन्तीतोऽपि कानिचन सोपानानि । गीतासु सम्यग्दर्शिनः मुक्ताः सन्तः कृतकृत्या एव स्थितप्रज्ञाः, युक्ताः, भक्ताः, ज्ञानिनः, गुणातीता इति व्यपदिष्टाः प्रकरणानुसारेण । तेषां स्वभावसिद्धान्येव लक्षणानि मुमुक्षूणां यत्नसाधनानीति कृत्वा तेषां लक्षणानि क्रमेणोच्यन्ते अस्मिन् '**स्थितप्रज्ञलक्षणोपदेशा**'ख्ये विंशे सोपाने गीतासु द्वितीयेऽध्याये प्रोक्तानि साधनान्युक्तानि स्थितप्रज्ञलक्षणानि ॥

२१. गीतासु षष्ठेऽध्याय उक्तस्य युक्तस्य लक्षणान्यस्मिन्नेकविंशे '**युक्तलक्षणोपदेशा**'ख्ये सोपान उक्तानि ॥

२२. '**भक्तलक्षणोपदेशा**'ख्ये द्वाविंशे सोपाने गीतासु द्वादशेऽ ध्याय उक्तानि भक्तलक्षणान्युच्यन्ते ॥

२३. **'ज्ञानिलक्षणोपदेशा'**ख्ये त्रयोविंशे सोपाने त्रयोदशेऽध्याय उक्तस्यामानित्वादिसाधनगणस्य परामर्शः कृतः ।।

२४. **'गुणातीतलक्षणोपदेशः'** इति चतुर्विंशं सोपानम् । अत्र गीतासु चतुर्दशेऽध्याय उक्तानि गुणातीतलक्षणान्युच्यन्ते ।।

२५. अथेदानीमस्या गीताशास्त्रोपदेशसोपानपङ्क्तेश्चरमं पञ्चविंशं सोपानं **'ज्ञाननिष्ठोपदेशा'**ख्यं निरूप्यते यत्समारूढस्तद्विष्णोः परमं पदमाप्नोति इति । अत्र गीतासूपसंहाराध्याये 'निष्ठा ज्ञानस्य या परा' (गी.१८-५०) इति यदुक्तं तत्सम्बद्धपूर्वापरविषयाः सङ्गृहीताः । केयं ज्ञाननिष्ठेति भाष्याधारेण दर्शितम् ।।

२६. अथ **'शास्त्रोपदेशसारा'**ख्येन षड्विंशेन सोपानेन ग्रन्थस्य प्रधानभागः समाप्यते । अत्र ग्रन्थकृतो वचनमेवोदाह्रियते - ''**तदिदं गीताशास्त्रं भगवता समुपदिष्टमादिमध्यावसानेषु भक्तिप्रधानम्, भक्तिश्च भगवच्छरणतारूपमिति भक्तिशास्त्रमित्यपि संज्ञामर्हति । यथा चेदं तथा शास्त्रोपसंहारवाक्यानि कतिचिदुदाहृत्येदं प्रकरणमुपसंह्रियते ।।**'' इति । ननु पूर्वं ज्ञाननिष्ठोपदेश एव चरमं सोपानमित्युक्तम् । अतः कथमस्योपसंहार स्थानीयस्याध्यायस्यापि सोपानत्वमुच्यते । नैषदोषः । अत्र हि समस्तस्य गीताशास्त्रोक्तस्य कर्मज्ञानादिविविधसाधनपूगस्य सारभूतं साधनं भक्त्याख्यं भगवति शरणतारूपं निरूप्यते । सा हि भक्तिः सोपानमारुरुक्षोरारम्भतयैव भवेत् । सा पुनर्ज्ञाननिष्ठोपदेशाख्यान्तिमसोपानपर्यन्तमनुस्यूततया भवेदेव शास्त्रोक्तमोक्षपदमारोढुमिच्छतः । किं बहुना, गीताशास्त्रश्रवणमात्रेऽपि भक्तिरेव जिज्ञासुमधिकारयति । भक्तिमत एवेदं शास्त्रं वाच्यम् 'नाभक्ताय' इति भगवता कण्ठरवेणोक्तम् (गी. १८-६७) । अत आरम्भत एव भक्तिरपेक्षितेति स्पष्टम् । यथा हि लोके निःश्रेणेः न केवलं प्रत्येकं फलकं सोपानसंज्ञं भवति, किन्तु समस्तस्य निःश्रेणेरपि सोपानमिति व्यपदेशो भवति तद्वदत्रापि सर्वेषु साधनेष्वनुगतत्वेन भक्तिः

समस्तसोपानस्थानीयेति युक्तमेव सोपानत्वमस्याप्यध्यायस्य । अस्मिन्नध्याये गीतासूक्तं भक्तेर्माहात्म्यं प्रकट्यते । अन्ते च समस्तस्य गीताशास्त्रोपदेशस्य सारः संक्षेपेण दर्शितः ।।

ननु यद्यप्यत्र 'तदिदं गीताशास्त्रं भगवता समुपदिष्टमादिमध्यावसानेषु भक्तिप्रधानम्' (खं १५७) इत्युक्तम्, तथाप्यग्रे परिशिष्टे तृतीये प्रकरणे तु 'किंबहुना, ज्ञानमेवोपदेष्टुं शस्त्रमिदं प्रवृत्तमित्युपक्रमोपसंहाराभ्यां मध्ये चावसीयते' (खं. १८२) इति ज्ञानस्यैव प्राधान्यमुक्त्वा तदुपोद्बल-कत्वेन गीताश्लोका अप्युदाहृताः । कथमेवं स्ववचनव्याहतोक्तिः शोभेत ग्रन्थकर्तुरिति चेत् । न, ग्रन्थानवधारणात्तव । ग्रन्थकर्तरि स्ववचनव्याह-तोक्त्यारोपः तव ग्रन्थस्य सम्यगवधारणाभावादेव भवति न तु वास्तवः । न हि ज्ञानं भक्तिश्चेति द्वौ भिन्नपदार्थौ येन भवतोदाहृतवचनद्वयस्य परस्परव्याहतत्वशङ्का साध्वी स्यात् । ग्रन्थकृतैव ज्ञानभक्त्योश्चैक्यं संवर्णितमन्यत्र । तद्यथा-

''अथ येन परमज्ञानेन युक्ता एव परमात्मनो मुख्यभक्तास्युस्तदिह निरूप्यते । यद्यपि भगवत्तत्त्वज्ञानं भगवद्भक्तिश्चेत्येते संज्ञाभेदमात्रेण भिद्येते, न वस्तुनि कश्चिद्भेदोऽस्ति, यतः परमप्रेमवत एव भगवाना त्मनस्तत्त्वं विवृणोति, भगवत्तत्त्वं कृत्स्नशः परिज्ञानवत एव च परा प्रीतिः सञ्जायेत नान्यस्य कस्यचित् तथापि प्रेमज्ञानलक्षणवृत्त्युत्पत्त्यपे-क्षया भक्तिः, ज्ञानं चेति व्यपदेशो भवति । यथा ह्यौष्ण्यं प्रकाशश्चेति दाह्यप्रकाश्यापेक्षया व्यपदेशो भवति, न ह्यौष्ण्यव्यावृत्तः प्रकाशः प्रकाशव्यावृत्तमौष्ण्यं वा समस्ति वस्तुनि, तद्वदिति ज्ञेयम् ।'' (खं. १४४) इति ।।

अपि च ज्ञानं-भक्तिः, ज्ञानी-भक्त इति च परस्पराभेदेन ह्यसकृद् व्यवहारः कृतो दृश्यतेऽस्मिन्ग्रन्थे । तद्यथा - 'सम्यग्ज्ञानवान् मुक्तो भक्तत्वेनापि व्यपदिष्टोऽस्मिन् शास्त्रे' (खं. १३८), 'येन ज्ञानेन युक्ताः परभक्ताः भगवतः प्रिया भवन्ति' (खं. १४५), 'ज्ञाननिष्ठालक्षण-

पराभक्तिप्रप्तिः'(खं. १६१) इत्यादयः । **भगवता भाष्यकारेणा**पि ज्ञानभक्त्योरभेदेन व्यवहारो दर्शितः । तद्यथा – ''**एवंभूतः ज्ञाननिष्ठः मद्भक्तिं मयि परमेश्वरे भक्तिं भजनं पराम् उत्तमां ज्ञानलक्षणां चतुर्थीं लभते 'चतुर्विधा भजन्ते माम्' ।**''(गी.भा.१८–५४), ''**सा इयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरिति उक्ता ।...अतः ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानातीति वचनं न विरुध्यते ।**'' (गी.भा.१८–५५) इत्यादयः । नैतावदेव । भगवानपि गीतास्वेवमेव वदति – ''तेषां ज्ञानी नित्ययुक्त एकभक्तिर्विशिष्यते''(७–१७), ''भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः''(१८–५५) इत्यादिना । तस्मान्नात्र चोद्यं किंचिदात्मानं लभते ।।

अनेन षड्विंशाध्यायात्मको ग्रन्थो यद्यपि समाप्तः, वक्तव्याश्च विषयाः सर्वे यद्यप्युक्ताः, तथापि **श्रीचरणाः जिज्ञासूनामुपकाराय गीतोक्तान् श्लोकान् विषयानुगुणं विभज्य परिशिष्टरूपेण सङ्गृह्य दर्शितवन्तो नवसु प्रकरणेषु ।** तत्र यद्यपि श्लोकानां व्याख्यानं नैव कृतम्, तथापि प्रसङ्गानुसारमतिसंक्षेपेण विवरणं कृतं क्वचिदुपलभ्यते । परिशिष्टेऽष्वपि प्रधानग्रन्थानुगुणं भक्तेर्माहात्म्यदर्शनायान्तिमे प्रकरणे भक्तिपरामर्शकवाक्यानि सङ्गृह्यान्ते भक्तिरेव गीतोपदेशसारः इति दर्शयितुमुपसंहाराध्यायगत श्लोकाः प्रदर्शिताः ।।

गीतोपदेशस्यैवं सोपानक्रमेण संक्लृप्तिः समस्तस्य गीताशास्त्रस्य करतलामलकज्ञानसदृशं ज्ञानं विना न सम्भवतीति न पृथग्वक्तव्यम् । गीताशास्त्रोक्तानि साधनानि स्वयमनुष्ठायैव ग्रन्थेऽस्मिन् साधना नामनुष्ठानक्रमो दर्शित इति साधनानां पूर्वापरक्रमे दर्शितैर्हेतुभिर्ज्ञा यते । अनेनेदं निश्चितं भवति यत्, यः कश्चिद् ग्रन्थे दर्शितमार्गेण गीतासूक्तसाधनानामनुष्ठाने प्रवर्तते स नचिरादेव श्रेयः प्राप्नोतीति ।।

एवं गीताश्लोकानां विपरिणामितक्रमेण बोधनेन सपरिशिष्टे ग्रन्थे समाप्ते, इदं ज्ञायते यत् केचन श्लोकाः प्रधानग्रन्थे तत्परिशिष्टे वा न गृहीता एवेति । एवमपरामृष्टाः मूलश्लोकाः मूलपाठक्रमेण **प्रथमानुबन्धे** दर्शिताः । नैष सङ्ग्रहः श्रीचरणैः कृतः सूचितो वा । ग्रन्थेऽस्मिन् सर्वे गीताश्लोका भवेयुरित्याशया प्रकाशकैरेवैवं सङ्गृह्य दीयते । **द्वितीयेऽनुबन्धे** श्लोकानुक्रमणिका दत्ता ।।

## ग्रन्थसम्पादनम्, तत्र साहाय्यं च --

अथ ग्रन्थसम्पादनविषये किञ्चिदुच्यते । सोऽयं ग्रन्थः संस्कृतमयोऽपि कन्नडभाषालिप्यैव श्रीचरणैर्लिखितः । तेषामतीते वयसि लिखितत्त्वात्सा कन्नडलिपिः तज्ज्ञानामपि क्लेशेनैवावगन्तुं शक्या जाता । श्रीचरणानां महदनुग्रहेणैव तेषां कृपापात्रभूतास्तेषामन्तेवासिनः वे।।ब्र ।।श्री।। अश्वत्थनारायणावधानिमहोदयाः समग्रं ग्रन्थमिममतिनैपुण्येन पठितुं शक्ताः सञ्जाताः । ग्रन्थं पठित्वा शब्दशो देवनागरीलिप्या लेखितवन्तः । तदाधारेणैव गणकयन्त्रे मुद्रणार्थमुट्टङ्कनं कृतम् ।।

### अत्रेमे विषया अवधेयाः पाठकैः –

१. आकरग्रन्थे क्वचित्स्थलेषु लेखनीदोषमशीपतनादिनिमित्तेन श्रीचरणानामक्षररेखा न सम्यगवगम्यन्ते । अतस्तेषु स्थलेषु पूर्वापरपदानामक्षराणां चानुगुणमूहापोहाभ्यां युक्तः पाठो निर्णीतः । विरलान्येव तादृशानि स्थलानीति न पृथगुल्लिखितानि ।।

२. क्वचिद्वाक्येषु पदानां पुनर्लेखनं दृश्यते विनैव विशेषार्थम् । क्वचित्तु चकारेतिकारादीनां त्रुटिरपि दृश्यते । सर्वमेतद्यथोचितं परिष्कृत्य मुद्रितम् ।।

३. आकरग्रन्थे क्वचिद्गीताश्लोकानां प्रमाणवाक्यानां चोदाहृतग्रन्थसंख्या न दर्शिता । पाठकसौकर्यार्थं तत्र तत्र सा सा संख्या योजिता ।।

४. ग्रन्थ उदाहृता गीताश्लोकाः, उदाहृतानि तद्भाष्यवचनानि च अध्यात्मप्रकाशकार्यालयेन प्रकाशिते कन्नडानुवादसहिते शङ्करभाष्यग्रन्थे आदृतपाठमनुसृत्यैव मुद्रितानि यद्यपि हस्तप्रतौ क्वचित्पाठान्तरमेव स्वीकृतं दृश्यते ।।

५. पाठकसौकर्यार्थं ग्रन्थेऽस्मिन् काश्चन टिप्पण्यो योजिताः । यत्र कुत्रचित् ग्रन्थकृद्भिरेव टिप्पणी दर्शिता तत्र तद्योतनार्थं विशेषोल्लेखः कृतः ।।

६. भाष्यवाक्यानि स्थूलतराक्षरैर्मुद्रितानि पृथग्द्योतनार्थम् । एवमुदाहृतेषु वाक्येषु यत्र विशेषावधारणमपेक्षितं तत्राकरग्रन्थानुगुणमेव अधोरेखा लिखिता ।।

७. आकरग्रन्थे यत्र क्वचिच्छ्लोकः प्रतीकरूपेणोदाहृतः, तत्र पूर्णश्लोकः, श्लोकार्धो वा दर्शितः ।।

८. यत्र क्वचित्समानविषयत्वेन श्लोकपूगा उदाहृताः तत्र श्लोकाः निदर्शनार्था इति ग्राह्याः ।।

९. आकरग्रन्थे प्रत्येकस्याध्यायस्यान्ते पुष्पिकावाक्यं कृत्स्नं न लिखितम् । कृत्स्नमपि वाक्यं तत्र भवेदिति संज्ञा तु कृता श्रीचरणैः । अतः कृत्स्नं दत्तम् ।।

एवं सम्पादितं ग्रन्थं पूज्यश्रीप्रकाशानन्देन्द्रसरस्वतीस्वामिनां प्रेरणया निरीक्षणेन च संस्थायाः अध्यात्मविद्यालयस्य विद्यार्थी श्रीरामप्रकाशकारन्तः गणकयन्त्रे उट्टङ्कितवान् । एवमुट्टङ्कितं ग्रन्थं पुनराकरग्रन्थेन सह तोलयित्वा तद्गतदोषानपमृज्य मुद्रणार्थं पुनः सज्जीकृतवन्तः पूज्यश्री अद्वयानन्देन्द्रसरस्वतीस्वामिनः, पूज्यश्री प्रकाशानन्देन्द्रसरस्वतीस्वामिनः, वे।।ब्र।।श्री।। अश्वत्थनारायणावधानिनः, वे।।ब्र।।श्री।।केशवावधानिनः, श्रीलक्ष्मीशभट्टः, श्रीप्रदीपशर्मा च । एवं बहुभिः कृतेन महता परिश्रमेणैवायं ग्रन्थः प्रकट्यत इदानीम् ।।

पूज्यश्री अद्वयानन्देन्द्रसरस्वतीस्वामिनोऽस्यग्रन्थस्य विषये प्रास्ताविकमपि लिखित्वोपकृतवन्तः । श्रीमान् डा।। के.एस्. रामनाथ शर्मामहोदय आङ्ग्लभषया ग्रन्थस्य प्रास्तविकं लिखित्वास्मानुप-कृतवन्तः । ग्रन्थे सन्त्यन्ये सज्जना येऽस्यग्रन्थस्य मुद्रणार्थं धनसाहाय्यं कृतवन्तः । तेषां नामोल्लेखोऽन्यत्र भविता । ग्रन्थमिमं श्री एन्. एस्. सत्यनारायणः स्वकीये श्रीराममुद्रणालये मुद्राप्य महदुपकारं कृतवान् ।।

## कृतज्ञताप्रकटनम्––

तदेवं ग्रन्थप्रकटनार्थं ये सर्वेऽस्मानुपकृतवन्तोऽत्र विशेषेणोऽल्लिखिता अन्ये च, तेषां सर्वेषां वयमधमर्णः सन्तस्तेभ्योऽस्माकं कृतज्ञतामत्रोल्लिखामः । यद्यप्यन्ते तथापि प्राधान्येन यस्य जिज्ञासु पाठकसमुदायस्यार्थायायं ग्रन्थो रचितः श्रीचरणैः, यस्यार्थायास्मा भिर्विलम्बेनापि वायं प्राकाश्यं नीयत इदानीम्, यदर्थं चात्रोल्लिखिता नुल्लिखिताश्च जनाः ग्रन्थप्रकाशनाय परिश्रमं कृतवन्तः तस्मै पाठकसमुदायाय कार्तज्ञप्रकटनं विना वयं कृतघ्ना एव भवाम इति प्रत्येकस्मै पाठकायाप्यस्माकं कृतज्ञता विशेषेणोल्लिख्यते । श्रीचरणा अस्मान्सर्वान् तैर्दर्शितसोपानक्रमेण गीतोपदिष्टसाधनानुष्ठानपथे सुदृढमारोप्य स्वात्मानमिवास्मानपि स्वात्मपदं प्रापयन्त्विति श्रीचरणान्प्रार्थयामः ।।

**सोपानपङ्क्तिमारूढास्सच्चिदानन्दमानसाः ।**
**प्राप्नुयुस्ते पदं नूनं वासुदेवाभिधायकम् ।।**

**श्रीचरणानाम् आराधनम्** **प्रकाशकाः**

९ – ८ – २०१८

**होळेनरसीपुरम्**

# प्रास्ताविकम्

## गीताशास्त्रस्वरूपम् –

निश्चप्रचमिदं सर्वेषां त्रय्यन्तनिष्णातानां यत् परमकारुणिको भगवान्नारायणो शोकमोहमहोदधौ निमग्नान् जनानुद्दिधीर्षुः अर्जुनं निमित्तीकृत्य, स्वनिश्वसितसर्ववेदार्थसारसङ्ग्रहभूतं गीताशास्त्रं साक्षात्स्वमुखेनैवोपदिदेशेति। शोकमोहनिवृत्तिश्च आत्मतत्त्वज्ञानेनैव भवति, 'तत्र को मोहः कः शोक एकत्वमनुपश्यतः' (ई. ७) इति श्रुतेः। अतः शोकमोहनिवर्तकोपदेशरूपमिदं शास्त्रं ज्ञानशास्त्रमेव। उपदेशस्यारम्भे 'नानुशोचन्ति पण्डिताः'(२–११) इति भगवता – पाण्डित्यशब्दितज्ञानेन शोकमोहनिवृत्तिमुक्त्वा अन्ते पुनरुपसंहरति 'इति ते **ज्ञान**माख्यातम्' (१८–६३) इति ज्ञानमेवोक्तं मयेति – स्पष्टमभ्यधायि। मध्येऽपि 'न हि **ज्ञानेन** सदृशं'(४–३८), 'सर्वं कर्माखिलं पार्थ **ज्ञाने** परिसमाप्यते' (४–३३) इति, 'ज्ञानी त्वात्मैव मेमतम्'(७–१८), 'प्रियो हि ज्ञानिनोऽत्यर्थम्' (७–१७) इति च ज्ञानस्य ज्ञानिनश्च समुत्कर्षमाविष्करोति गीताचार्यः ।।

अत्रैकैकोपि श्लोकः गीतापदेन व्यपदिश्यते साम्प्रदायिकैरित्येतन्न प्रस्मर्तव्यं वाचकमहोदयैः। तथा हि भगवत्पादीयं वचनं 'गीताख्यैः सप्तभिः श्लोकशतैः...', 'सर्वासु गीतासु निश्चितोर्थः' इति बहुवचनप्रयोगात् ।।

कर्मनिष्ठा ज्ञाननिष्ठेति निष्ठाद्वयम् उपायोपेयभूतं गीताशास्त्रस्य विषयः। द्वितीयेऽध्याये 'एषा तेऽभिहिता साङ्ख्ये'(२–३९) इत्यत्र निष्ठाद्वयमभिधाय शास्त्रान्ते 'मन्मना भव मद्भक्तः' (१८–६५) इति श्लोकेन उपायभूतां कर्मयोगनिष्ठामुक्त्वा 'सर्वधर्मान् परित्यज्य'(१८–६६) इत्यत्र उपेयभूतां ज्ञाननिष्ठां तत्फलं च मोक्षमुक्त्वा उपसञ्जहार भगवान्। भाष्यकारा अपि ईश्वरशरणता एव कर्मयोगनिष्ठारहस्यं इति प्रतिपादयन्ति।

केवलज्ञाननिष्ठारूपः गीतार्थः योग शब्देनोक्तः चतुर्थाध्याये 'इमं विवस्वते योगं प्रोक्तवानहम्' (४-१) इति। अत्रावतरणिका**भाष्यम् – 'योऽयं योगः अध्यायद्वयेनोक्तः ज्ञाननिष्ठालक्षणः ससंन्यासः कर्मयोगोपायः यस्मिन् वेदार्थः परिसमाप्तः प्रवृत्तिलक्षणश्च, गीतासु च सर्वासु अयमेव योगो विवक्षितो भगवता**' इति। तस्यास्य योगस्य शासनात् गीताशास्त्रं योगशास्त्रमित्यपि व्यपदिश्यते प्राचीनैः। तस्मिन् अर्जुनविषादयोगादिमो –क्षसंन्यासगोगान्ताः अष्टादशाध्यायास्सन्तीति सर्वेषां नो विदितमेतत्।।

## श्रीचरणानां ग्रन्थे विशेषः –

यद्यपि पाठक्रम एवमस्ति, तथापि श्रीचरणैः षोडशादध्यायतः पाठक्रमः आरम्भणीयः इति, अत्र प्रतिपादितम् । यतः सर्वे लोकाः आसुरीसंपत्परिवर्जनद्वारा शास्त्रेऽस्मिन् अधिकृता भवन्तीति तेषामाशयः। अयं चान्यो विशेषः यत् समग्रेऽस्मिन् ग्रन्थे साङ्ख्ययो–गनैयायिकवैशेषिकबौद्धार्हतानि मतानि कटाक्षेणापि न वीक्षितानि। तथैव मीमांसकवृत्तिकारादिपक्षा अपि न परामृष्टाः। केवलं शुद्धं शाङ्करं भाष्यं साक्षाद्भगवद्वचनं च प्रमाणीकृत्य मध्ये मध्ये युक्त्यनुभवादीन् च संयोज्य प्रसन्नगम्भीरां व्याख्यां विवरणं च शास्त्रस्यास्य वितेनिरे। अत्यल्पशास्त्रपरिचितचित्ता अपि मुमुक्षवः निष्प्रत्यूहं शास्त्रमिदं प्रतिपित्सेरन्नित्याशयेन इमं ग्रन्थं रचितवन्तः। यद्यप्ययं ग्रन्थः श्रीचरणानां जीवितकाले एव मुद्रापितव्यः आसीत्, कारणान्तरेण तदा न मुद्रापितः, तथापि सौभाग्यवशात् विलम्बेनापि इदानीं प्राकाश्यमानोऽस्ति।।

अस्मिन् ग्रन्थे सद्गुरुभिः श्रीचरणैः गीतोपदेशः कथं सोपाना रोहणक्रमेण चिन्तयितुं शक्यः? इत्यत्र युक्तिरेवं प्रदर्शिता। भगवता वेदव्यासेन यथादृत उपदेशक्रमः स न सर्वानुपकरोतीति मन्दप्रज्ञान् इदानीन्तनानिति, स एव गीताशास्त्रार्थः व्यत्यासक्रमेण संप्रतितनानधिकारिविशेषान् आलक्ष्य विनिर्दिश्यते यथा गीतासोपानं सर्वेषां सुखावरोहणं स्यादिति।।

तद्यथा – स्वेच्छाप्रवृत्तिहेतुभूतामासुरीं प्रकृतिं विजित्य प्रयत्नपूर्वकं दैवी प्रकृतिरभिव्यञ्जयितव्या श्रेयोऽर्थिभिः। शास्त्रोक्तानुष्ठाने चादरः कर्तव्यः इति दर्शितम् । अतः श्रद्धयैव क्रियमाणं यज्ञादिकं कर्म ज्ञानार्थं भवति । मुमुक्षुभिश्च श्रद्धायुक्तैः क्रियमाणं ओंतत्सदित्याख्येन ब्रह्मनामत्रयसंकीर्तनेन सत्त्वशुद्धिपूर्वकं ज्ञानार्थं च भवति यस्मात्तस्मात् अश्रद्धा सर्वथैव त्याज्या ब्रह्म प्रेप्सुभिरिति । शास्त्रविध्युत्सर्गेण वर्तमानानां कामकारदृष्टीनाम् इहपरवञ्चितानामधोगतिर्नियता । एवं शास्त्रदृष्टीनां श्रद्दधानानां नित्यकाम्यानुष्ठानेन इहपरसुखप्राप्तिरपि नियमेन भवित्रीति शास्त्रदृष्टेरुत्कृष्टत्त्वं ज्ञातव्यमिति । आसुरसंपद्भाजां फलाच्चात्यन्ताधम गतेः, पुण्यकृतां फलाच्च स्वर्गपर्यन्तगतेर्विलक्षणं, ब्रह्मभूयलक्षणं, निःश्रेयसलक्षणं, संसारस्यात्यन्तिकोपरमलक्षणं परमपुरुषार्थः इति सिद्धान्तः ।।

संगत्यागफलत्यागरूपः कर्मसंन्यासः गौणसंन्यासः । विविदिषुणा क्रियमाणः विधिवत् तुरीयाश्रमप्रवेशरूपः कर्मणां संन्यासः मुख्यः । ज्ञाननिष्ठस्य स्वभावसिद्धः परमार्थसंन्यासः इति विवेक्तव्यः । सङ्गत्याग फलत्यागपूर्वकं कर्मणामनुष्ठानः कर्मयोगः । तदर्थं सर्वत्रापि ईश्वरार्पणबुध्या कर्म कर्तव्यम् ।।

भगवतः कृत्स्नस्य रूपस्य भावनया तत्त्वचिन्तायां योग्यतां संपा दयेत्। ततः अशेषजगद्रूपेणैव भगवतोंशः अवभासत इति तेन ध्येयम्। सिद्धिं गताः मुमुक्षवः सोपाधिकं निरुपाधिकं वा ब्रह्म उपासीरन्। ततः सम्यग्ज्ञानप्राप्तिद्वारा क्रमेण संसारान्मुच्येरन्, ज्ञाननिष्ठामार्गप्राप्तिद्वारा वा सद्यो वा मुच्येरन् । कर्मयोगेन सिद्धिं गतो ध्यानयोगमभ्यस्य स्वात्मानमेवाद्वयब्रह्मरूपेण पश्यन्निहैव मुक्तमात्मानं पश्यन् कृतकृत्यो भवति ।।

गीताशास्त्रोपदिष्टानां सर्वेषां सोपानानां साङ्ख्ययोगम् अन्तिमं सोपानम्। साङ्ख्ययोगे अनुभवप्रधानदृष्ट्यानात्मानः आगमापायिनः इति

I consider it a great opportunity and a blessing that I have been asked to write a Preface in English, to the Sanskrit book 'Gītāśāstropadeśasopānapanktih' written by Sri Satcidānandendra Saraswati Swāmiji. This is a unique book on Bhagavadgītā, the like of which is unlikely to have been written by any other author in any language. Although the book was written as far back as 1970, it is unfortunate that a highly significant book as this one did not find the light of the day until 45 years later. However it is available in print for the jijñāsus now, and that is a great blessing for which they profusely thank the Adhyatma Prakasha Karyalaya and also the saints and scholars of Mattur village.

Sri Swamiji was an authority on advaita Vedanta during the twentieth century. He has translated Bhāshyas of Sri Shankarācārya on prasthānatraya including Bhgavadgītā into Kannada. A collection of his lectures on Bhagavadgītā in two volumes, a book named Bhagavadgītārtha sarvasva, both in Kannada, and a Sanskrit book Gītāśātrārthavivekah also have been published by the Karyalaya. In the last named Sanskrit book Sri Swamiji has analyzed and determined the proper meaning of various technical terms (padārthaviveka) and the teachings of the Gītā (sāstropadeśaviveka).

The need for writing the present book arose in the mind of Sri Swamiji for the reason that in his observation (as it is of others also), even those who are well versed in Sanskrit language and have faith in the Gītā, are deeply confused over the exact teachings of the Gītā. They grasp the teachings in different ways, thanks to the availability of a variety of interpreta-

tions in different bhāshyas and other commentaries. For such persons and also for the sake of modern people who may lack independent thinking and are based in different disciplines of knowledge, but who are interested in learning the teachings of Gītā, Sri Swamiji has provided an order (krama) in which they may start studying Gītā. This krama for the study of Gītā is sure to help them get a proper perspective about all of its teachings, their easy and correct assimilation and also help them to engage themselves in appropriate spiritual practices.

In the beginning, the book presents the division of people into those having divine qualities (daivee sampat), whose minds are refined with predominance of sattva guṇa, and those having demonic qualities, whose minds are not clean enough due to more of rajo and tamo guṇas. The second kind of people with āsuree sampat are found to be more in number in the world than those blessed with daivee sampat. The detailed presentation here based on several chapters of Gītā including the 16th, helps one to determine one's own inclinations and shortcomings, and look for remedial measures.

While people with daivee sampat may tread the path of liberation, those with āsuree sampat have to first inculcate faith in the scriptures and start performing the karmas prescribed in the śāstras. Although people in the world can, individually or collectively, formulate their own duties and follow them, that may not turn out to be for their own ultimate good. This is because the happenings in the world and the fruits of deeds performed by people are steeped in the mystery of the 'unseen', and cannot be determined *a priori*. Bhagavān has ordained in the Gītā (16.23,24), that śāstra is the authority to determine what ought to be done and what ought not to be

done by people (tasmāt śāstram pramāṇam te karyākāryavyavasthitau).

The book presents the aspect of faith in the śāstras, the three fold faith (shraddhātraya) and the fruits of actions performed according to śāstras, next. Those who do not follow the path laid out in the śāstras will fall into the lower worlds, while those who follow, achieve the purushārthas characterized by dharma, artha and kāma. However all of these happen within the cycles of samsāra.

Liberation, moksha or parama purushārtha, which is the highest aim of the human pursuit and which takes them out of the cycles of samsāra permanently, is open to all those who are endowed with or who achieve daivee sampat. Gītā speaks of Parabrahman with the name Vāsudeva, also called by the names Parameśwara, Īśhwara, Purushottama, etc. Attainment of steadfast knowledge intuitively that It is the highest principle without a second, and his own identity with That, is what is termed as moksha, brahmabhāva, brāhmīsthiti, brahmanirvāṇa, amṛtatva, shānti, siddhi and so on in the Gītā. Some of these terms are used in the sense of videha mukti, liberation after the fall of the body, and others in the sense of jīvanmukti, liberation when one is living. These aspects are made clear in the book in subsequent chapters.

Sri Swamiji points out that those who desire liberation must renounce their karmas and proceed on the path to attain the right knowledge (samyak jñāna), which is the means of liberation. The subtleties of karma sannyāsa and karmayoga are presented at length, next. Karmayoga, which is sannyāsa in a secondary sense (gauṇa sannyāsa), is the performance of rites and duties with detachment, after destroying the pairs of

opposites, for the sake of adoring Īśwara.

The ultimate teaching of the Gītā is the attainment of right knowledge, samyak jñāna, that 'all this is Vāsudeva' (Vāsudevah sarvamiti). However, every one may not be fit enough directly for this 'Sānkhya yoga', which is characterized by 'jñānanishṭhā' (abiding in right knowledge). Therefore meditation on the divine manifestations, Vibhūtiyoga, and meditation on the Universal form of Īśwara, Viśvarūpopāsana, both of which are meditations on Brahman with conditioning factors (sopādhika Brahmopāsana), are the steps that a karmayogi may proceed to perform. Absorption into the divine essence (sāyujya), by the grace of Īśwara, after the fall of the body, is the fruit of these upāsanās.

Aksharabrahmopāsanā is meditation on Brahman without conditioning factors (nirupādhika Brahmopāsanā) performed by the ascetics who have their minds cleansed by karmayoga, and who have overcome all attachments. These upāsakas will follow the path of gods, devayāna, after death, to reach Brahmaloka. There, on attaining samyak jñāna, they will be liberated from the cycles of samsāra (**kramamukti**).

In sharp contrast with the upāsanās, dhyānayoga and sānkhyayoga taught in the Gītā may be followed by a qualified seeker for attaining right perception and abiding in the right knowledge while living (samyagdarśana and jñānanishṭhā). This is called **jīvanmukti or sadyomukti**.

Dhyānayoga requires an inward turned mind (pratyak pravaṇatā) which is kept fully devoted to the Self, by deep concentration (praṇidhānapūrvaka). Sri Swamiji identifies dhyānayoga with adhyātmayoga described in the Kaṭhopanishad (1-3-13). Elsewhere he has stated that manonigraha

mentioned in the advaita prakaraṇa of Gauḍāpada Kārikas and also nididhyāsana are different names for dhyānayoga. Sānkhyayoga is discrimination of the seer and the seen (drig drishyaviveka) using reasoning based on universal experience as recommended in the śrutis. Several variations of Sānkhyayoga methodology (prakriyābheda) are found to be dealt in the Gītā.

Sri Swamiji has explained all the teachings of Gītā in different chapters of this book. He has used mostly the words of Bhagavān and the bhāshya vakyas in the entire book, but has collected the relevant ones in each chapter and has described the teachings in a particular order of study. The reader will find this method of rendering the teachings very rewarding, not only for clearly and correctly understanding the teachings but also to determine the step by step manner in which he can proceed with his sādhana, ascending the steps on the path towards liberation.

Sri Swamiji has concluded that the Gitaśāstra may be aptly called Bhaktiśāstra for the reason that it is the performance of karmas for the sake of adoring Īśwara, with the fruits offered to Him, in the Karmayoga; it is upāsanā of the divine glory of Īśwara in vibhūtiyoga and of His universal form in viśwarūpopāsana; it is with the mind engrossed with Īśwara that aksharabrahmopāsakas leave their bodies to reach brahmaloka.

Even in Dhyānayoga and Sānkhyayoga it is bhakti only that is termed jñānanisṭhā. For example, the bhāshya for śloka 18-55 may be seen: tayā parayā bhaktyā bhagavantam tattvatah abhijānāti- through that highest devotion one realizes the Lord in truth; atah jñānanisṭhālakshaṇayā bhaktyā mām

abhijānāti iti vacanam na virudhyate- therefore the statement 'one knows Me through devotion in the form of steadfast knowledge' is not contradictory. Again in the bhasya for 18-66: mām ekam sarvātmānam...'ahameva' ityevam sharaṇam vraja. na mattonyadasti ityavadhāraya- in me alone, the self of all, .... take refuge by realising that 'I am Him (That)'. That is, know it for certain that there is nothing besides Me. Surely this is the divine declaration of the upanishadic statement 'tattvamasi, That Thou are'. While bhakti during the sādhana phase, which thrives in duality, may be termed gauṇa bhakti, this is parā bhakti which is nothing but Jñānaniṣṭhā, and is non-dual.

I conclude this Preface by invoking the blessings of Sri Swamiji, Sri Shankarācārya and Bhagawān Krishṇa on all the earnest jigñāsus. May they have '**sukhapravesha**' for the teachings of Gītā and into the realm of sādhana by reading this wonderful treatise Gītāśāstropadeśasopānapanktih.

Always remembering the lotus feet of Sri Shankara and Sri Swamiji,

16-08-2015 **Dr. K.S. Ramanatha Sharma**
Bengaluru Retired Principal and Professor

# विषयानुक्रमणिका


| सोपानम् | विषयः | खण्डसङ्ख्या | पत्रपार्श्वसङ्ख्या |
|---|---|---|---|
| १. | प्रकरणारम्भप्रतिज्ञा | १–२ | 1-2 |
| २. | भारतदेशदुरवस्थावर्णनम् | ३–५ | 2-6 |
| ३. | दैवासुरसंपद्विभागः | ६–१३ | 6-16 |
| ४. | श्रद्धात्रयविभागः | १४–१८ | 16-20 |
| ५. | शास्त्रीयकर्मफलवर्णनम् | १९–२५ | 21-26 |
| ६. | परमपुरुषार्थस्वरूपवर्णनम् | २६–३१ | 26-35 |
| ७. | कर्मसंन्यासविभागोपदेशः | ३२–३६ | 36-41 |
| ८. | कर्मयोगोपदेशः | ३७–४० | 41-46 |
| ९. | विभूतियोगोपदेशः | ४१–४९ | 47-52 |
| १०. | विश्वरूपोपासनोपदेशः | ५०–५१ | 52-54 |
| ११. | अक्षरब्रह्मोपासनोपदेशः | ५२–६० | 54-62 |
| १२. | ध्यानयोगोपदेशः | ६१–६९ | 63-70 |
| १३. | साङ्ख्ययोगोपदेशः | ७०–८१ | 71-80 |
| १४. | साङ्ख्ययोगसंबन्धोपदेशः | ८२–८८ | 81-86 |
| १५. | ज्ञानयज्ञोपदेशः | ८९–९६ | 86-92 |
| १६. | परमार्थसंन्यासोपदेशः | ९७–१०५ | 93-99 |
| १७. | निस्त्रैगुण्यभावोपदेशः | १०६–११३ | 99-107 |
| १८. | भगवत्स्वरूपसतत्त्वोपदेशः | ११४–१२२ | 108-116 |
| १९. | जीवसतत्त्वोपदेशः | १२३–१२९ | 117-123 |
| २०. | स्थितप्रज्ञलक्षणोपदेशः | १३०–१३२ | 124-127 |
| २१. | युक्तलक्षणोपदेशः | १३३–१३७ | 128-129 |
| २२. | भक्तलक्षणोपदेशः | १३८–१४३ | 130-132 |
| २३. | ज्ञानिलक्षणोपदेशः | १४४–१४८ | 132-135 |
| २४. | गुणातीतलक्षणोपदेशः | १४९–१५० | 136-137 |
| २५. | ज्ञाननिष्ठोपदेशः | १५१–१५६ | 138-141 |
| २६. | शास्त्रोपदेशसारः | १५७–१६५ | 142-150 |

# परिशिष्टम्


| | | | |
|---|---|---|---|
| १. | परमपुरुषार्थवाक्यानि | १६६–१७२ | 151-161 |
| २. | अज्ञाननिन्दावाक्यानि | १७३ – | 162-164 |
| ३. | ज्ञानप्रशंसावाक्यानि | १७४–१८२ | 165-171 |
| ४. | ज्ञानसाधनोपदेशवाक्यानि | १८३–१८७ | 172-178 |
| ५. | कर्मकर्तव्यप्रशंसावाक्यानि | १८८–१९२ | 179-182 |
| ६. | ध्यानयोगोपदेशवाक्यसंग्रहः | १९३–१९८ | 183-186 |
| ७. | गुणत्रयपरामर्शकवाक्यसंग्रहः | १९९–२०५ | 187-191 |
| ८. | भगवत्तत्त्वपरामर्शकवाक्यसंग्रहः | २०६–२०९ | 191-203 |
| ९. | भक्तिपरामर्शकवाक्यसंग्रहः | २१०–२१५ | 204-210 |
| | अनुबन्धः–१ | | 211-251 |
| | अनुबन्धः –२ | | 252-261 |

# सङ्केताक्षरविवरणम्

| **सङ्केतः** | **विवरणम्** |
|---|---|
| **ऋ.** | ऋग्वेदे |
| **क.** | कठोपनिषत् |
| **के.** | केनोपनिषत् |
| **गी.भा.** | भगवद्गीता शाङ्करभाष्ये |
| **गौ.ध.सू** | गौतमधर्मसूत्रे |
| **गौ.का.** | गौडपादीयकारिकायां |
| **छां.** | छान्दोग्योपनिषत् |
| **तै.ना.** | तैत्तिरीयमहानारायणोपनिषत् |
| **तै.** | तैत्तिरीयोपनिषत् |
| **नै.सि.** | नैष्कर्म्यसिद्धौ |
| **प्र.** | प्रश्नोपनिषद् |
| **प्र.भा.** | प्रश्नोपनिषद्भाष्ये |
| **बृ.** | बृहदारण्यकोपनिषत् |
| **बृ.भा.** | बृहदारण्यकोपनिषद्भाष्ये |
| **यास्क.नि.** | यास्कमुनिप्रणीतनिरुक्ते |
| **वि.पु.** | विष्णुपुराणे |
| **श.ब्रा.** | शतपथब्राह्मणे |
| **श्वे.** | श्वेताश्वतरोपनिषत् |
| **सू.भा.** | ब्रह्मसूत्रशाङ्करभाष्ये |
| **हितो.** | हितोपदेशे |

# गीताशास्त्रोपदेशसोपानपङ्क्तिः

## १. प्रकरणारम्भप्रतिज्ञा

**ओं नमो भगवते वासुदेवाय। ओं नमो गीताभिमानिदेवतायै ।।**

१. यद्यपि गीताशास्त्रस्य समस्तवेदार्थसारसङ्ग्रहभूतत्वं सर्वसंप्रतिपन्नम्, तस्य च श्रीशङ्करभगवत्पादीयभाष्यानुसारेणार्थविवेचनं कृतमेवास्माभिः **गीताशास्त्रार्थविवेके**[१], तथापि तत्र श्रद्दधानानां सांप्रदायिकबोधने बद्धादराणाम् उपकाराय पदार्थविवेकः, शास्त्रोपदेशविवेकश्चेति द्वेधा गीतार्थं विभज्य विवेचनमेव कृतम्, न तु गीताशास्त्रोपदेशः केन क्रमेणैदंयुगीनैरल्पवीर्यैरधिकारिभिरनुष्ठानाय स्वीकर्तव्य इत्यपि प्रदर्शितम् । न च शास्त्रे निवेशितोपदेशितक्रमेणैवानुष्ठातव्यमिति भगवता विवक्षितम्, आचार्यपूज्यपादानामिष्टं वा इति सुव्यक्तमेतद्गीतार्थज्ञानाम् । तस्मात् इदानीन्तनानां गीतार्थविचारणे सकुतूहलादराणाम् अस्वतन्त्रप्रज्ञानां विविधमतिभूमिकानामुपकृतयेऽपि यथा गीतोपदेशे सुखप्रवेशः स्यात् तथात्र प्रयत्यते ।।

२. औपायिकश्चेदानीमीदृशः प्रयत्नः, यतो गीर्वाणवाणी परिचयवन्तोऽपि जिज्ञासवो विविधगीताव्याख्यानैर्भाषणकारैश्च व्यामोहितधियस्तर्कावष्टम्भेन गीतार्थमन्यथाऽन्यथा गृह्णन्तो ग्राहयन्तश्च परान्, तावतैव कृतार्थमात्मानं मन्यन्ते, न तु भगवदुपदेशमिदानीमप्यनुष्ठानेन

१. अध्यात्मप्रकाशकार्यालयेन प्रकाशिते

परमपुरुषार्थसाधनत्वेन समासादयितुं सुशकमिति श्रद्दधते। तदेवं कान्दिशीकतां गतानां श्रद्धालूनां कृते गीतोपदेशः केन क्रमेणानुष्ठानक्षेत्रे प्रवेशयितुं शक्य इत्येतत् प्रदर्शनायायं यत्नः करिष्यते। तत्रायं प्रयत्नः कियत्फलदायक इत्यत्र तु साधकाः पाठका एव प्रमाणं भवितुमर्हन्ति॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन**
**भिक्षुणा प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'प्रकरणारम्भप्रतिज्ञा' नाम**
**प्रथमं सोपानम्**

# २. भारतदेशदुरवस्थावर्णनम्

३. आसेतुहिमाचलं प्रसृतस्य भारतवर्षस्य महिमा इतिहासपुराणेषु तत्तादृशं वर्णितः–

अत्रापि भारतं श्रेष्ठं जम्बूद्वीपे महामुने ।
यतो हि कर्मभूरेषा ह्यतोऽन्या भोगभूमयः ॥

अत्र जन्मसहस्राणां सहस्रैरपि सत्तम ।
कदाचिल्लभते जन्तुर्मानुष्यं पुण्यसञ्चयात् ॥

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमिभागे ।

स्वर्गापवर्गास्पदमार्गभूते ।[२]
भवन्ति भूयः पुरुषाः सुरत्वात् ।।

कर्माण्यसङ्कल्पिततत्फलानि
संन्यस्य विष्णौ परमात्मभूते ।
अवाप्य तां कर्ममहीमनन्ते
तस्मिँल्लयं ये त्वमलाः प्रयान्ति ।।

जानीम नैतत् क्व कथं[३] विलीने
स्वर्गप्रदे कर्मणि देहबन्धम्।
प्राप्स्याम धन्याः खलु ते मनुष्या
ये भारते नेन्द्रियविप्रहीनाः ।।

वि.पु.२-३-२२प्रभृति २६ पर्यन्तम्।।

'एतद्देशप्रसूतादेव द्विजन्मनः सकाशादेव धर्मतत्त्वं शिक्षेरन्नन्यदेशीयाः' इति मन्वादिधर्मशास्त्रकाराणां[४] प्रशंसां प्राप्तस्येदानीं क्वचिदेव केषांचिदेव कर्णपथे कदाचिदायान्तीति शोचनीया दुरवस्थाऽस्य देशस्य संप्रतितनी। एतत्त्वत्र कारणं भगवदुपदिष्टस्य सम्यग्दर्शनलक्षणस्य सयोगोपायस्य कालमहिम्ना अनुष्ठातॄणां कामोद्भवाद् विच्छिन्नसंप्रदायस्य विनाश एव। **यथोक्तं भगवता–**

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।।४-१।।

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ।।४-२।।

---

२. 'स्वर्गापवर्गास्पदभागभूते' इत्याकरग्रन्थे पाठः ।
३. 'वयं' इत्याकरग्रन्थे पाठः ।
४. एतद्देशप्रसूतस्य सकाशादग्रजन्मनः ।
स्वं स्वं चरित्रं शिक्षेरन्पृथिव्यां सर्वमानवाः ।। इति मनुस्मृतिः (२-२०)

[अत्र राजर्षिवंशकथनं तु ब्राह्मणानामनुष्ठानेन क्षत्रियाणां च भूमिपानां धर्मसेतुपरिपालनेन योगसंप्रदायसंततिः कर्तव्येति । यथोक्तं भगवत्पादैः -''**प्रोक्तवान् अहं जगत्परिपालयितॄणां क्षत्रियाणां बलाधानाय । तेन योगबलेन युक्ताः समर्थाः भवन्ति ब्रह्म परिरक्षितुम् । ब्रह्मक्षत्रे परिपालिते जगत्परिपालयितुमलम्**'' (गी.भा. ४-१) इति ।।]

४. कलिकलुषवशादजितेन्द्रियान् ब्राह्मणक्षत्रियान् प्राप्य विनष्टे योगे दुर्बलोऽयं देशः कामरागबलान्वितविदेशीयजनाक्रमणविनिवारणेऽसमर्थो भूत्वा परराष्ट्रीयदास्यशृङ्खलाबद्धो वर्णसंकरमनुभूय परानुकृतिपरायणो धर्माधर्मविवेकपरिभ्रष्टश्च क्रमेण तामसबुद्धिपरीतो विपरीतग्राहग्रस्तो बभूव। वर्णिता ह्येवं तामसीबुद्धि**र्गीतासु**-

अधर्मं धर्ममिति या मन्यते तमसावृता ।
सर्वार्थान् विपरीतांश्च बुद्धिः सा पार्थ तामसी ।।१८-३२।।

- इति ।।

भौतिकशिल्पशास्त्रविज्ञाने परिणतबुद्धयः पाश्चात्याः पौरस्त्याश्च जना इदानीं देहात्मबुद्धिं बहुकृत्य कामभोगार्थं भूगर्भशोधन-समुद्रतलस्पर्शवायुमण्डलवशीकरण-तेजोविशेषसंशोधन-बाह्याकाश-परीक्षणैर्विचितस्थूलमहाभूताः बाष्पयानश्रेणिकातैलशकटजलान्तर्बहिश्चर नौकाविशेषवायुविमानाकाशस्फुटनीकादिविविधयानवाहननिर्माणेन साक्षदर्शनिकदूरध्वनिदूरदर्शनादिसाधननानाविधयन्त्रसौरव्यूह-गतचन्द्राङ्गारकादिग्रहसंरोधपर्यन्तयानादिकसाहसकर्मप्रधाना गीतासमनु वर्णितासुरसंपदा दृप्ताः भौतविद्याविधाभेदेषु तत्तादृशपरिश्रमविकलान् देशविशेषान् विविधोपायैः स्वायत्तीकरणे संनद्धाः परस्परसंस्पर्धया पुराणवर्णितत्रिपुरासुरानुकारेण भूमण्डले सर्वत्र प्रदर्शितप्रागल्भ्येनाज्ञान्

जनान् व्यामोहयन्तो दरीदृश्यन्त इत्यतस्तानेव भौतिकविज्ञानविशारदान् नागरिकतासंवदने आचार्यस्थाने अभिषिच्य भारतीया अपि दैवसंपद्बहिष्कारेणासुरीमेव प्रकृतिं समाद्रियमाणा दरीदृश्यन्ते ।।

५. यद्यपि गीताशास्त्रपठनपाठनरीतिरद्याप्यनुस्रियत एव भारतवर्षनिवासिभिः, तथापि शास्त्रोक्तसाधनानुष्ठाने न कोऽप्यादरं बध्नाति भगवद्विमुखत्वादासुरसंपद्भावभावितचेतस्त्वाच्च शास्त्रविदुषामपि; उक्तं हि **भगवतैव–**

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ।।७-१५।।

– इति ।।

यद्यपि भगवान् लोकानुग्रहार्थं भौमस्य ब्रह्मणो वेदलक्षणस्य ब्राह्मणत्वस्य च भगवत्परायणतालक्षणस्य रक्षणार्थमेव कृष्णरूपेणात्ममायया संबभूव, उपदिदेश च पार्थमधिकारिणं निमित्तीकृत्य च भगवन्निष्ठालक्षणं धर्मम्। तथापि श्रीकृष्णमपि मानुषमात्रं कृत्वा अवज्ञाय धर्मातिक्रमणपातकान्न बिभ्यति बहवोऽद्यतनाः। गीताशास्त्रं भगवदुक्तमेव देहात्मवादपरत्वेन कथञ्चिन्नयन्तोऽपि न जिहृति पण्डितंमन्याः प्रवक्तारः। 'न धर्मशास्त्रं पठतीति कारणम्'[५] (हितो. १-१७) इति हि सुभाषितमपि दैवसंदूषिताशयानामसुराणां विषये जागर्त्येव । **भगवतैवोक्तं** च -

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ।।९-११।।

---

५. 'न धर्मशास्त्रं पठतीति कारणं न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते यथा प्रकृत्या मधुरं गवां पयः ।।'- इति पूर्णश्लोकः।
दुष्टात्मानः धर्मशास्त्रं पठितवन्त इति हेतोः केवलात्, तेषां धर्मानुष्ठाने प्रवृत्तिर्न भवेत्, दुष्टस्वभावस्य प्राबल्यादित्यर्थः ।

मोघाशा मोघकर्माणो मोघज्ञाना विचेतसः ।
राक्षसीमासुरीं चैव प्रकृतिं मोहिनीं श्रिताः ।।९-१२।।

- इति ।।

तदीदृशे व्यतिकरे गीताशास्त्रोपदेशक्रमो यथादृतो भगवता वेद-व्यासेन स न सर्वानुपकरोति मन्दप्रज्ञान् इदानीन्तनानिति विपरिणामितक्रमेण स एव गीताशास्त्रार्थः संप्रतितनाधिकारिविशेषमालक्ष्य विनिर्दिश्यते यथा सुखारोहणं स्यात् गीतासोपानं समेषामिति क्षन्तव्यमिदं धाष्ट्र्यं स्वतन्त्रप्रज्ञैः स्वयं करतलामलकितगीतार्थसर्वस्वैः अन्यैश्च जिज्ञासुभिः यथाक्रमपाठतदर्थनिर्धारणपटुभिः ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'भारतदेशदुरवस्थावर्णनम्' नाम**
**द्वितीयं सोपानम्**

# ३. दैवासुरसंपद्विभागः

६. लोकेऽस्मिन् जायमाना मनुष्या द्विप्रकाराः - दैवसंपद्युक्ता आसुरसंपद्युक्ताश्चेति । तेष्वासुरसंपद्युक्तजनभूयिष्ठैवेयं पृथिवी । यथाऽऽह भगवान् -

द्वौ भूतसर्गौ लोकेऽस्मिन्दैव आसुर एव च ।।१६-६।।

-इति ।।

[यद्यपि सर्वेष्वपि भूतेषु दैवीसंपदासुरी च यथायोगं प्रकटीकृता दृश्यत एवेति भूतसर्गौ इति यथाश्रुतमप्युपपन्नमेव, तथापि

मनुष्याणां परत्वात् विधिनिषेधलक्षणस्य शास्त्रस्य, मनुष्याणामेवेयं परामर्शिका ''भूतसर्गौ'' इति वाचोयुक्तिरिति मन्तव्यम्। व्याख्यातं हि **भाष्यकृता** – ''**भूतानां मनुष्याणां सर्गौ सृष्टी भूतसर्गौ सृज्येते इति सर्गौ। भूतान्येव सृज्यमानानि दैवासुरसंपद्द्वययुक्तानि द्वौ भूतसर्गौ इत्युच्येते**'' (गी.भा. १६-६) इति।]

श्रुतिश्चात्र भवति ''**द्वया ह प्राजापत्याः, देवाश्चासुराश्च । ततः कानीयसा एव देवाः, ज्यायसा असुराः, त एषु लोकेष्वस्पर्धन्त**''(बृ. १-३-१) इति। तत्रासुरसंपद्युक्ता मानवा एव बहुसंख्याका लोके इत्यतो ज्यायांसोऽसुराः । अल्पसंख्याकास्तु देवा इति कनीयांसस्ते ॥

७. तत्र बन्धमोक्षसाधनविभागज्ञानार्थः प्रदर्श्यमानोऽयं दैवाऽसुर संपद्विभागः कापिलशास्त्रोपज्ञगुणत्रयविभागमेवानुसृत्य प्रदर्श्यते भगवता – ''परमतमप्रतिषिद्धमनुमतं भवति'' इति तन्त्रयुक्तिमनुसरता। व्याख्यातं हि **भगवत्पादै**र्यथैतत् तथा –

ज्ञानं कर्म च कर्ता च त्रिधैव गुणभेदतः ।
प्रोच्यते गुणसङ्ख्याने यथावच्छृणु तान्यपि ॥१८-१९॥

इत्यत्र ''**गुणसंख्याने – कापिले शास्त्रे, तदपि गुणसंख्यानं शास्त्रं गुणभोक्तृविषये प्रमाणमेव । परमार्थब्रह्मैकत्वविषये यद्यपि विरुद्ध्यते, तथापि ते हि कापिला गुणगौणव्यापारनिरूपणे अभियुक्ता इति तच्छास्त्रमपि वक्ष्यमाणस्तुत्यर्थत्वेन उपादीयत इति न विरोधः**''(गी.भा. १८-१९) इति ॥

८. बन्धमोक्षतद्धेतुप्रदर्शनार्थं दैवासुरसंपद्विभागदर्शनमित्युक्तम्। तत्र प्रकृतिपुरुषविवेकाभावेन तयोः क्षेत्रक्षेत्रज्ञापराभिधानयोः संयोगादेव स्थावरजङ्गमलक्षणप्राणिजन्म, तद्विवेकेन तु जन्माभाव इति शास्त्रोपदेशसारः। यथोक्तं **गीतासु** –

कार्यकरणकर्तृत्वे हेतुः प्रकृतिरुच्यते ।
पुरुषः सुखदुःखानां भोक्तृत्वे हेतुरुच्यते ।।१३-२०।।

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान् गुणान् ।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ।।१३-२१।।

प्रकृतिः- कार्यकरणरूपेण परिणमत इति कार्यकरणोत्पत्ति-हेतुः प्रकृतिः; पुरुषः जीवक्षेत्रज्ञापरसंज्ञः सुखदुःखभोक्ता भवति प्रकृतिपरिणामभूतसुखदुःखोपलब्धा । तत्र प्रकृतिस्थत्वं प्रकृतितादा-त्म्यगमनमेव हेतुः तस्य भोक्तृत्वे न स्वतः । '**आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः**' (का. १-३-४) इति श्रुतेः । तदेवं प्रकृतिपु-रुषस्वरूपकृत्स्नविवेकाभावादेव, मिथ्यारूपात् तयोः परस्परसंबन्धात् सदसदादिजन्मप्राप्तिलक्षणो बन्ध इत्यर्थः। एतदेव संगृह्णाति **भगवान्** -

यावत् सञ्जायते किञ्चित् सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ।।१३-२६।।

-इति ।।

९. तदेवं प्रकृतिपुरुषयोरविवेककृतात् संयोगात् संसारबन्धः, विवेकेन तद्वियोगात् मोक्ष इति स्थितम् । तदेतद् विविच्य प्रदर्शनाय गीतासु चतुर्दशोऽध्यायः प्रारब्धः । तथा **चाध्यायावतरणिकाभाष्यम्** -

''**सर्वमुत्पद्यमानं क्षेत्रक्षेत्रज्ञसंयोगात् उत्पद्यत इत्युक्तम् । तत्कथमिति तत्प्रदर्शनार्थं 'परं भूयः' इत्यादिरध्याय आरभ्यते । अथवा ईश्वरपरतन्त्रयोः क्षेत्रक्षेत्रज्ञयोः जगत्कारणत्वं न तु सांख्यानामिव स्वतन्त्रयोरित्येवमर्थम्। प्रकृतिस्थत्वं गुणेषु च सङ्गः संसारकारणमित्युक्तम् । कस्मिन् गुणे कथं सङ्गः ? के वा गुणाः ? कथं वा ते बध्नन्तीति ? गुणेभ्यश्च मोक्षणं कथं स्यात् ? मुक्तस्य च लक्षणं वक्तव्यम् इत्येवमर्थं च भगवानुवाच ।।**'' (गी.भा.१४-अवतरणिका) - इति ।।

१०. तत्र शुद्धसात्त्विकधर्मसंस्कृतचित्ता दैवसंपदमभिजाताः, राजसतामसतत्संपृक्तमलिनसत्त्वगुणप्रधानसंस्कारयुक्तचित्ता आसुरसंपदमभिजाताः । दैवसंपदेव मोक्षहेतुः, आसुरसंपत्तु बन्धहेतुः । **यथोक्तम्** -

दैवी सम्पद् विमोक्षाय निबन्धायासुरी मता ।
मा शुचः सम्पदं दैवीमभिजातोऽसि पाण्डव ।।१६-५।।

इति ।।

गुणत्रयकृतो बन्धस्तूदाहरिष्यमाणश्लोकैरवगम्यः-

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।१४-५।।

तत्र सत्त्वं निर्मलत्वात् प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ ।।१४-६।।

[अत्र ज्ञानसुखे मलिनसत्त्वजन्ये विषयविषये । ताभ्यां सत्त्वं देहिनं बध्नातीति ह्युक्तम् ।]

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।।१४-७।।

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ।।१४-८।।

११. तत्र यद्यपि-

''त्रयाः प्राजापत्याः प्रजापतौ पितरि ब्रह्मचर्यमूषुर्देवा मनुष्या असुराः'' (बृ. ५-२-१) इति देवान् असुरांश्च मनुष्येभ्यो विविच्याख्यायिका

प्रवृत्ता[६] दृश्यते, तथापि दैवासुरसंपद्विभागोऽयं मनुष्यान्प्रत्येवोच्यते भगवता । श्रुतावपि मनुष्या एव द्विधैव विभक्ता इति **भाष्यकारैरुक्तम्** –

**''अथवा न देवा असुरा वान्ये केचन विद्यन्ते मनुष्येभ्यः। मनुष्याणामेव अदान्ता ये, अन्यैरुत्तमैर्गुणैः संपन्नाः ते देवाः; लोभप्रधाना मनुष्याः तथा हिंसापराः क्रूरा असुराः। त एव मनुष्याः अदान्तत्वादिदोषत्रयमपेक्ष्य देवादिशब्दभाजो भवन्ति, इतरांश्च गुणान् सत्त्वरजस्तमां–स्यपेक्ष्य।**''(बृ.भा. ५–२–३)

– इति ।।

१२. अथासुरी संपद् गीतासु प्रदर्शितात्र विभज्यते तत्तद्धर्मप्रतिपक्षभूतैः दैवसंपद्गुणैः साकं पट्टिकारूपेण बन्धमोक्षसाधनभूतधर्मसंस्तवार्थं जिज्ञासूनामुपकाराय । सर्वप्रथमम् इदं तावदवधेयं यत् सर्वमिदं जगत् स्थावरजङ्गमात्मकं त्रिगुणात्मकमेवेति । यदाह **भगवान्** –

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः।।१८–४०।।

–इति। तत्र तमोरजःप्रधाना मनुष्या आसुराः, सत्त्वप्रधानास्तु दैवसंपद्युक्ताः इति विवेकः ।।

अथ दैवासुरसंपद्भाजां वैलक्षण्यं **षोडशाध्यायोक्त**क्रमेणेत्थम्–

प्रवृत्तिं च निवृत्तिं च जना न विदुरासुराः ।
न शौचं नापि चाचारो न सत्यं तेषु विद्यते ।।१६–७।।

[यत्र साधने प्रवर्तितव्यं यस्माच्च निषिद्धकर्मणो निवर्तितव्यं तन्न विदुः।]

अर्थात् दैवसंपद्युक्ताः सर्वमेतद्विदुरिति सात्त्विकी हि तेषां बुद्धिः।

६. बृहदारण्यकोपनिषदि – ५–२–१ इत्यत्र

वक्ष्यति च -

प्रवृत्तिं च निवृत्तिं च कार्याकार्ये भयाभये ।
बन्धं मोक्षं च या वेत्ति बुद्धिः सा पार्थ सात्त्विकी ।।१८- ३० ।।

[अत्र कार्याकार्ये एव १६-७ तमश्लोकोक्तप्रवृत्तिनिवृत्तिपरामर्शके । प्रवृत्तिनिवृत्ती तु - प्रवृत्तिर्धर्मे, निवृत्तिः कर्मणः इति विवेक्तव्यम्, अन्यथा पुनरुक्तिः स्यादिति ।]

प्रवृत्तिनिवृत्तिविवेकज्ञानं शौचादिसंपत्तिश्च दैवसंपत्त्युचितम् इत्यर्थादुक्तं वेदितव्यम् ।।

असत्यमप्रतिष्ठं ते जगदाहुरनीश्वरम् ।
अपरस्परसम्भूतं किमन्यत् कामहैतुकम्।।१६-८ ।।

1. आसुराः- स्वयम् अनृतप्रायाः, सर्वानप्यनृतप्रायान् आहुः। दैवास्तु सत्यमेवातिष्ठन्ते, सत्यमेव जयते नानृतमिति[७] मतिमन्तः।

2. आसुराः जगतः प्रतिष्ठाकारणं नास्त्येवेति मन्यन्ते। दैवास्तु धर्म एव जगतः प्रतिष्ठाकारणम्, धर्मेण सद्गतिरधर्मेण च दुर्गतिरिति।

3. आसुराः जगच्छासनकर्तुरीश्वरस्यास्तितायां न श्रद्दधते । दैवास्तु ईश्वरास्तित्वाभिमानिनः, 'एतस्य वा अक्षरस्य प्रशासने गार्गि' (बृ.३-८-९) इत्यादिश्रुतेः ।

4. आसुरा कामहैतुकमेव जगत् स्त्रीपुरुषसंयोगजं मन्यन्ते। दैवास्तु धर्माधर्मनिमित्तकमिति ।

एतां दृष्टिमवष्टभ्य नष्टात्मानोऽल्पबुद्धयः ।
प्रभवन्त्युग्रकर्माणः क्षयाय जगतोऽहिताः ।।१६-९ ।।

---

७. मुं - ३-१-६

5. आसुराः अदूरदृष्टयः परिच्छिन्नविषयविषयकबुद्धयः, हिंसाप्रधानाश्च, पराहितकारिणश्च ।
दैवाः पुनः पुरुषार्थसाधनपराः, अहिंसादिव्रताः, सर्वभूतहिते रताश्च।

काममाश्रित्य दुष्पूरं दम्भमानमदान्विताः ।
मोहाद् गृहीत्वासद्ग्राहान् प्रवर्तन्तेऽशुचिव्रताः ।।१६–१०।।

6. आसुराः कामदम्भमानमदान्विताः।
दैवास्तु वैराग्यादम्भित्वामानित्वादिनाऽन्विताः ।

7. आसुराः असदाविष्टबुद्धयः, अशुचिकर्माणश्च।
दैवास्तु पुरुषार्थसाधनपराः चित्तशुद्धिकारकानुष्ठानप्रियाश्च।

चिन्तामपरिमेयां च प्रलयान्तामुपाश्रिताः ।
कामोपभोगपरमा एतावदिति निश्चिताः ।।१६–११।।

8. आसुराः स्वार्थमतयः, स्वयोगक्षेमपरवशा एव आमरणप्राप्ति।
दैवास्तु निर्योगक्षेमाः सद्विचारपराश्च ।

9. आसुराःकामोपभोगपराः ।
दैवास्तु रागद्वेषवियुक्तैरेवेन्द्रियैर्विषयानुपभुञ्जते ।।

आशापाशशतैर्बद्धाः कामक्रोधपरायणाः ।
ईहन्ते कामभोगार्थमन्यायेनार्थसञ्चयान् ।।१६–१२।।

10. आसुराः कामोपभोगैकचित्तत्वात् अधर्मेणाप्यर्थार्जनं कुर्वते।
दैवास्तु धर्मपरत्वात् यथाधर्मप्राप्तेनैव लाभेन संतुष्यन्ति ।

इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम् ।
इदमस्तीदमपि मे भविष्यति पुनर्धनम् ।।

असौ मया हतः शत्रुर्हनिष्ये चापरानपि ।
ईश्वरोऽहमहं भोगी सिद्धोऽहं बलवान्सुखी ।।

आढ्योऽभिजनवानस्मि कोऽन्योऽस्ति सदृशो मया ।
यक्ष्ये दास्यामि मोदिष्य इत्यज्ञानविमोहिताः ।।

अनेकचित्तविभ्रान्ता मोहजालसमावृताः ।
प्रसक्ताः कामभोगेषु पतन्ति नरकेऽशुचौ ।।

आत्मसम्भाविताः स्तब्धा धनमानमदान्विताः ।
यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ।।१६-१३ तः१७।।

अ) द्वादशश्लोकार्थस्यैव विस्तरोऽयम्। अस्तिप्राप्ति बुद्धिकृतौ कामक्रोधौ परहिंसादिनाप्यर्थसञ्चये प्रवृत्तिमातनुतः । ततः परवताजयकृतो हर्ष एवात्मसंभावन औद्धत्ये धनादिनिमित्तमदोत्पादने च हेतुर्भवति। एवं तामसराजसचित्तानां तत्त्वज्ञानमाच्छाद्य विपरीतबुद्धिविक्षेपे हेतुर्भवतीति न चित्रम् ।।

दैवसंपद्युक्तानां तु सात्त्विकमनोभावप्रचोदिता एतद्विपरीता प्रवृत्तिः। ते हि धर्माधर्मकृतमर्थसञ्चयमर्थानर्थहेतुं मन्वानाः लाभालाभौ जयाजयौ तत्तत्कर्मदृष्टफलमित्येव मन्यन्ते । विद्यया विनयेन च संपन्नाः-सात्त्विकज्ञानसुखलाभेन मोदन्ते । तथा हि दैवसंपद्वर्णने प्रोक्तम् -

अभयं सत्त्वसंशुद्धिर्ज्ञानयोगव्यवस्थितिः ।।१६-१ ।।

इत्यादि।।

आ) यदापि पूर्वपुण्यलेशात् शास्त्रीयकर्मसु प्रवृत्ताः तदाप्यासुराणामात्मसंभावनादिकृतैव प्रवृत्तिः, 'यक्ष्ये दास्यामि मोदिष्ये' इत्यादि

भावनादूषिता न तु धर्मादेवार्थश्च कामश्च इति दैवीचित्तभावनाविष्टा ।।

यजन्ते नामयज्ञैस्ते दम्भेनाविधिपूर्वकम् ।। १६-१७।।

11. इदमासुराणां यज्ञदानतपसामुपलक्षणम् । सर्वत्रात्मसंभावना पूर्विका दम्भेनैव प्रवृत्तिः, परस्योत्सादनार्था वा, तदप्यविधिपूर्विका, न तु दैवानामिव विधिवत् शास्त्रोक्तदक्षिणाद्यङ्गोपेता धर्मैकपरायणबुद्ध्या ईश्वरतुष्ट्यर्था वा ।।

अहंकारं बलं दर्पं कामं क्रोधं च संश्रिताः ।
मामात्मपरदेहेषु प्रद्विषन्तोऽभ्यसूयकाः ।।

तानहं द्विषतः क्रूरान् संसारेषु नराधमान् ।
क्षिपाम्यजस्रमशुभान् आसुरीष्वेव योनिषु ।।

आसुरीं योनिमापन्ना मूढा जन्मनि जन्मनि ।
मामप्राप्यैव कौन्तेय ततो यान्त्यधमां गतिम् ।।
१६-१८,१९,२० ।।

12. अत्रासुरसंपद्युक्तानां प्रवृत्तेः स्वभावः सर्व एव संगृहीतः । तेषामहम्मतिरविद्याख्या तामसादिदूषितं करोति चित्तम् । भगवच्छासनातिक्रमेण निषिद्धव्यापारेष्वेव प्रायशः प्रवर्तन्ते ते। तस्य च फलं पुनःपुनरासुरयोनिप्राप्तिः, साधुमार्गभ्रष्टा निकृष्टतमा स्थावरान्ताऽधोगतिश्चेति ।।

दैवसंपद्युक्तास्तु सात्त्विकयज्ञाद्यनुष्ठातारः भगवद्भक्ताः सर्वभूतहिते रताः परेण परेणोत्कृष्टतरां सात्त्विकयोनिं प्राप्ताः, अनेकजन्मकृत सत्कर्मसंसिद्धाः परमात्मतत्त्वज्ञानं प्राप्य विमुच्यन्ते । यथोक्तमन्यत्र -

बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।

वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।।७-१९।।

१३. किं बहुना स्वेच्छाप्रवृत्तिहेतुमासुरीं प्रकृतिं विजित्य प्रयत्नपूर्वकं दैवीप्रकृतिरभिव्यञ्जयितव्या श्रेयोऽर्थिभिः । शास्त्रोक्तानुष्ठाने चादरः कर्तव्यः- इत्येतदर्थमाह -

१) त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ।।

एतैर्विमुक्तः कौन्तेय तमोद्वारैस्त्रिभिर्नरः ।
आचरत्यात्मनः श्रेयस्ततो याति परां गतिम्।।१६-२१,२२।।

यदेवोक्तं प्राक् 'अहंकारं बलं दर्पम्' (१६-१८) इत्यादिना तदेवेह पुनः संक्षिप्योच्यते 'कामः क्रोधस्तथा लोभः' इत्येतत् त्रयं नरकस्य द्वारम्, तमोद्वारम्, अधमगतेर्मूलकारणम् । तस्मादेतत् त्रयं त्यजेदिति । तदेतत्त्रयमपि ह्यहंकाराख्याविद्याया एव कार्यम्; काम एव हि क्रोधादिरूपेण परिणमते तत्तद्धेतुविशेषापेक्षया । यथोक्तं -

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।३-३७।।

इति । तदेतत् प्रतिपक्षभावनया शास्त्रदृष्टिना पुरुषेण परित्याज्यं श्रेयोऽर्थिना। तथा चोक्तं श्रुत्यर्थवादेन - 'तदेतदेवैषा दैवी वागनुवदति स्तनयित्नुर्द द द इति दाम्यत दत्त दयध्वमिति । तदेतत् त्रयं शिक्षेद्दमं दानं दयामिति' (बृ. ५-२-३) इति । कामं दमेन, क्रोधं दयया, लोभं च दानेन नियम्य शास्त्रदृष्टिभिरेव भाव्यं श्रेयोऽर्थिभिः, न पुनस्तमोरजः-प्रधानप्रकृतिवशैरित्यर्थः ।

तदिहापि **भगवानाह** -

२) यः शास्त्रविधिमुत्सृज्य वर्तते कामकारतः ।
न स सिद्धिमवाप्नोति न सुखं न परां गतिम् ॥

तस्माच्छास्त्रं प्रमाणं ते कार्याकार्यव्यवस्थितौ ।
ज्ञात्वा शास्त्रविधानोक्तं कर्म कर्तुमिहार्हसि ॥१६-२३,२४॥

-इति ॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'दैवासुरसंपद्विभागो'नाम**
**तृतीयं सोपानम्**

# ४. श्रद्धात्रयविभागः

१४. आसुरसंपद्युक्ताः शास्त्रविधिमुत्सृज्य कामकारतो वर्तन्ते । ते इहपरोभयविभ्रष्टा अधमां गतिं यान्ति । दैवसंपद्युक्तास्तु शास्त्रप्रमाणकाः कार्याकार्यविवेचनेन निषिद्धपरित्यागपूर्वकं विहितं विधिवदनुष्ठाय श्रद्धाभक्तिसमन्विताः परमपुरुषार्थं प्राप्नुवन्ति इत्यधिगतम् । अथ येऽन्तरिता जनाः कामकारवृत्तिं परित्यज्यापि शास्त्रविधानमपश्यन्त एव श्रद्धान्विता यज्ञादिषु प्रवर्तन्ते तेषां का गतिः स्यात्? न हि सर्वथा शास्त्रं परित्यज्य यजतामासुराणामधोगतिं प्राप्नुयुस्ते, निषिद्धपरिवर्जनात्; नापि परब्रह्मप्राप्तिरेव तेषाम्, शास्त्रविहितविज्ञानपूर्वकं साधनाननुष्ठानात्। अतः तेषां का गतिः स्यादित्यर्जुनः पृच्छति द्वितीयभूमिकागतान् आस्तिका-नधिकृत्य -

ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः ।
तेषां निष्ठा तु का कृष्ण सत्त्वमाहो रजस्तमः ।।१७-१ ।।

इति ।।

१५. अत्र ये शुद्धसत्त्वप्रधानाः दैवसंपद्भाजो 'दैवी संपद्विमोक्षाय' इति दत्तोत्तरत्वात् तान् प्रति नैवायं प्रश्नः। अतः केवलश्रद्धान्वितानामनुष्ठानस्य किं फलं भवतीत्येष प्रश्नाभिप्रायः। तदनुरूपमेव च भगवानुत्तरमाह -

त्रिविधा भवति श्रद्धा देहिनां सा स्वभावजा ।
सात्त्विकी राजसी चैव तामसी चेति तां शृणु ।।

सत्त्वानुरूपा सर्वस्य श्रद्धा भवति भारत ।
श्रद्धामयोऽयं पुरुषो यो यच्छ्रद्धः स एव सः ।।१७-२, ३ ।।

इति ।।

[यो यच्छ्रद्धः- सात्त्विकश्रद्धो राजसश्रद्धस्तामसश्रद्धो वा स एव सः सात्त्विको राजसस्तामसो वा भवति, तदनुष्ठानप्रकारेणैव तस्य तत्तल्लोकप्राप्तिर्भवित्री इत्यर्थः।।]

अत्र सात्त्विकत्वं मलिनसत्त्वगुणाश्रयत्वमिति समनन्तरोक्तश्लोकेनैव स्फुटीभविष्यति ।।

यजन्ते सात्त्विका देवान् यक्षरक्षांसि राजसाः ।
प्रेतान् भूतगणांश्चान्ये यजन्ते तामसा जनाः ।।१७-४ ।।

तत्र सात्त्विका इन्द्राग्न्यादीन् देवान् यजन्ते, तदनुरूपमेवोर्ध्वगतिस्तेषाम्। राजसतामसाश्च यक्षान् राक्षसान् सप्तमातृकादींश्च स्वेष्टफलप्राप्तये अनिष्टवारणाय च यजन्ते । श्रद्धापि तेषां राजसी तामसी वा - इत्यतः तदनुरूपमेवानुष्ठानं तत्फलं च भवेदित्यभिप्रायः।।

१६. अत एव राजसतामसपरित्यागपूर्वकं सात्त्विकाहारविहारसात्त्विकयज्ञाद्यनुष्ठानमेव श्रेयस्कामैः सेव्यम् - इत्याशया भगवानाहारादिषु सात्त्विकादिविभागमाहाध्यायशेषेण । तत्र मन्दाधिकारिणां कृते सात्त्विका एवाऽऽहारादय इह परिगण्यन्ते -

आयुः सत्त्वबलारोग्यसुखप्रीतिविवर्धनाः ।
रस्याः स्निग्धाः स्थिरा हृद्या आहाराः सात्त्विकप्रियाः ।।१७-८।।

अफलाकाङ्क्षिभिर्यज्ञो विधिदृष्टो य इज्यते ।
यष्टव्यमेवेति मनः समाधाय स सात्त्विकः ।।१७-११।।

देवद्विजगुरुप्राज्ञपूजनं शौचमार्जवम् ।
ब्रह्मचर्यमहिंसा च शारीरं तप उच्यते ।।१७-१४।।

अनुद्वेगकरं वाक्यं सत्यं प्रियहितं च यत् ।
स्वाध्यायाभ्यसनं चैव वाङ्मयं तप उच्यते ।।१७-१५।।

मनःप्रसादः सौम्यत्वं मौनमात्मविनिग्रहः ।
भावसंशुद्धिरित्येतत्तपो मानसमुच्यते ।।१७-१६।।

श्रद्धया परया तप्तं तपस्तत्त्रिविधं नरैः ।
अफलाकाङ्क्षिभिर्युक्तैः सात्त्विकं परिचक्षते ।।१७-१७।।

दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं स्मृतम् ।।१७-२०।।

तदेवं यष्टव्यमित्येव यज्ञः कर्तव्यः, दातव्यमित्येव दानं कर्तव्यम्, तप्तव्यमित्येव तपोऽनुष्ठातव्यम्, सर्वत्र फलत्यागः कर्तव्यः; तदैव तु सात्त्विकयज्ञदानतपांस्यनुष्ठितानि भवन्ति । उत्कृष्टपुरुषार्थाय च भवन्ति तानीति समुदितार्थः ।।

१७. सात्त्विकश्रद्धावद्भिरनुष्ठीयमानान्यपि शास्त्रीयकर्माणि यत्नवद्भिरपि कृतानि न्यूनातिरेकवन्त्येव भवेयुः । अतस्तेषां साद्गुण्यसंपादनार्थमवश्यकर्तव्यमाह **भगवान्** –

ओं तत्सदिति निर्देशो ब्रह्मणस्त्रिविधः स्मृतः ।
ब्राह्मणास्तेन वेदाश्च यज्ञाश्च विहिताः पुरा ।।१७-२३।।

[ब्राह्मणादिसृष्टिरों तत्सदिति निर्देशेन इति तत्स्तुतिः ।]

तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः ।
प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम् ।।१७-२४।।

[ओम् इत्युदाहृत्यैव सर्वाण्यनुष्ठीयन्ते कर्माणि त्रैविद्यैः]

तदित्यनभिसन्धाय फलं यज्ञतपःक्रियाः ।
दानक्रियाश्च विविधाः क्रियन्ते मोक्षकाङ्क्षिभिः ।।१७-२५।।

[तदित्युदाहरणेन मुमुक्षुभिः कर्मफलत्यागो निर्दिष्टो भवति ।]

सद्भावे साधुभावे च सदित्येतत्प्रयुज्यते ।
प्रशस्ते कर्मणि तथा सच्छब्दः पार्थ युज्यते ।।१७-२६।।

[अतः 'सत्' इति निर्देशोदाहरणेन कर्मनिष्पत्तिः, कर्मणः साधुभावः, प्राशस्त्यं चोक्तं भवति।]

यज्ञे तपसि दाने च स्थितिः सदिति चोच्यते ।
कर्म चैव तदर्थीयं सदित्येवाभिधीयते ।।१७-२७।।

[यज्ञादिलक्षणे कर्मणि निष्ठा ममास्तु इत्युक्तं भवति सत् इति निर्देशेन। यज्ञाद्यर्थमीश्वरार्थं च मदीयं कर्मास्तु इत्यपि च सदित्युदाहरणेनोक्तं भवति।]

एवं मुमुक्षुभिः कर्मान्ते उदाह्रियमाणः 'ओम् तत् सत्' इति निर्देशः, कर्मणोऽवैकल्येन सिद्धिम्, फलत्यागम्, कर्मण ईश्वरार्थकत्वम् तादृश एव निष्कामकर्मणीश्वरार्थे स्थितिं च संपादयतीति, सकलन्यूनातिरिक्ततां निवार्य कर्मसाद्गुण्यं संपादयति । तदेतत् **भाष्यकारेणाप्युक्तम् –**

**'तदेतद् यज्ञदानतपआदिकर्म असात्त्विकं विगुणमपि, श्रद्धापूर्वकं ब्रह्मणोऽभिधानत्रयप्रयोगेण सगुणं सात्त्विकं संपादितं भवति ।।'** (गी.भा. १७-२८) इति ।।

१८. तदेवं श्रद्धयैव कृतं यज्ञादिकं संपूर्णं क्रियते । मुमुक्षुभिश्च श्रद्धायुक्तैः क्रियमाणं ब्रह्मनामत्रयसङ्कीर्तनेन सत्त्वशुद्धिपूर्वकं ज्ञानार्थं च भवति यस्मात्तस्मादश्रद्धा सर्वथापि त्याज्या ब्रह्मप्रेप्सुभिरित्याशयेन भगवानाह –

अश्रद्धया हुतं दत्तं तपस्तप्तं कृतं च यत् ।
असदित्युच्यते पार्थ न च तत्प्रेत्य नो इह ।।१७-२८।।

एवं शास्त्रविधिरेवानुसर्तव्यः, शास्त्रविधानोक्तं च कर्म श्रद्धयैवानुष्ठातव्यम्, ईश्वरनामत्रयं च श्रद्धापूर्वकमुच्चार्यं कर्मसाद्गुण्यार्थमित्युक्तं भवति ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'श्रद्धात्रयविभागो'नाम**
**चतुर्थं सोपानम्**

# ५. शास्त्रीयकर्मफलवर्णनम्

१९. इह शास्त्रदृष्टयो जना द्विविधाः- दृष्टादृष्टफलवाञ्छिनः, परमपुरुषार्थवाञ्छिन इति । अत एव भगवान् मोक्षसाधनभूतसम्यग्ज्ञानम् अर्जुनायोपदेष्टुं प्रवृत्तोऽपि प्रासङ्गिकं दृष्टादृष्टफलककर्मोपदेशमपि तत्र तत्र चकार। तद्यथा -

कुतस्त्वा कश्मलमिदं विषमे समुपस्थितम् ।
अनार्यजुष्टमस्वर्ग्यमकीर्तिकरमर्जुन ॥

क्लैब्यं मा स्म गमः पार्थ नैतत्त्वय्युपपद्यते ।
क्षुद्रं हृदयदौर्बल्यं त्यक्त्वोत्तिष्ठ परन्तप ॥२-२, ३॥

इति ॥
पुनरपि सांख्ययोगमुपक्रम्यापि प्रसङ्गेनोक्तम् -

स्वधर्ममपि चावेक्ष्य न विकम्पितुमर्हसि ।
धर्म्याद्धि युद्धाच्छ्रेयोऽन्यत्क्षत्रियस्य न विद्यते ॥

यदृच्छया चोपपन्नं स्वर्गद्वारमपावृतम् ।
सुखिनः क्षत्रियाः पार्थ लभन्ते युद्धमीदृशम् ॥

अथ चेत्त्वमिमं धर्म्यं संग्रामं न करिष्यसि ।
ततः स्वधर्मं कीर्तिं च हित्वा पापमवाप्स्यसि ॥

अकीर्तिं चापि भूतानि कथयिष्यन्ति तेऽव्ययाम् ।
सम्भावितस्य चाकीर्तिर्मरणादतिरिच्यते ॥

भयाद्रणादुपरतं मंस्यन्ते त्वां महारथाः ।
येषां च त्वं बहुमतो भूत्वा यास्यसि लाघवम् ॥

अवाच्यवादांश्च बहून्वदिष्यन्ति तवाहिताः ।
निन्दन्तस्तव सामर्थ्यं ततो दुःखतरं नु किम् ॥

हतो वा प्राप्स्यसि स्वर्गं जित्वा वा भोक्ष्यसे महीम् ।
तस्मादुत्तिष्ठ कौन्तेय युद्धाय कृतनिश्चयः ॥
२-३१ प्रभृति ३७ पर्यन्तम् ॥

२०. तत्र सर्वोऽपि नरः किञ्चित् कर्म कुर्वन्नेव भवति, प्रकृतिपरवश इति शास्त्रेण श्रेयःप्राप्त्यर्थं स्वकर्मानुष्ठाने नियुज्यते । अन्यथा कामकारत आसुरीं प्रकृतिमालम्ब्य निषिद्धमपि कर्म कृत्वा अधमां गतिं गच्छेदिति । तदाह **भगवान्** -

न हि कश्चित्क्षणमपि जातु तिष्ठत्यकर्मकृत् ।
कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ ३-५ ॥

यद्यहंकारमाश्रित्य न योत्स्य इति मन्यसे ।
मिथ्यैष व्यवसायस्ते प्रकृतिस्त्वां नियोक्ष्यति ॥१८-५९ ॥

स्वभावजेन कौन्तेय निबद्धः स्वेन कर्मणा ।
कर्तुं नेच्छसि यन्मोहात्करिष्यस्यवशोऽपि तत् ॥ १८-६० ॥
इति ॥

२१. तत्र गुणत्रयबद्धान् पुरुषानपेक्ष्य शास्त्रेण तत्तज्जातेःस्वभाव-जगुणापेक्षया कर्माणि प्रविभक्तानि । तदाह -

ब्राह्मणक्षत्रियविशां शूद्राणां च परन्तप ।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः ॥

शमो दमस्तपः शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्यं ब्रह्मकर्म स्वभावजम् ॥

शौर्यं तेजो धृतिर्दाक्ष्यं युद्धे चाप्यपलायनम् ।
दानमीश्वरभावश्च क्षात्रं कर्म स्वभावजम् ॥

कृषिगौरक्ष्यवाणिज्यं वैश्यकर्म स्वभावजम् ।
परिचर्यात्मकं कर्म शूद्रस्यापि स्वभावजम् ॥
१८-४१,४२,४३,४४॥

अत्र ब्राह्मणक्षत्रियवैश्यानां द्विजातित्वाद् वैदिककर्मस्वधिकारः, स्वभावजगुणकृतविशेषकर्माणि तु शमादीनि । तदुक्तं **भाष्ये** –

१) '**शूद्राणामसमासकरणम् एकजातित्वे सति वेदानधिकारात्**' (गी.भा. १८-४१) इति। यद्यपि शास्त्रेण प्रविभक्तानि कर्माणि, तथापि स्वभावजगुणानुसारेणैव प्रविभक्तानीत्याशयेन स्वभावप्रभवैर्गुणैरिति विशेषणम् । तदप्युक्तं **भाष्ये** -

२) '**ननु शास्त्रप्रविभक्तानि शास्त्रेण विहितानि ब्राह्मणादीनां शमादीनि कर्माणि। कथमुच्यते सत्त्वादिगुणप्रविभक्तानीति । नैष दोषः। शास्त्रेणापि ब्राह्मणादीनां सत्त्वादिगुणविशेषापेक्षयैव शमादीनि कर्माणि प्रविभक्तानि न गुणानपेक्षया इति शास्त्रप्रविभक्तान्यपि कर्माणि गुणप्रविभक्तानीत्युच्यते**'(गी.भा. १८-४१) इति ॥

२२. तत्र शास्त्रविहितमेव कर्म स्वस्वभावानुगुणं सर्वेणाप्यधिकारिणा कर्तव्यम्, न जात्यन्तरविहितम्। न च स्वजातिविहितं कर्म विगुणमिति परजातिविहितमादद्यात्, शास्त्रोल्लङ्घनेन दोषावहत्वात् । तदुक्तम् -

१) श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वभावनियतं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

सहजं कर्म कौन्तेय सदोषमपि न त्यजेत् ।

सर्वारम्भा हि दोषेण धूमेनाग्निरिवावृताः ।।१८-४७,४८।।

२) श्रेयान्स्वधर्मो विगुणः परधर्मात्स्वनुष्ठितात् ।
स्वधर्मे निधनं श्रेयः परधर्मो भयावहः ।।३-३५।।

इति ।।

२३. तत्र त्रैगुण्यविषयत्वात् क्रियाकारकफलात्मकस्य संसारस्य, ब्राह्मणादीनां सत्त्वादिगुणापेक्षया विहितानि कर्माणि शमादीनि । तत्र नित्यानां कर्मणामनुष्ठानाद्दुरितक्षयः, काम्यानां चानुष्ठानात् तत् कामावाप्तिः। तस्मात् शास्त्रदृष्टिभिर्विहितं कर्मावश्यमनुष्ठेयम् -

१) नियतं कुरु कर्म त्वं कर्म ज्यायो ह्यकर्मणः ।
शरीरयात्रापि च ते न प्रसिद्ध्येदकर्मणः ।।३-८।।

[**भाष्यम् - 'नियतं नित्यं शास्त्रोपदिष्टम्, यो यस्मिन् कर्मण्यधि-कृतः फलाय चाश्रुतं तत् नियतं कर्म' ।** (गी.भा. ३-८)]

२) नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।।१८-७।।

पापनिर्हरणं च भवति यज्ञादि कर्म कुर्वताम् । पापावहं च देवतादीनतर्पयित्वा जीवतोऽधिकारिणो जीवितम् इति निन्दति **भगवान्** -

३) सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः ।
अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ।।

देवान् भावयतानेन ते देवा भावयन्तु वः ।
परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ।।

इष्टान् भोगान् हि वो देवा दास्यन्ते यज्ञभाविताः ।
तैर्दत्तानप्रदायैभ्यो यो भुङ्क्ते स्तेन एव सः ।।

यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैः ।

भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात् ॥

अन्नाद्भवन्ति भूतानि पर्जन्यादन्नसम्भवः ।
यज्ञाद्भवति पर्जन्यो यज्ञः कर्मसमुद्भवः ॥

कर्म ब्रह्मोद्भवं विद्धि ब्रह्माक्षरसमुद्भवम् ।
तस्मात्सर्वगतं ब्रह्म नित्यं यज्ञे प्रतिष्ठितम् ॥

एवं प्रवर्तितं चक्रं नानुवर्तयतीह यः ।
अघायुरिन्द्रियारामो मोघं पार्थ स जीवति ॥
३-१० तम श्लोकप्रभृति १६ तम श्लोकपर्यन्तम् ॥

इति ॥

२४. ब्राह्मणादीनां विहितानां कर्मणां फलं तत्तत् दृष्टकामफलप्राप्तिः स्वर्गश्च परं श्रेयः, फलभोगानन्तरं विशिष्टकुले जन्म च । यथोक्तं **भाष्ये – ''एतेषां जातिविहितानां कर्मणां सम्यगनुष्ठितानां स्वर्गप्राप्तिः फलं स्वभावतः– 'वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्य कर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलधर्मायुः–श्रुतवृत्तवित्तसुखमेधसो जन्म प्रतिपद्यन्ते'(गौ.ध.सू.२-२-२९) इत्यादिस्मृतिभ्यश्च । पुराणे च वर्णिनामाश्रमिणांच लोकफलभेदविशेषस्मरणात्**'' (गी.भा. १८-४५) इति ॥

**विष्णुपुराणे हि–**

यस्तु सम्यक्करोत्येवं गृहस्थः परमं विधिम् ।
सर्वबन्धविनिर्मुक्तो लोकानाप्नोत्यनुत्तमान्॥वि.पु.३-९-७॥

यस्त्वेतां नियतश्चर्यां वानप्रस्थश्चरेन्मुनिः ।
स दहत्यग्निवद्दोषान् जयेल्लोकांश्च शाश्वतान् ॥ वि.पु.३-९-२३

मोक्षाश्रमं यश्चरते यथोक्तं
शुचिस्सुखं कल्पितबुद्धियुक्तः ।
अनिन्धनं ज्योतिरिव प्रशान्तः
स ब्रह्मलोकं श्रयते द्विजातिः ।। वि.पु.३-९-३३।

इत्याश्रमकर्मफलभेदः स्मर्यते ।।

२५. तदेवं यथाशास्त्रविध्युत्सर्गेण वर्तमानानां कामकारदृष्टीनामिहपरसुखवञ्चितानामधोगतिर्नियता । एवं शास्त्रदृष्टीनां श्रद्दधानानां नित्यकाम्यानुष्ठानेनेहपरसुखप्राप्तिरपि नियमेन भवित्रीति शास्त्रदृष्टेरुत्कृष्टत्वं सिद्धम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'शास्त्रीयकर्मफलवर्णनम्' नाम**
**पञ्चमं सोपानम्**

# ६. परमपुरुषार्थस्वरूपनिर्धारणम्

२६. अधिगतमेतद् यदासुरसंपद्युक्ताः कामकारेण वर्तमानाः भगवच्छिष्टसाधुमार्गात् परिभ्रष्टा अधोगतिं प्राप्नुवन्ति, शास्त्रोक्तकर्मानुष्ठातारस्तु दृष्टादृष्टफलभोगं प्राप्नुवन्ति, धर्मार्थकामलक्षणं पुरुषार्थमिति । तेषां च शास्त्रीयधर्मानुष्ठातॄणां स्वर्गप्राप्तिपर्यन्तम् फलम्। सर्वमेवेदं संसारान्तर्गतमेव । दैवसंपद्विशिष्टास्त्वस्माद्विमोक्षं गच्छन्तीत्युक्तम्। अथ कोऽयं विमोक्षो नाम । कथं वा प्राप्यते स इत्येतन्निर्धारणाय परो ग्रन्थः प्रवर्तते ।।

२७. अस्ति वासुदेवाख्यं परं ब्रह्म त्रिगुणात्मकप्रकृतेः परं 'परमेश्वरः', 'परः पुरुषः', 'परमः पुरुषः' 'पुरुषोत्तमः', 'ईश्वरः' इत्यादि-नामभिरभिधीयमानम् । यद्भावं गताः संसारावर्तं नावर्तन्ते । सोऽयं विमोक्षो नाम **परमपुरुषार्थः** ।।

1. उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृतः ।
यो लोकत्रयमाविश्य बिभर्त्यव्यय ईश्वरः ।।

यस्मात् क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः।।१५-१७,१८।।

2. अव्यक्ताद् व्यक्तयः सर्वाः प्रभवन्त्यहरागमे ।
रात्र्यागमे प्रलीयन्ते तत्रैवाव्यक्तसंज्ञके ।।८-१८।।

[अक्षरः, अव्यक्तम् इति च प्रलयकालावस्थितसूक्ष्मप्रकृतेरेव संज्ञा]

भूतग्रामः स एवायं भूत्वा भूत्वा प्रलीयते ।
रात्र्यागमेऽवशः पार्थ प्रभवत्यहरागमे ।।८-१९।।

[प्रजापतेरहन्यहनि उत्पन्नोत्पन्ना रात्रौ रात्रौ प्रलीयन्ते]

**परस्त**स्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।।

**अव्यक्तोऽक्षर** इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।।

**पुरुषः स परः** पार्थ भक्त्या लभ्यस्त्वनन्यया ।।
८-२०,२१,२२।।

3. **परं ब्रह्म परं धाम पवित्रं परमं** भवान् ।

**पुरुषं शाश्वतं** दिव्यमादिदेवमजं विभुम् ।।१०-१२।।

२८. बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।।७-१९।।

[वासुदेवाख्यं परं ब्रह्मैवैकं परमार्थतत्त्वमद्वितीयमिति ज्ञानं बहूनां जन्मनामन्ते जायते इत्युक्त्वा ज्ञानेन जन्मबन्धान्मुक्तिरिति सूचितं भवति।]

२९. सोऽसौ परमपुरुषार्थो विमोक्षो विविधाभिराख्याभिर्बहुधा गीयतेऽत्र शास्त्रे । तद्यथा[८] –

१) **क्वचित्साक्षात् स्वशब्देनाभिधानं क्वचिच्च संसार बन्धाद्विमोक्ष** इति –

एवं बहुविधा यज्ञा वितता ब्रह्मणो मुखे।
कर्मजान्विद्धि तान्सर्वानेवं ज्ञात्वा **विमोक्ष्यसे**।।४-३२।।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान्।
जन्ममृत्युजरादुःखै**र्विमुक्तो**ऽमृतमश्नुते।।१४-२०।।

ज्ञेयः स नित्यसंन्यासी यो न द्वेष्टि न काङ्क्षति ।
निर्द्वन्द्वो हि महाबाहो सुखं **बन्धात्प्रमुच्यते**।।५-३।।

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा **मोक्ष्यसे**ऽशुभात् ।।४-१६।।

इदं तु ते गुह्यतमं प्रवक्ष्याम्यनसूयवे।
ज्ञानं विज्ञानसहितं यज्ज्ञात्वा **मोक्ष्यसे**ऽशुभात्।।९-१।।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः।

८. अत्र बहुत्र पूर्णः श्लोकः नोदाहृत आकरग्रन्थे ।

**जन्मबन्धविनिर्मुक्ताः** पदं गच्छन्त्यनामयम् ।।२-५१ ।।

२) **क्वचिद् ब्रह्मभावपर्यायशब्दैः –**

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान् **ब्रह्मभूयाय कल्पते** ।।१४-२६ ।।

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता **मद्भावमागताः** ।।४-१० ।।

अन्तकाले च मामेव स्मरन्मुक्त्वा कलेवरम् ।
यः प्रयाति **स मद्भावं याति** नास्त्यत्र संशयः ।।८-५ ।।

नान्यं गुणेभ्यः कर्तारं यदा द्रष्टानुपश्यति ।
गुणेभ्यश्च परं वेत्ति **मद्भावं सोऽधिगच्छति** ।।१४-१९ ।।

इदं ज्ञानमुपाश्रित्य **मम साधर्म्यमागताः** ।
सर्गेऽपि नोपजायन्ते प्रलये न व्यथन्ति च ।।१४-२ ।।

३) **क्वचिद् ब्रह्मणि स्थितिरिति** –

एषा **ब्राह्मी स्थितिः** पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।।२-७२ ।।

इहैव तैर्जितः सर्गो येषां साम्ये स्थितं मनः ।
निर्दोषं हि समं ब्रह्म तस्माद् **ब्रह्मणि ते स्थिताः** ।।

न प्रहृष्येत्प्रियं प्राप्य नोद्विजेत्प्राप्य चाप्रियम् ।
स्थिरबुद्धिरसम्मूढो ब्रह्मविद् **ब्रह्मणि स्थितः** ।।५-१९,२० ।।

४) **क्वचित् ब्रह्मनिर्वाणशब्देनापि निर्दिश्यते** – तदिदं

ब्रह्मनिर्वाणं जीवतो विदुषः प्रेतस्य च भवति । विदेहमुक्तिरिति व्यपदेशः गमनपर्यायैरपि भवति।

1. एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि **ब्रह्मनिर्वाणमृच्छति** ॥२-७२॥

2. स योगी **ब्रह्मनिर्वाणं** ब्रह्मभूतोऽधिगच्छति ॥५-२४॥

[अत्र ज्ञानेन ब्रह्मभावं गत्वा देहपातानन्तरं निर्वाणं गच्छतीति विदेहमुक्तिरेव निर्वाणशब्देनोक्ता इति स्पष्टम् ।]

3. लभन्ते **ब्रह्मनिर्वाणमृषयः** क्षीणकल्मषाः।
छिन्नद्वैधा यतात्मानः सर्वभूतहिते रताः॥

4. कामक्रोधवियुक्तानां यतीनां यतचेतसाम् ।
अभितो **ब्रह्मनिर्वाणं** वर्तते विदितात्मनाम् ॥५-२५,२६॥

[अत्र 'अभितः' इति जीवतां मृतानां चेत्युभयतोऽपि निर्वाणं वर्तते - इत्युक्तेः सद्योमुक्तिर्विदेहमुक्तिश्चेत्युभयं निर्वाणशब्देनोच्यते ।]

अपरे नियताहाराः प्राणान्प्राणेषु जुह्वति ।
सर्वेऽप्येते यज्ञविदो यज्ञक्षपितकल्मषाः॥

यज्ञशिष्टामृतभुजो **यान्ति ब्रह्म** सनातनम्।
नायं लोकोऽस्त्ययज्ञस्य कुतोऽन्यः कुरुसत्तम ॥४-३०,३१॥

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्।
तत्र प्रयाता **गच्छन्ति ब्रह्म** ब्रह्मविदो जनाः॥ ८-२४॥

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम्।
देवान् देवयजो यान्ति मद्भक्ता **यान्ति मामपि** ॥७-२३॥

यान्ति देवव्रता देवान् पितॄन्यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या **यान्ति** मद्याजिनोऽपि **माम्** ।।९-२५।।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो **मामुपैष्यसि** ।।९-२८।।

मन्मना भव मद्भक्तो मद्याजी मां नमस्कुरु ।
**मामेवैष्यसि** युक्त्वैवमात्मानं मत्परायणः ।।९-३४।।

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम् ।
ददामि बुद्धियोगं तं येन **मामुपयान्ति** ते ।।१०-१०।।

भक्त्या त्वनन्यया शक्य **अह**मेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन **प्रवेष्टुं** च परन्तप ।।११-५४।।

[सर्वत्रापि विदेहमुक्तिरेवात्र विवक्षिता]

५) **क्वचित्तु अमृतत्वशब्देन निर्दिष्टा मुक्तिः, अमृतप्राप्ति-शब्देन च-**

यं हि न व्यथयन्त्येते पुरुषं पुरुषर्षभ ।
समदुःखसुखं धीरं **सोऽमृतत्वाय** कल्पते ।।२-१५।।

ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वा**ऽमृतमश्नुते** ।
अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते ।।१३-१२।।

गुणानेतानतीत्य त्रीन्देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तो**ऽमृतमश्नुते** ।।१४-२०।।

६) **क्वचिच्छान्तिशब्देन निर्दिष्टा -**

आपूर्यमाणमचलप्रतिष्ठं
समुद्रमापः प्रविशन्ति यद्वत्।

तद्वत्कामा यं प्रविशन्ति सर्वे
स **शान्तिमा**प्नोति न कामकामी ।।२-७०।।

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स **शान्ति**मधिगच्छति ।।२-७१।।

श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः ।
ज्ञानं लब्ध्वा परां **शान्ति**मचिरेणाधिगच्छति ।।४-३९।।

युक्तः कर्मफलं त्यक्त्वा **शान्ति**माप्नोति नैष्ठिकीम् ।
अयुक्तः कामकारेण फले सक्तो निबध्यते ।।५-१२।।

भोक्तारं यज्ञतपसां सर्वलोकमहेश्वरम् ।
सुहृदं सर्वभूतानां ज्ञात्वा मां **शान्ति**मृच्छति ।।५-२९।।

युञ्जन्नेवं सदात्मानं योगी नियतमानसः ।
**शान्तिं** निर्वाणपरमां मत्संस्थामधिगच्छति ।।६-१५।।

क्षिप्रं भवति धर्मात्मा शश्व**च्छान्तिं** निगच्छति ।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति ।।९-३१।।

७) **क्वचिदपि सिद्धिशब्देन, संसिद्धिशब्देन वा उच्यते –**

कर्मणैव हि **संसिद्धि**मास्थिता जनकादयः ।
लोकसङ्ग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ।।३-२०।।

मामुपेत्य पुनर्जन्म दुःखालयमशाश्वतम् ।
नाप्नुवन्ति महात्मानः **संसिद्धिं** परमां गताः ।।८-१५।।

परं भूयः प्रवक्ष्यामि ज्ञानानां ज्ञानमुत्तमम् ।
यज्ज्ञात्वा मुनयः सर्वे परां **सिद्धि**मितो गताः ।।१४-१।।

८) **क्वचित् पुनः जन्मकर्मबन्धाभावत्वेन पुनर्जन्माभावत्वेन वा वर्णिता –**

एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमांशृणु ।
बुद्ध्या युक्तो यया पार्थ **कर्मबन्धं प्रहास्यसि** ।।२-३९।।

जन्म कर्म च मे दिव्यमेवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं **पुनर्जन्म नैति** मामेति सोऽर्जुन ।।४-९।।

तद्बुद्धयस्तदात्मानस्तन्निष्ठास्तत्परायणाः ।।
गच्छ**न्त्यपुनरावृत्तिं** ज्ञाननिर्धूतकल्मषाः ।।५-१७।।

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
**जन्मबन्धविनिर्मुक्ताः** पदं गच्छन्त्यनामयम् ।।२-५१।।

आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय **पुनर्जन्म न विद्यते** ।।८-१६।।

य एवं वेत्ति पुरुषं प्रकृतिं च गुणैः सह ।
सर्वथा वर्तमानोऽपि **न स भूयोऽभिजायते**।।१३-२३।।

९) **क्वचित् आद्यस्थानपरमपदादिशब्दैरपि व्यपदिष्टा** -

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः **पदं गच्छन्त्यनामयम्** ।।२-५१।।

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते **पदं** संग्रहेण प्रवक्ष्ये ।।८-११।।

[अत्र ओंकारशब्दवाच्यं ब्रह्म, ओंकार एव वा पदत्वेन विवक्षितः इति व्याख्यातुं शक्यते । यदा ब्रह्म विवक्ष्यते तदा पदम् इति ब्रह्मैव मुक्त्यवस्था पदशब्दवाच्यतया विवक्षितमिति कल्पनीयम्।]

ततः **पदं** तत्परिमार्गितव्यम्
यस्मिन्गता न निवर्तन्ति भूयः ।

तमेव चाद्यं पुरुषं प्रपद्ये
यतः प्रवृत्तिः प्रसृता पुराणी ॥१५-४॥

निर्मानमोहा जितसङ्गदोषा
अध्यात्मनित्या विनिवृत्तकामाः ।
द्वन्द्वैर्विमुक्ताः सुखदुःखसंज्ञै-
र्गच्छन्त्यमूढाः **पदमव्ययं** तत् ॥१५-५॥

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति **शाश्वतं पदमव्ययम्** ॥१८-५६॥

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते **तद्धाम परमं मम** ॥८-२१॥

न तद्भासयते सूर्यो न शशाङ्को न पावकः ।
यद्गत्वा न निवर्तन्ते **तद्धाम परमं मम** ॥१५-६॥

यत्साङ्ख्यैः प्राप्यते **स्थानं** तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ॥५-५॥

वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
योगी **परं स्थानमुपैति चाद्यम्** ॥८-२८॥

तमेव शरणं गच्छ सर्वभावेन भारत ।
तत्प्रसादात् **परां शान्तिं स्थानं** प्राप्स्यसि शाश्वतम्॥१८-६२।

३०. तस्यास्य निःश्रेयसस्य कूटस्थनित्यब्रह्मात्मभावप्राप्तिलक्षणस्याल्पास्थिरकर्मसाध्यत्वासंभवं सम्यग्ज्ञानैकलभ्यत्वं चावेदयितुं स्वर्गप्रापकमपि वैदिकं कर्म विनिन्द्यतेऽस्मिन् शास्त्रे तत्र तत्र यथा

मुमुक्षवः सम्यग्दर्शनसाधनैकप्रवणा भवेयुरिति ।।

(१) यामिमां पुष्पितां वाचं प्रवदन्त्यविपश्चितः ।
वेदवादरताः पार्थ नान्यदस्तीति वादिनः ।।

कामात्मानः स्वर्गपरा जन्मकर्मफलप्रदाम् ।
क्रियाविशेषबहुलां भोगैश्वर्यगतिं प्रति ।।

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ।।२-४२,४३,४४ ।।

(२) त्रैविद्या मां सोमपाः पूतपापा
यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते ।
ते पुण्यमासाद्य सुरेन्द्रलोक-
मश्नन्ति दिव्यान् दिवि देवभोगान् ।।

ते तं भुक्त्वा स्वर्गलोकं विशालं
क्षीणे पुण्ये मर्त्यलोकं विशन्ति ।
एवं त्रयीधर्ममनुप्रपन्ना
गतागतं कामकामा लभन्ते ।।९-२०,२१ ।।

इति ।।

३१. तदेवमासुरसंपद्भाजां फलादत्यन्ताधमगतेः, पुण्यकृतां फलाच्च स्वर्गपर्यन्तगतेर्विलक्षणं ब्रह्मभूयलक्षणं निःश्रेयसं संसारस्यात्यन्तोपरमलक्षणं परमपुरुषार्थः इति गीताशास्त्रसिद्धान्तः ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'परमपुरुषार्थस्वरूपनिर्धारणम्' नाम**
**षष्टं सोपानम्**

# ७. कर्मसंन्यासविभागोपदेशः

३२. एवं तावच्छास्त्रप्रमाणकैरासुरप्रकृतिजयार्थं शास्त्रविहितं कर्मावश्यं कर्तव्यं श्रेयोऽर्थिभिरिति राद्धान्तितम् । विमोक्षकाङ्क्षिभिर्दैवी संपत् सम्यक्संपादनीयेत्युपदिश्य विमोक्षस्वरूपं कूटस्थनित्यब्रह्मभावः इति चोक्तम्। तत्रात एव हेतोर्मुमुक्षुभिः सर्वं कर्म संन्यस्य मोक्षसाधनं सम्यग्ज्ञानं संपादनीयमिति तावत् प्राप्नोति । तत् किं कृत्स्नमेव कर्मजातं मुमुक्षुभिः परित्याज्यं किं वा तदेकदेशानुष्ठानमपि तेषामवश्यं कर्तव्यं शास्त्रविहितत्वात्? यदि तावत् सर्वं कर्मजातं परित्यज्यते तदा शास्त्रविध्युत्सर्गात् न तेषामासुरसंपत्परिहारः सिध्येत् । अथैकदेशः कर्मणामनुष्ठेयः, तदा कर्मनिन्दा शास्त्रकृता कदर्थिता स्यात् । व्यर्थानुष्ठानविधानाच्छास्त्रस्याप्रामाण्यमपि प्रसज्येतेत्युभयतःपाशा रज्जुरिति शङ्कायां शास्त्रार्थनिर्णयार्थं परो ग्रन्थः प्रारभ्यते ।।

३३. तत्रार्जुनेन शास्त्रार्थोपसंहाराध्याये पृच्छ्यते स्म **भगवान्** –

संन्यासस्य महाबाहो तत्त्वमिच्छामि वेदितुम् ।
त्यागस्य च हृषीकेश पृथक् केशिनिषूदन ।।१८-१ ।।

इति ।।

तत्रायं भगवतो निर्णयः –

काम्यानां कर्मणां न्यासं संन्यासं कवयो विदुः ।
सर्वकर्मफलत्यागं प्राहुस्त्यागं विचक्षणाः ।।१८-२ ।।

अत्र काम्यकर्मणां संन्यास एवोपदिष्टः, सर्वकर्मणामपि स विद्यते फलत्यागात्मकः इति स्फुटम् । तत्र फलकामिनां श्रद्दधानानां काम्यं कर्म विदधच्छास्त्रं तेषामेव संन्यासमप्युपदिशतीति व्याहतोक्तिर्निर्दुष्टे शास्त्रे न कल्पयितुं युक्तेत्यत ऐहिकामुष्मिकभोगे विरक्तान् मुमुक्षून्

प्रत्येवायमुपदेश इति श्लिष्यते । एवं कर्माणि श्रेयोऽर्थिनां विदधच्छास्त्रं तेषामेव त्यागमुपदिशतीत्यपि न युक्तम्, इत्यतः काम्येतरकर्मणां विहितानां फलत्यागमात्रं मुमुक्षूणामेवोपदिशति भगवानिति कल्पयितुं युक्तम् ॥

अत्र यद्यपि संन्यासत्यागशब्दार्थौ पृष्टौ, भगवता प्रत्युक्तौ चेत्येव भगवान् **भाष्यकारः** आह, तथापि-

''**यदि काम्यकर्मपरित्यागः फलपरित्यागो वार्थो वक्तव्यः। सर्वथा परित्यागमात्रं संन्यासत्यागशब्दयोरेकोऽर्थः स्यात्, न घटपटशब्दाविव जात्यन्तरभूतार्थौ**'' **।** (गी.भा.१८-२) - इति लिखन् काम्यकर्मपरित्यागं सर्वकर्मफलत्यागं चापरित्यजन्नेव शब्दयोरनयोरेकार्थतां विवक्षतीति गम्यते । अन्यथा विभज्यवचनमक्षरोपात्तं विनाकारणं परिहापितं स्यादिति ॥

३४. इतश्च मुमुक्षुकर्तव्यकर्मसंन्यासविषय एवायं प्रश्नः प्रतिवचनं चेति विज्ञायते । यतः समनन्तरोत्तरश्लोकैरेव संशयप्रयोजनवत्त्वाद् विचार्य निर्णेयत्वमत्रोच्यते भगवता -

त्याज्यं दोषवदित्येके कर्म प्राहुर्मनीषिणः ।
यज्ञदानतपः कर्म न त्याज्यमिति चापरे ॥

निश्चयं शृणु मे तत्र त्यागे भरतसत्तम ।
त्यागो हि पुरुषव्याघ्र त्रिविधः सम्प्रकीर्तितः ॥

यज्ञदानतपः कर्म न त्याज्यं कार्यमेव तत् ।
यज्ञो दानं तपश्चैव पावनानि मनीषिणाम् ॥१८-३,४,५॥

अत्र हिंसायुक्तत्वात्, अल्पक्षयिष्णुफलत्वाच्च यज्ञादिकं न कार्यमिति साङ्ख्यादीनां मतम्, विहितत्वात्, अकरणे प्रत्यवायाच्च कार्यम् इति

मीमांसकानुयायिनाम् – इति विवादग्रस्तत्वात् शास्त्रार्थनिर्णयस्य कर्तव्यत्वे प्राप्ते, पावनत्वात् कर्तव्यान्येव यज्ञादीनीत्येव भगवतो निर्णयः । तत्र शास्त्रविध्युत्सर्गस्यासुरत्वाद् यज्ञादीनां कर्तव्यत्वस्य प्राप्तिरेवेति न कर्ममात्रमधिकृत्येयं चिन्ता प्रवर्तिता । मुमुक्षून् प्रति तु यथोक्तसंशय-ग्रस्तत्वात्, यज्ञादीनां चित्तशुद्धिद्वारा विविदिषाहेतुत्वस्य 'तमेतं वेदानु वचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसानाशकेन' (बृ. ४-४-२२) इति श्रुत्या परिप्रापितत्वाच्च आत्मज्ञानार्थतया मुमुक्षून् प्रत्येव सा-र्थकत्वात् तानधिकृत्यैवैषा चिन्ता भगवतो निर्णयश्चेत्यवगम्यते ।। इतश्च –

ज्यायसी चेत् कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ।।३-१ ।।

इत्यर्जुनेन पृष्टो हि भगवानाह –

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ।।३-३ ।।

इति कर्मयोगिनां मुमुक्षूणां कर्मयोगेन निष्ठैव मया विवक्षिता इति ।

अन्यत्र च –

संन्यासं कर्मणां कृष्ण पुनर्योगं च शंससि ।
यच्छ्रेय एतयोरेकं तन्मे ब्रूहि सुनिश्चितम् ।।५-१ ।।

इति पृष्टः आह –

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ ।
तयोस्तु कर्मसंन्यासात् कर्मयोगो विशिष्यते ।।५-२ ।।

इति। अतोऽवगम्यते निःश्रेयसकाङ्क्षिणामेवेयं सर्वकामफलत्यागनिष्ठा

समुपदिष्टा भगवतेति ।।

अपि च मोक्षिणोऽर्जुनस्य विश्वरूपं दर्शयित्वा क्लेशावहाक्षरोपासनापेक्षया सुकरं विश्वरूपोपासनमित्युक्त्वा विश्वरूपोपासनं सहसा कर्तुमसमर्थश्चेद् अभ्यासयोगभगवत्कर्मपरत्वयोरन्यतरमुपादेयम्। तत्राप्यसमर्थेन सर्वकर्मफलत्यागः कर्तव्य इत्युक्त्वा ब्रवीति -

श्रेयो हि ज्ञानमभ्यासाज्ज्ञानाद्ध्यानं विशिष्यते ।
ध्यानात् कर्मफलत्यागस्त्यागाच्छान्तिरनन्तरम् ।।१२-१२।।

इति ।।

तत्र शान्त्यपराभिधानमोक्षसाधनं त्यागः इत्युक्त्यापि निश्चीयते सर्वकर्मफलत्यागोऽयं काम्यकर्मसंन्यासपूर्वको मुमुक्षून् प्रत्येवोपदिश्यते चित्तशुद्धिद्वारा ज्ञानप्राप्त्युपायत्वेनेति ।।

३५. मुमुक्षुभिरनुष्ठेयः कर्मसंन्यासो द्विविधः । तत्र साक्षादेव सर्वेषामपि कर्मणां परित्यागस्तत्त्वजिज्ञासायां प्रवृत्तिश्चोत्तमाधिकारिणाम्, मन्दमध्यमाधिकारिणां तु काम्यकर्मन्यासः, यज्ञार्थमीश्वरार्पणबुद्ध्या च कर्मकरणेन तस्य बन्धकत्वदोषवारणोपायस्वीकारश्च गौणः संन्यासः। तत्र सर्वकर्मसंन्यासः स्तूयते विभजनकथनव्याजेन यथा मुमुक्षवः प्रयत्नपूर्वकं तं संपादयेयुरिति -

अनिष्टमिष्टं मिश्रं च त्रिविधं कर्मणः फलम् ।
भवत्यत्यागिनां प्रेत्य न तु संन्यासिनां क्वचित् ।।१८-१२।।

इति।।

अत्र **भाष्यम् - 'अनिष्टं नरकतिर्यगादिलक्षणम्, इष्टं देवादिलक्षणम्, मिश्रम् इष्टानिष्टसंयुक्तं मनुष्यलक्षणं च-एवं त्रिविधं त्रिप्रकारं कर्मणः धर्माधर्मलक्षणस्य फलम् । बाह्यानेककारकव्यापारनिष्पन्नं सत् अविद्या-**

**कृतमिन्द्रजालमायोपमं महामोहकरं प्रत्यगात्मोपसर्पीव फल्गुतया लयम् अदर्शनं गच्छतीति फलनिर्वचनम् । तदेतदेवंलक्षणं फलं भवति अत्या –गिनाम् अज्ञानां कर्मिणामपरमार्थसंन्यासिनां प्रेत्य शरीरपातादूर्ध्वम् । न तु संन्यासिनां परमार्थसंन्यासिनां परमहंसपरिव्राजकानां केवलज्ञा ननिष्ठानां क्वचित् । न हि केवलसम्यग्दर्शननिष्ठा अविद्यादिसंसारबीजं नोन्मूलयति कदाचिदित्यर्थः**' (गी.भा. १८-१२) इति।।

३६. अत्रात्यन्तिकः सर्वसंसारोपरमलक्षणो मोक्षः, **परमार्थसंन्यासपूर्वकात्** ज्ञाननिष्ठालक्षणाद्धर्मादेव भवतीत्युक्त्या[१] सर्वकर्मसंन्यासः कर्तव्य एव मुमुक्षुभिरित्यभिप्रैति भाष्यकारः इति गम्यते। उक्तं च **भगवता** 'संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ' (५-२) इति। तत्र तादृक् संन्यासेऽनधिकृतो मुमुक्षुः कर्मत्यागं कथं कुर्यात् इत्यत्रैवमुच्यते–

एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च ।
कर्तव्यानीति मे पार्थ निश्चितं मतमुत्तमम् ।।१८-६।।

– इति ।।

[एतान्यपि – कर्मिणां बन्धकान्यपीत्यर्थः]

'यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः' (३-९) इत्युक्तरीत्या बन्धकान्यपि सङ्गं त्यक्त्वा फलानि च त्यक्त्वा नित्यान्यपि कर्माणि कर्तव्यानि। एष एव मध्यमाधिकारिणा मुमुक्षुणा कर्तव्यः कर्मसंन्यासः। तत् कथमित्याह **भगवान्** –

नियतस्य तु संन्यासः कर्मणो नोपपद्यते ।
मोहात् तस्य परित्यागस्तामसः परिकीर्तितः ।।१८-७।।

दुःखमित्येव यत्कर्म कायक्लेशभयात् त्यजेत् ।

१. श्रीमद्भगवद्गीताभाष्योपोद्घातेऽप्ययं विषय उक्तः ।

स कृत्वा राजसं त्यागं नैव त्यागफलं लभेत् ।।१८-८।।

कार्यमित्येव यत्कर्म नियतं क्रियतेऽर्जुन ।
सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः।।१८-९।।

अत्र 'विहितं कर्म' इति जानन्नपि यत्कर्म परित्यजति तदज्ञानवशादेवेति तामसस्त्यागः । कायक्लेशभयात् त्यागस्तु शरीराभिमानकृतः इति राजसः। सङ्गत्यागः अहंकरोमीत्यभिमानत्यागः, फलत्यागः यज्ञार्थं करणात्; सङ्गफलाभिसंध्योरेव कर्मबन्धहेतुत्वात् तत्त्यागे कर्मत्याग एव कृतः स्यादिति त्यागसामान्याद् गौणोऽयं **कर्मसंन्यासः**। सर्वैषणा-परित्यागपूर्वकं विविदिषुणा क्रियमाणस्तुरीयाश्रमप्रवेशार्थं विधिवत् कर्मणां संन्यासो **मुख्यः**। मुक्तस्य ज्ञाननिष्ठस्य स्वभावसिद्धः **परमार्थसंन्यासः** इति विवेकः ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'कर्मसंन्यासविभागोपदेशो' नाम**
**सप्तमं सोपानम्**

# ८. कर्मयोगोपदेशः

३७. अधिगतमेतत् यत्कर्मसंन्यासपूर्वकमेव भगवत्तत्त्वज्ञानं लब्ध्वा भगवद्भावप्राप्तिलक्षणं निःश्रेयसं प्राप्नुयुर्मुमुक्षवः; तत्र सहसा कर्मसंन्यासं कर्तुमशक्नुवानाः काम्यकर्मसंन्यासपूर्वकं नित्यकर्माणि तु यज्ञादीनि सङ्गत्यागफलत्यागपूर्वकमनुतिष्ठेयुः; येन चित्तशुद्धिद्वारा परम्परया मुख्यसंन्याससोपानमप्यारोढुं समर्था भवेयुस्ते । कामत्यागाच्च

सङ्गफलत्यागोऽपि सात्त्विकत्यागत्वेन संस्तुतो गीतासु-इति । अथेदानीं गौणसंन्यासोऽयं केन साधनेन संपादनीय इत्येतन्निरूप्यते ॥

३८. सोऽयं सङ्गफलत्यागपूर्वकं कर्मानुष्ठानलक्षणः संन्यासः बहुधा स्तुतो गीतासु -

(1) न द्वेष्ट्यकुशलं कर्म कुशले नानुषज्जते ।
त्यागी सत्त्वसमाविष्टो मेधावी छिन्नसंशयः ॥१८-१०॥

[त्यागी सात्त्विकत्यागवान् यदैषणात्रयत्यागरूपं मुख्यं संन्यासं सत्त्वशुद्ध्यनन्तरमाश्रीयते, तदा क्रमेण आत्मविज्ञानमपि संप्राप्य काम्यं कर्म न द्वेष्टि नित्ये कर्मणि नानुषज्जते ।]

(2) न हि देहभृता शक्यं त्यक्तुं कर्माण्यशेषतः ।
यस्तु कर्मफलत्यागी स त्यागीत्यभिधीयते ॥१८-११॥

देहाभिमानिभिः सर्वथापि कर्म त्यक्तुं न शक्यम्, प्रकृतिपरवशत्वात् देहिनाम्। अतः सात्त्विकत्याग एव समाश्रयणीयो यथा सर्वकर्मसंन्यासोऽपि क्रमेण लभ्येतेत्यर्थः । 'स त्यागीत्यभिधीयते' इति त्यागफलत्वेन संस्तूयते कर्मयोगोऽत्र॥

(3) एषा तेऽभिहिता साङ्ख्ये बुद्धिर्योगे त्विमां शृणु ।
बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि ॥२-३९॥

[इयमपि फलद्वारा संस्तुतिः]

(4) नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥२-४०॥

[अत्रारब्धस्य व्यर्थता नास्ति, किन्तु चित्तशुद्धिर्जायत एव । नापि प्रत्यवाय दोषः चिकित्सादेरिव। साकल्येनैव फलप्राप्तिः स्यात्]

३९. तत्र कर्मण्यधिकृतानां क्रमक्रमेण मार्गसमाश्रयणसिद्ध्यर्थमिदं तावदुपदिश्यते –

1) न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ।।३-४।।

यद्यपि परमार्थसंन्यास एव नैष्कर्म्यसिद्धौ साक्षादुपाय इति वक्ष्यते 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति' (१८-४९) इति, तथापि केवलकर्मत्यागेनाकर्मण्यता फलेन्न तु परमनैष्कर्म्यसिद्धिः इत्यर्थः । कर्मसंन्यसनादेव न केवलं नैष्कर्म्यं न प्राप्यते, यावच्छास्त्रोपदे-शोल्लङ्घनेनानर्थप्राप्तिश्च ध्रुवं स्यात्, अतः परमार्थसंन्यासद्वारेण नैष्कर्म्यं तत्फलं ब्रह्मभावप्राप्तिं च प्रेप्सुभिः कर्मयोग एव समाश्रयणीय इत्याह –

2) कर्मेन्द्रियाणि संयम्य य आस्ते मनसा स्मरन् ।
इन्द्रियार्थान् विमूढात्मा मिथ्याचारः स उच्यते ।।३-६।।

3) यस्त्विन्द्रियाणि मनसा नियम्यारभतेऽर्जुन ।
कर्मेन्द्रियैः कर्मयोगमसक्तः स विशिष्यते ।।३-७।।

कर्मेन्द्रियज्ञानेन्द्रियाणां मध्ये ज्ञानेन्द्रियाणामेव संयमः प्रप्रथमम् इहासा दनीयः, तदनु कर्मयोगानुष्ठानेन कर्मसंन्यासेऽधिकृतो भवतीत्यभिप्रायः। तत्र कर्मयोगानुष्ठाने प्रविष्टानां फलाभिसन्धिसंन्यासः प्रथमं कर्तव्य इत्याह –

4) कर्मण्येवाधिकारस्ते मा फलेषु कदाचन ।
मा कर्मफलहेतुर्भूर्मा ते सङ्गोऽस्त्वकर्मणि ।।२-४७।।

ज्ञानार्थं मुख्यसंन्यासं संपिपादयिषोः (१) कर्मण्येवाधिकारः; (२) शास्त्रोक्तकर्म कुर्वतोऽपि तत्फलेषु अधिकारो मा भूत्; (३) शास्त्रीयकर्मकरणे हीहपरसुखभोगार्थं कर्मफलहेतुः स्यात् पुरुषः, मुमुक्षोः तदुभयवर्जनात् कर्मकरणं फलानभिसंधिश्चेत्युभयमप्यपेक्षितव्यम् – अत उच्यते 'मा कर्मफलहेतुर्भूः' इति; (४) न च कर्म त्याज्यं, तथा

सत्यासुरत्वं गतस्याधोगतिरेव स्यादिति । तदाह – 'मा ते सङ्गोऽस्त्वकर्मणि' इति । एतेन फलत्यागपूर्वकं कर्मानुष्ठातव्यम् इत्युपदिष्टं भवति ।।

5) योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय ।
सिद्ध्यसिद्ध्योः समो भूत्वा समत्वं योग उच्यते।।२-४८।।

अत्र **कर्मसङ्गत्याग** उक्तः, फलसिद्ध्यसिद्ध्योः **समत्वबुद्धिश्च**। एतेन यद्वक्ष्यते अन्तिमाध्याये 'सङ्गं त्यक्त्वा फलं चैव स त्यागः सात्त्विको मतः' (१८-९) इति, तत्राधिकमिदमुपसंहर्तव्यं यत् फलासिद्धावपि अविकृतबुद्धिना भाव्यमिति ।।

6) यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।१८-४६।।

सङ्गत्यागफलाभिसन्धित्यागपूर्वकं कर्म कुर्वतस्तावतैव मुमुक्षोः कर्मयोगो न संपूर्णतां याति । स्वकर्माचरणेनैवेश्वरस्य समभ्यर्चनं कर्तव्यम्। तेन सिद्धिं ज्ञाननिष्ठा(योग्यता)[१०] लक्षणां सिद्धिं समधिगच्छति। केवलस्वकर्माचरणेन स्वर्गफलप्राप्तिर्भवेत्; मोक्षिणां तु तादृशफलप्राप्त्यनभिसन्धित्वात् सत्त्वशुद्धिद्वारा ज्ञाननिष्ठायोग्यतैव स्यात्। सर्वकर्मसंन्यासपूर्वकादेव हि ज्ञाननिष्ठालक्षणाद् धर्मात् परमपुरुषार्थसिद्धिश्च भवति। परमेश्वरादेव सर्वभूतानामुत्पत्तिः, उत्पन्नानां च जीवनव्यापारश्च इत्यभिप्रायो 'यतः प्रवृत्तिः' इति विशेषणम् । **'यतो वा इमानि भूतानि जायन्ते । येन जातानि जीवन्ति । यत् प्रयन्त्यभिसंविशन्ति'** (तै.३-१) इति हि विज्ञायते । तदभिप्रायकमिदं भगवतो वचनम् । ईश्वरायत्तैव तु प्रवृत्तिरिति भावनापूर्वकं तदभ्यर्चनार्थं कर्माण्यनुष्ठेयानीत्यभिप्रायः। 'येन सर्वमिदं ततम्' इत्यनेन साध्यात्मकस्य जगतः सर्वस्यैव तेनैव व्याप्तत्वात् मदीयशरीरेन्द्रियमनसामपि तेनैव व्याप्तिः, तच्चैतन्यसंनिधावेव

१०. आकरग्रन्थे त्रुटितम्, अपेक्षितं तु ।

कार्यकरणव्यापारः सर्वोऽपि निर्वर्त्यत इति भावेन शास्त्रीयकर्मवत् सामान्यक्रियातत्फलान्यपि तस्मै समर्पणीयानीत्याशयो गम्यते। उक्तं ह्यन्यत्रापि –

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि कौन्तेय तत्कुरुष्व मदर्पणम् ।।

शुभाशुभफलैरेवं मोक्ष्यसे कर्मबन्धनैः ।
संन्यासयोगयुक्तात्मा विमुक्तो मामुपैष्यसि ।।९-२७,२८।।

– इति ।।

एतेन इदमपि सूचितं भवति यत् समत्वबुद्धियुक्तैर्मुमुक्षुभिः क्रियमाणलौकिकवैदिकोभयविधकर्मणामपि भगवते समर्पणं कर्मबन्धविमोक्षहेतुर्भवतीति स एव सर्वाङ्गसंपूर्णः कर्मयोगशब्दवाच्योऽभिमतो भगवता इति ।।

४०. तत्र कर्मयोगाद्यनुष्ठानेनैव द्वारेण मन्दमध्यमाधिकारिणोर्नैष्कर्म्यं सुखेन संपादितं भवतीत्यत्र को हेतुरिति? अत्रोच्यते – उक्तपूर्वमिदं यत् त्रिगुणात्मके संसारे सत्त्वरजस्तमोरूपा गुणाः स्वं स्वमवकाशं प्रतिलभ्य जीवान् निबध्नन्ति । तत्रासुरसंपत्संभूता रजस्तमोभ्यामभिभूताः स्वेच्छाचारे प्रवर्तन्ते; शास्त्रदृष्टयस्तु शास्त्रीयकर्मसु काम्येषु नित्येषु वा प्रवर्तन्ते । परमसात्त्विकास्तु दैवीं संपदमाश्रिता मोक्षसाधनीभूतज्ञानोपायमन्विच्छन्ति। तेषां तु गुणत्रयात्यय एवोपायो मोक्षे । यदाह –

1) गुणानेतानतीत्य त्रीन् देही देहसमुद्भवान् ।
जन्ममृत्युजरादुःखैर्विमुक्तोऽमृतमश्नुते ।।१४-२०।।

इति ।।

एते च गुणाः प्रत्येकं स्वेतरगुणद्वयमभिभूयैव विवर्धन्ते । यदाह **भगवान्–**

2) रजस्तमश्चाभिभूय सत्त्वं भवति भारत ।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ।।१४-१०।।

इति ।।

तस्मात्, कर्मयोगानुष्ठातृभिर्मुमुक्षुभिः क्रमक्रमेण रजस्तमोगुणौ मुक्त्वा शुद्धसत्त्वमेवाश्रयितव्यं भवति । तदाह -

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ।।२-४४।।

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।।२-४५।।

इति ।।

काम्यकर्मानुष्ठानेन भोग ऐश्वर्यं च संपादनीये मयेति भोगैश्वर्ययोरेवासक्तबुद्धीनां विविधभोगैश्वर्यश्रुत्यपहृतबुद्धीनां सर्वकर्मसंन्यासपूर्वकज्ञाननिष्ठैवैका लब्धव्या इत्यध्यवसायात्मिका बुद्धिर्नास्ति, तादृश बुद्धिसंपादनार्थं प्रथमं कर्मयोगः फलासक्तित्यागपूर्वकमनुष्ठेय इति प्रथमश्लोकार्थः। वेदाः त्रिगुणात्मकसंसारगतसाध्यफलतत्त्वमेव प्रकाशयितुं प्रवृत्ताः । कर्मयोगी तु मोक्षकाम इति तेन त्रिगुणातीतत्वं संपादनीयम् । तत्रापि रजस्तमसी अभिभूय शुद्धसत्त्वप्रधानेन भवितव्यम् । इदं लब्धव्यमित्युपादानञ्च योगः; उपात्तस्य च रक्षणं क्षेमः। तौ निर्गतौ यस्मात्तादृशेनापि भवितव्यं व्यवसायात्मिकबुद्धिलिप्सुना - इति द्वितीयश्लोकार्थः। अत्र **भाष्यकारेणोक्तं** योगलक्षणमप्यनुसंधेयम् - '**निःसङ्गतया द्वन्द्वप्रहाणपूर्वकम् ईश्वराराधनार्थं कर्मयोगः**' (गी.भा. २-३९) इति ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'कर्मयोगोपदेशो' नाम**
**अष्टमं सोपानम्**

# ९. विभूतियोगोपदेशः

४१. यद्यपि परमार्थदृष्ट्या सर्वमेवेदं चेतनाचेतनात्मकं जगद् वासुदेवाख्यात् परब्रह्मण एवोत्पन्नम्, तस्मिन्नेव स्थितम्, तमेवाश्रिताः सर्वे जीवाः स्वस्वव्यापारेषु प्रवर्तन्ते इति सर्वमेवेदं तदात्मकमेवेति, तथाप्यासुरदोषदूषिताशयाः नैव तं भगवन्तं सनातनं पश्यन्ति। अतः सोपानक्रमेण तद्दर्शनमाविष्कारयितुमुक्तम् -

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।१८-४६।।

-इति । तेन च कर्मयोगेन दान्तास्तामसीमासुरीं चित्तवृत्तिं विजेतुं शक्नुवन्ति । एतेषां विजितकर्मेन्द्रियाणां क्रमेण ज्ञानेन्द्रियमनोबुद्धि विजयमार्गे समानेतुमुत्तरो ग्रन्थः ।।

४२. अत्र सन्मार्गे प्रवृत्तानां हि कामक्रोधलोभाश्रयभूतोऽहंकार एव प्रतिबन्धकः। तत्र स्वकर्मणा भगवदभ्यर्चनेनाहंकारविजये प्रथमं सोपानं विहितम् । तेनैव ह्यात्मोद्धारः कृतः स्यात् । यथोक्तम् -

उद्धरेदात्मनात्मानं नात्मानमवसादयेत् ।
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।।

बन्धुरात्मात्मनस्तस्य येनात्मैवात्मना जितः ।
अनात्मनस्तु शत्रुत्वे वर्तेतात्मैव शत्रुवत् ।।६-५,६।।

इति ।।

४३. तत्रासन्मार्गे प्रवृत्तस्य ततो निवृत्त्या कथमात्मा उद्धर्तव्य इत्येतद् बुभुत्सोरर्जुनस्य प्रश्नः, श्रीकृष्णभगवतः प्रतिवचनं चेत्थम् -

अर्जुन उवाच -

अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः ।
अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः ॥

श्रीभगवानुवाच -

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ॥३-३६,३७॥

न कोऽप्यात्मनोऽन्यः प्रवर्तयति पुरुषमासुरकर्मणि, किन्तु अहंकारलक्षणा विद्याकार्यभूतकाम एव प्रवर्तको दोषोऽन्तः। न च कामः कामानामनन्तानामप्युपभोगेन शाम्यति, किन्तु भूयो भूयोऽभिवर्धमानः प्रवर्तयत्येव पुरुषमधोगतिमार्गे - इत्यर्थः । अथ किमाश्रित्यायं पुरुषमसत्पथे नेतुं प्रभवतीत्यत आह -

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ॥३-४०॥

तस्मात् त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहिह्येनं ज्ञानविज्ञाननाशनम् ॥३-४१॥

- इति॥

तस्मात् प्रथममिन्द्रियनिग्रहेणैवात्मानमुद्धरेदात्मना पुरुषः- इत्युक्तं भवति ॥

४४. तत्राहंकारदोषदूषितान्तःकरणाः सर्वं भगवतैव व्याप्तमपि गुणदोषविभक्तं पश्यन्ति । ततश्च रागद्वेषप्रयुक्तैरिन्द्रियैस्तत्र तत्र प्रवर्तन्ते, ततस्ततो निवर्तन्ते चेत्यतः कर्मेन्द्रियाणि भगवदभ्यर्चने, ज्ञानेन्द्रियाणि च भगवद्दर्शने नियोजयेत् कामक्रोधादिप्रहाणेप्सुः - इत्यर्थात् सिध्यति ।

अतः कर्मयोगोपदेशानन्तरं सर्वत्र भगवद्भावनालक्षणभगवद्विभूतियो-गोपदेशं परिशीलयेत् साधक इति श्लिष्यते ॥

४५. तत्र यद्यपि परमार्थतत्त्वस्य यथावस्थितज्ञानेनैव तद्गता अविद्या अपगच्छेत्, ततश्च सर्वमिदं भगवतैव ततमिति 'वासुदेव एव सर्वम्' इत्यवबोधेनाविद्याप्रत्युपस्थापितं सर्वमेवेदं स्वप्नदृष्टवस्तुप्रपञ्चवत् स्वत एव प्रविलीयेतेति तत्त्वं तथाप्यनाद्यविद्यावासनाप्रदर्शितप्रपञ्चस्य सत्यत्वमेवाभिमन्यते लोकः, इत्यतोऽविद्याकृतसत्यत्वभावना भगवद्भाव नयैवापनेतुं सुकरा अज्ञानामिति विभूतिभावनारूप एव योगः समुपदि-श्यते भगवता । अत एव श्रुतावपि परमात्मोपासना चोदिता मध्यमाधि-कार्युपकाराय । यथोपासनं च फलं निर्दिष्टम् - 'तं यथा यथोपासते तदेव भवति' (श.ब्रा. १०-५-२-२०) । अतो यथावस्थितात्मज्ञाना पेक्षया भावनाऽपरपर्यायं भगवद्विभूतिचिन्तनमेव शीघ्रतरं बुद्धिमारोहति व्यावहारिकबुद्ध्याश्रितानामधिकारिणामिति तदर्थं विभूतियोगोपदेश एव कर्मयोगोपदेशानन्तरं परिशीलनीय इति सर्वं परिशुद्धम् ॥

४६. भवगद्भावना केषु केषु भावेषु विशेषतः कर्तव्या इत्येद् बुभुत्सुरर्जुनः पप्रच्छ-

न हि ते भगवन् व्यक्तिं विदुर्देवा न दानवाः ॥

स्वयमेवाऽऽत्मनाऽऽत्मानं वेत्थ त्वं पुरुषोत्तम ।
भूतभावन भूतेश देवदेव जगत्पते ॥

वक्तुमर्हस्यशेषेण दिव्या ह्यात्मविभूतयः ।
याभिर्विभूतिभिर्लोकानिमांस्त्वं व्याप्य तिष्ठसि ॥

कथं विद्यामहं योगिंस्त्वां सदा परिचिन्तयन् ।
केषु केषु च भावेषु चिन्त्योऽसि भगवन्मया ॥

विस्तरेणाऽऽत्मनो योगं विभूतिं च जनार्दन ।
भूयः कथय तृप्तिर्हि शृण्वतो नास्ति मेऽमृतम् ।।
१०-१४श्लोकप्रभृति १८श्लोकपर्यन्तम् ।।

– इति ।।

अत्र भगवतो योगैश्वर्यशक्तेः तत्र तत्र विशिष्टरूपेणाभिव्यक्तेश्च तत्त्वं दानवाः न विदुः, मायामोहितत्त्वात्; देवा न विदुः, परिच्छिन्नदृष्टित्वात् – इत्युक्तमर्जुनेन । भगवतापि पूर्वमेवोक्तं सोपपत्ति –

न मे विदुः सुरगणाः प्रभवं न महर्षयः ।
अहमादिर्हि देवानां महर्षीणां च सर्वशः ।।१०-२।।

– इति ।।

सर्वस्यापि जगतो देवर्षिपित्रादिपर्यन्तस्य भगवानेवोत्पत्तिकारणमिति युक्तमेव, ते न विदुर्भगवतो माहात्म्यमिति । अतोऽर्जुनः पृच्छति स्म 'यतस्त्वं स्वयमेवात्मनो निरतिशयज्ञानैश्वर्यशक्तिबलवीर्यतेजोवन्तमात्मानं वेत्थ, अतः स्वयमेव तव योगं विभूतिं च विस्तरेण कथयितुमर्हसि' इति। तद्ध्यानेन यथाहं दैवीं संपदं कृत्स्नतयासाद्य त्वत्तत्त्वं वेदितुं प्रभवेयं तथा कथय – इति प्रश्नाभिप्रायः ।।

४७. अत्र 'वक्तुमर्हस्यशेषेण'(१०-१६), 'विस्तरेणात्मनो योगं विभूतिं च कथय'(१०-१८) इति पृष्टो भगवान् तदशक्यत्वं प्रथममेव प्रतिजानीते –

हन्त ते कथयिष्यामि दिव्या ह्यात्मविभूतयः ।
प्राधान्यतः कुरुश्रेष्ठ नास्त्यन्तो विस्तरस्य मे ।।१०-१९।।

–इति । सर्वमिदं हि मया ततमिति मम विभूतीनां तन्मूलभूतयोगस्य वा इयत्तया आख्यानमशक्यम्। अतः प्राधान्येनैव कथयिष्यामि। तेनैवानुमेयं मम माहात्म्यं योगश्चेत्यभिप्रायः। अत्र सामान्यतस्तावदिदं ज्ञेयं भवतेत्याह–

अहमात्मा गुडाकेश सर्वभूताशयस्थितः ।
अहमादिश्च मध्यं च भूतानामन्त एव च ।।१०-२०।।

-इति। अहं सर्वेषां भूतानाम् आकाशादीनाम् , जीवाविष्टानां च ब्रह्मादि-स्थावरान्तानामात्मा इति ध्येयः। वक्ष्यति च -

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति ।।१८-६१।।

इति । सोऽसौ ईश्वरोऽहम् इति ध्येयोऽहमिति। तत्र हेतुरिदम्- अहमादि र्मध्योऽन्तश्च भूतानाम् । अतः सर्वजगदुत्पत्तिस्थितिप्रलयकारणोऽहम् । भगवान् सृष्ट्वेदं जगत्, सर्वभूतानामात्मत्वेन प्रविष्टस्तेषां हृदि वर्तते इति ध्येयोऽहम् इत्यभिप्रायः। अत्राशक्तेन तु वक्ष्यमाणेषु भावेष्वादित्यादिषु ध्येयः- इत्याशयः ।।

४८. अत्र विशिष्टकथिता 'आदित्यानामहं विष्णुः' (१०-२१) इत्याद्याः 'यच्चापि सर्वभूतानां बीजं तदहमर्जुन' (१०-३९) इत्यन्ताः, आध्यात्मिकाधिभौतिकाधिदैविका भावाः, केवलमुदाहरणार्थं निर्दिष्टा नेयन्त एवेति परिगणनार्थम्; 'प्राधान्यतः कथयिष्यामि' इति हि प्रत्यज्ञास्त भगवान् । तदनुरूपमेवोपसंहरिष्यन् भूयोऽपि, 'अहमात्मा गुडाकेश सर्वभूताऽऽशयस्थितः' (१०-२०) इति यत्प्रतिज्ञातं तदनुगुणमेव, सामान्यं तावदाह- 'न तदस्ति विना यत् स्यान्मया भूतं चराचरम्' (१०-३९) इति ।।

सर्वमेव च भूतं मदात्मकमिति चिन्तयेत्यर्थः। अथ यदवोचत् - 'नास्त्यन्तो विस्तरस्य मे' (१०-१९) इति तदपि स्मारयत्युत्तरार्थम् -

नान्तोऽस्ति मम दिव्यानां विभूतीनां परन्तप ।
एष तूद्देशतः प्रोक्तो विभूतेर्विस्तरो मया ।।१०-४०।।

इति ।।

४९. कथं तर्हि प्रत्यभिजानीयां तव विभूतिविशेषाननुक्तान्?

तत्राह–

यद्यद्विभूतिमत्सत्त्वं श्रीमदूर्जितमेव वा ।
तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम् ।।१०–४१।।

– इति ।।

यत्र यत्र विभूत्याद्यतिशयश्चित्ताकर्षको भवति तत्तद्वस्तु मम 'तेजोंऽशसंभवम्' इत्यवगन्तव्यम् । तत्र सर्वत्रापीश्वरभावना कर्तव्या। तेन च रजस्तमोमलापकर्षणं चित्तस्य भवति शुद्धसत्त्वप्रधानं च सत् भगवतः कृत्स्नस्य रूपस्य भावनायां तत्त्वचिन्तने वा योग्यं भवतीत्यर्थः ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'विभूतियोगोपदेशो' नाम**
**नवमं सोपानम्**

# १०. विश्वरूपोपासनोपदेशः

५०. यस्य विशुद्धसत्त्वस्य बाह्यविषयेष्वहं ममेति बुद्धिर्नोदेति विभूत्याद्यतिशयवत्सु भगवत्तेजोंऽशसंभूतत्वदर्शनमेव संस्कारबलादुदेति च, तस्य तदनन्तरं कतमत्सोपानमधिरोढव्यं भवति ?–इत्यत्र भगवत उपदेशोऽयम् –

अथवा बहुनैतेन किं ज्ञातेन तवार्जुन ।
विष्टभ्याहमिदं कृत्स्नमेकांशेन स्थितो जगत् ।।१०–४२।।

इति। व्यष्टीनां विभूतीनां ज्ञानेन तादृशपुरुषविशेषस्य प्रयोजनं नास्ति । अशेषजगद्रूपेणैव भगवतोंऽशोऽवभासते इति ध्येयं तेन – इत्यर्थः ।।

५१. व्यष्टिभूतेषु विभूतिविशेषेषु भगवद्भावनातस्तत्तदुपाधिविशेषानुगुणमेव फलं भवति – 'यथा क्रतुरस्मिँल्लोके पुरुषो भवति तथेतः प्रेत्य भवति' (छां. ३-१४-१) इति श्रुतेः । 'तं तमेवैति कौन्तेय सदा तद्भावभावितः' (८-६) इति भगवद्वचनाच्च । एवं च यथैव व्यष्ट्युपासनात् तदनुगुणं परिच्छिन्नमेव फलं भवति, एवमेव समष्टिभूतविश्वरूपं परमेश्वरमुपासीनस्य तत्प्राप्तिरेव फलं भवितेत्युपपद्यते। किञ्च 'को न आत्मा किं ब्रह्म' (छां. ५-११-१) इत्युपक्रम्य 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य मूर्धैव सुतेजाः, चक्षुर्विश्वरूपः, प्राणः पृथग्वर्त्मात्मा, संदेहो बहुलो, बस्तिरेव रयिः, पृथिव्येव पादौ' (छां.५-१८-२) इति यादृशं परमेश्वरस्य वैश्वानराख्यस्य रूपं श्रूयते तादृशमेवात्रापि भगवतो विश्वरूपं वर्ण्यते – '**द्यावापृथिव्योरिदमन्तरं हि व्याप्तं त्वयैकेन दिशश्च सर्वाः**' (११-२०) इत्यादिरूपम्। सर्वदेवात्मकश्चायं भगवतः कायः ।।

पश्यामि देवांस्तव देव देहे
सर्वांस्तथा भूतविशेषसङ्घान् ।
ब्रह्माणमीशं कमलासनस्थ-
मृषींश्च सर्वानुरगांश्च दिव्यान् ।।

नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ।।११-१५,१६ ।।

-इत्यादि। अतस्तदुपासनात् तदनुरूपमेव फलं भवेदिति श्लिष्यते। तथा च प्रतिजानीते भगवान् –

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।।

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव ।।११-५४,५५।।

-इति। अतः सर्वमिदं शुद्धम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्री सच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ 'विश्वरूपोपासनोपदेशो' नाम दशमं सोपानम्**

# ११. अक्षरब्रह्मोपासनोपदेशः

५२. अथ यथा ब्रह्मणो विश्वरूपोपासनं ब्रह्मप्राप्तिफलकम्, तथा निरुपाधिकब्रह्मोपासनमप्यस्ति ब्रह्मप्राप्तिफलकं शास्त्रेऽस्मिन्नुपदिष्टमिति तदपीह परिशीलनीयम् । सोपाधिकब्रह्मविषयकविचारानन्तरं हि निरुपाधिकविचारः क्रमप्राप्त इति ।।

यद्यपि 'वासुदेवः सर्वम्' इत्येव परमः शास्त्रसिद्धान्तः तथापि न सर्वे तत्र ज्ञाने साक्षादधिकारिणो भवन्तीति मन्दमध्यमाधिकारिणामुपकाराय ब्रह्मोपासनान्यपि विहितानीति ब्रह्मज्ञानोपदेशात् प्रागुपासनाविचारः प्रवर्तनीय इत्यतोऽपि निरुपाधिकोपासनाविचारोऽत्र प्राप्तः ।।

५३. (१) विश्वरूपोपासनं निरुपाधिकब्रह्मोपासनं चेत्येकस्मिन्नुभयमपि कर्मयोगानुष्ठानात् विशुद्धचित्तानामन्तरङ्गं ब्रह्मप्राप्तौ। यज्ञादिलक्षणं तु कर्म तत्प्राप्तावारादुपकारकमेव न तु साक्षात् । यत आह -

(1) न वेदयज्ञाध्ययनैर्न दानैर्न
च क्रियाभिर्न तपोभिरुग्रैः ।
एवंरूपः शक्य अहं नृलोके
द्रष्टुं त्वदन्येन कुरुप्रवीर ।।११-४८।।

नाहं वेदैर्न तपसा न दानेन न चेज्यया ।
शक्य एवंविधो द्रष्टुं दृष्टवानसि मां यथा ।।

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परन्तप ।।११-५३,५४।।

इति विश्वरूपोपासनाफलनिरूपणे । वेदाध्ययनादिभिर्महाक्लेशसाध्यैरपि न साक्षाल्लभ्यं विश्वरूपदेहतत्त्वमेतत् किं तूपासनारूपलक्षणानन्यभक्तिद्वारेणैवेत्यभिप्रायः ।।

(2) वेदेषु यज्ञेषु तपःसु चैव
दानेषु यत्पुण्यफलं प्रदिष्टम् ।
अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ।।८-२८।।

इति चाक्षरब्रह्मोपासनाफलनिरूपणे ।।

वेदाध्ययनयज्ञादिमहासाधनैर्यद्यत्पुण्यफलं प्रदिष्टं स्वर्गपर्यन्तं तत्सर्वमप्यतीत्यायमक्षरब्रह्मोपासको योगी तैरपि साक्षादलभ्यमक्षरब्रह्माख्यमाद्यं परं स्थानमुपैतीत्यर्थः ।।

(२) उभयोरपि शास्त्रसमर्पितस्योपास्यरूपस्य विषयीकरणेन सामीप्यं मनसा उपगम्य तैलधारावत् समानप्रत्ययप्रवाहेण दीर्घकालं तत्रैवासनमेवोपासनारूपम् । उपास्यरूपानुगुणमेव च फलमुपलभ्यते । तद्यथा-

(1) मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ।।१२-८।।

इति संकल्पविकल्पात्मकं मनो विश्वरूपे एव समाधाय, बुद्धिमप्यध्यवसायलक्षणां तस्मिन्नेव निवेश्य यावज्जीवमुपासीनस्य तत्स्वरूपसाक्षात्कारपूर्वकं शरीरपातादूर्ध्वं तस्मिन्नेव तदात्मना निवासः फलमित्युक्तम् ।।

2) अनन्यचेताः सततं यो मां स्मरति नित्यशः ।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः ।।८-१४।।

इति सातत्येन यावज्जीवमनन्यचित्तेन सदा अक्षरब्रह्मण्येव समाहितचित्तस्यैव अक्षरप्राप्तिरूपं फलं निर्दिष्टम् ।।

(3) आब्रह्मभुवनाल्लोकाः पुनरावर्तिनोऽर्जुन ।
मामुपेत्य तु कौन्तेय पुनर्जन्म न विद्यते ।।८-१६।।

इति कार्यब्रह्मलोकं गतानामपि पुनरावृत्तिरस्ति, अक्षरब्रह्मप्राप्तानां तु ब्रह्मात्मनैवावस्थानात् पुनरावृत्तिरहितं फलमित्युपास्यार्थानुगुणमेवोक्तम्। स्फुटीकृतं चैतत् -

परस्तस्मात्तु भावोऽन्योऽव्यक्तोऽव्यक्तात् सनातनः ।
यः स सर्वेषु भूतेषु नश्यत्सु न विनश्यति ।।

अव्यक्तोऽक्षर इत्युक्तस्तमाहुः परमां गतिम् ।
यं प्राप्य न निवर्तन्ते तद्धाम परमं मम ।।८-२०,२१।।

इति । कार्यब्रह्मणोऽपि परमव्यक्तं जगतोऽव्याकृतं बीजम्; ततोऽपि ह्यक्षराख्यं ब्रह्म परम्, कूटस्थनित्यत्वात्। अतस्तं प्राप्य न निवर्तन्ते इति युक्तमेवेत्यर्थः ।।

५४. इयांस्त्वत्र विशेषः - विश्वरूपं ब्रह्म साकारं सगुणं च -

अनेकबाहूदरवक्त्रनेत्रं
पश्यामि त्वा सर्वतोऽनन्तरूपम् ।
नान्तं न मध्यं न पुनस्तवादिं
पश्यामि विश्वेश्वर विश्वरूप ।।

किरीटिनं गदिनं चक्रिणं च
तेजोराशिं सर्वतो दीप्तिमन्तम् ।
पश्यामि त्वां दुर्निरीक्ष्यं समन्ताद्
दीप्तानलार्कद्युतिमप्रमेयम् ।।११-१६,१७।।

इत्याद्यद्भुतरूपवत्ववचनात् ।।

स्थाने हृषीकेश तव प्रकीर्त्या
जगत्प्रहृष्यत्यनुरज्यते च ।
रक्षांसि भीतानि दिशो द्रवन्ति
सर्वे नमस्यन्ति च सिद्धसङ्घाः ।।११-३६।।

- इत्यादिना सगुणत्वसंकीर्तनाच्च ।।

अक्षरं तु ब्रह्म -

यदक्षरं वेदविदो वदन्ति
विशन्ति यद्यतयो वीतरागाः ।
यदिच्छन्तो ब्रह्मचर्यं चरन्ति
तत्ते पदं संग्रहेण प्रवक्ष्ये ।।८-११।।

इति वेदविद्वदनविशेषणात् । 'अक्षरं ब्रह्म परमम्' (८-३) इति च परमत्वविशेषणाच्च 'एतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति अस्थूलम नण्वह्रस्वमदीर्घम्' (बृ.३-८-८), 'अथ परा यया तदक्षरमधिगम्यते'

(मुं. १-१-५) 'स यो ह वै तदच्छायमशरीरमलोहितं शुभ्रमक्षरं वेद-यते' (प्र. ४-१०) इत्यादिभिः श्रुतिभिः समर्पितं निर्गुणं निराकारं चोपास्यमिति ।।

५५. अथ कथमेतादृशं प्रत्यस्तमितसर्वविशेषं ब्रह्म शक्यमुपासि-तुम्? उपासनं हि नाम यथाशास्त्रसमर्पितम् उपास्यार्थमुपगम्य दीर्घकालं मनसा तत्रैवासनम् । न च निर्विशेषं वस्तु मनसा विषयीकर्तुमलं कश्चिदपि। श्रुतिश्च प्रत्यक्षमुपासनाकर्मत्वं ब्रह्मणो निषेधति - 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के. १-६) इति। अत्रोच्यते - अत्र ब्रह्मणः साक्षादुपासना नोपादिश्यते, किं तर्हि ओंकारप्रतीकद्वारा । तदुक्तं **भाष्ये** -

**" 'स यो ह वै तद्भगवन्मनुष्येषु प्रायणान्तमोंकारमभिध्यायीत। कतमं वाव स तेन लोकं जयतीति। तस्मै स होवाच । एतद्वै सत्यकाम परं चापरं च ब्रह्म यदोंकारः' (प्र. ५-१,२) इत्युपक्रम्य 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत .... स सामभिरुन्नीय-ते ब्रह्मलोकम्' (प्र.५-५) इत्यादिना वचनेन, 'अन्यत्रधर्मादन्यत्रा धर्मात्' (क.१-२-१४) इति चोपक्रम्य 'सर्वे वेदा यत्पदमामनन्ति तपांसि सर्वाणि च यद्वदन्ति। यदिच्छन्तो ब्रह्मचर्यं चरन्ति तत्ते पदं संग्रहेण ब्रवीम्योमित्येतत्' (क.१-२-१५) इत्यादिभिश्च वचनैः परस्य ब्रह्मणो वाचकरूपेण, प्रतिमावत् प्रतीकरूपेण वा, परब्रह्मप्रतिपत्ति साधनत्वेन मन्दमध्यमबुद्धीनां विवक्षितस्य ओंकारस्य उपासनं कालान्तरे मुक्तिफलमुक्तं यत्, तदेव इहापि 'कविं पुराणमनुशासितारम्' (८-९), 'यदक्षरं वेदविदो वदन्ति' (८-११) इति च उपन्यस्तस्य परस्य ब्रह्मणः पूर्वोक्तरूपेण प्रतिपत्त्युपायभूतस्य ओंकारस्य कालान्तरमुक्ति फलम् उपासनं योगधारणासहितं वक्तव्यं, प्रसक्तानुप्रसक्तं च यत्किञ्चित् इत्येवमर्थम् उत्तरो ग्रन्थ आरभ्यते"**(गी.भा. ८-१२) इति ।।

अतो न दोषः ।।

५६. अत्र **प्रश्नोपनिषदि 'प्रायणान्तमोंकारमभिध्यायीत'** (प्र.५-१) इत्येतद् व्याख्यानावसरे भाष्यकारैर्यदुक्तं तदनुलिख्यते मुमुक्षूणां प्रकृतोपासनास्वरूपादिविज्ञानार्थम् -

**''स यः कश्चित् ह वै भगवन् मनुष्येषु मनुष्याणां मध्ये तत् अद्भुतमिव प्रायणान्तं मरणान्तं, यावज्जीवमित्येतत् । ओंकारम-भिध्यायीत आभिमुख्येन चिन्तयेत्। बाह्यविषयेभ्य उपसंहृतकरणः, समाहितचित्तः भक्त्यावेशितब्रह्मभावः ओंकारे, आत्मप्रत्ययसंताना विच्छेदो भिन्नजातीयप्रत्ययान्तराखिलीकृतो निवातस्थदीपशिखासमोऽ भिध्यानशब्दार्थः। सत्यब्रह्मचर्याहिंसापरिग्रहत्यागसंन्यासशौचसंतोषा मायावित्वाद्यनेकयमनियमानुगृहीतः स एवं यावज्जीवव्रतधारणः। कतमं वाव अनेके हि ज्ञानकर्मभिर्जेतव्या लोकास्तिष्ठन्ति - तेषु तेनों-काराभिध्यानेन कतमं स लोकं जयति''** ।। (प्र.भा ५-१)

इति। अत्र अभिध्यानशब्दनिर्वचनमभिसंदधाना इदमवश्यमवगच्छेरन्, यत् प्रश्नोपनिषद्वचनमिदमुदाहरन् भाष्यकारो मन्यते यत् **संन्यस्तसर्वकर्माण एव यमनियमादिसाधनसंपन्नाः मध्यमाधिकारिणश्चेत् ओंकारं ब्रह्मवाचक त्वेन, मन्दाधिकारिणश्चेत्प्रतीकत्वेन च ध्यातुमधिकारिण इति** -इति।।

विश्वरूपोपासनं तु पूर्वोक्तं कर्मसहितमुक्तम् -

मत्कर्मकृन्मत्परमो मद्भक्तः सङ्गवर्जितः ।
निर्वैरः सर्वभूतेषु यः स मामेति पाण्डव।। ११-५५।।

इत्युक्तेः ।।

५७. अथ कथं कर्तव्येयमुपासना?- इत्यत्र श्लोका इमे -

सर्वद्वाराणि संयम्य मनो हृदि निरुध्य च ।
मूर्ध्न्याधायात्मनः प्राणमास्थितो योगधारणाम् ।।८-१२।।

[सर्वेन्द्रियसंयमपूर्वकं मनश्च हृदयपुण्डरीके एव ऐकाग्र्येण वृत्तिशून्यं

कृत्वा तत्रस्थसुषुम्नानाडीमार्गानुसारेण मूर्धानं गत्वा तत्रैव चित्तक्रियाधारणां कुर्वीत।]

ओमित्येकाक्षरं ब्रह्म व्याहरन्मामनुस्मरन् ।
यः प्रयाति त्यजन् देहं स याति परमां गतिम् ।।८-१३।।

[ओंकारं ब्रह्मवाचकत्वेन ध्यायति चेद् ओंकारं मनसा अभिव्याहरन् तदर्थभूतं भगवन्तं च चिन्तयन् - देहत्यागं कुर्यात् । प्रतीकत्वेन चेत् समुपास्ते तदा ओंकारस्मरणमेव भगवदनुस्मरणं स्यादिति स्पष्टम्। अन्तकालेऽपि भगवच्चिन्तनानुवृत्तिसातत्यं वाक्ये तत् सूचितम् 'अनुस्मरन्' इत्यनेन ।।]

अनन्यचेतास्सततं यो मां स्मरति नित्यशः।
तस्याहं सुलभः पार्थ नित्ययुक्तस्य योगिनः।। ८-१४।।

मरणकालेऽनुचिन्तनावृत्तिस्तु यावज्जीवमुपासीनस्यैव लभ्येतेत्येतद्दर्शितमत्र। अत्र **भाष्यमिद**मनुसंधेयम् - ''**अनन्यचेताः नान्यविषये चेतो यस्य सोऽयमनन्यचेताः योगी सततं सर्वदा यो मां परमेश्वरं स्मरति नित्यशः। 'सततम्' इति नैरन्तर्यमुच्यते, 'नित्यशः' इति दीर्घकालत्वमुच्यते । न षण्मासं वा संवत्सरं वा, किं तर्हि यावज्जीवं नैरन्तर्येण यो मां स्मरति इत्यर्थः। तस्य योगिनोऽहं सुलभः सुखेन लभ्यः**'' (गी.भा. ८-१४)। एवं च 'आदरसत्कारपूर्वकं यावज्जीवमुपासनं कर्तव्यम्' इत्युक्तं भवति।।

५८. न केवलमुपासनमेव सततं यावज्जीवं कर्तव्यं किन्तु, अन्तवेलायामपि भगवत्स्मरणानुवृत्त्या भाव्यमित्याह -

अन्तकाले च मामेव स्मरन् मुक्त्वा कलेवरम् ।
यः प्रयाति स मद्भावं याति नास्त्यत्र संशयः ।।८-५।।

इति। तत्रोपपत्तिः -

यं यं वापि समरन्भावं त्यजत्यन्ते कलेवरम् ।

तं तमेवैति कौन्तेय सदा तद्भावभावितः ।।८-६।।

इति ।।

५९. यद्यप्यक्षरं ब्रह्म सर्वगतमिति न तत्प्राप्तये देशकालादिव्यवहिता गतिरपेक्ष्यते, तथापि सम्यग्दर्शनहीनानां कालाद्यपेक्षयैव प्राप्तिरिति शास्त्रे प्राप्तिमार्गोऽपि वर्ण्यते। अत आह भगवान्–

अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम् ।
तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ।।८-२४।।

इति ।।

अत्र अग्न्यादयः कालाभिमानिन्यो देवताः इति **भाष्ये** (गी.भा. ८-२४) व्याख्यातम्। अथवा अग्निज्योतिषोः कालाभिमानित्वाभावेऽपि भूयसा निर्देशो –

**यत्र काले** त्वनावृत्तिमावृत्तिं चैव योगिनः ।
प्रयाता यान्ति **तं कालं** वक्ष्यामि भरतर्षभ ।।८-२३।।

–इति । स आम्रवणवत् इति च ।।[११]

**शारीरकभाष्येऽपि – 'योगिनः प्रति चायम् अहरादिकाल विनियोग अनावृत्तये स्मर्यते। स्मार्ते चैते योगसांख्ये न श्रौते'–** इति सूत्राक्षरानुगुण्येन व्याख्याय तत्राऽरुच्या – **'यदा पुनः स्मृतावपि अग्न्याद्या देवता एव आतिवाहिक्यो गृह्यन्ते तदा न कश्चिद्विरोधः'** (सू.भा. ४-२-२१) इति पक्षान्तरमपि स्वीकृतम्।।

६०. अत्र परमात्मविदश्चेत् परिगृह्यन्ते 'गच्छन्ति ब्रह्म ब्रह्मविदो जनाः', देशपरिच्छिन्नत्वं ब्रह्मणो नावकल्पते; अथ 'ब्रह्मविदः' इति

---

११. स आम्रवणवत् इति च इति नास्ति आकरग्रन्थे, भाष्यार्थानुगुण्यार्थमपेक्षितम्।

भावनालक्षणोपासनमनुतिष्ठन्त एव, 'अक्षरं ब्रह्म परमम्' इत्युपक्रमे विशेषणं नोपपद्यते। तत्र कथमिहैकवाक्यता – इति चेत्। अत्र **सूत्रभाष्यम्** –'**त्रिमात्रेण ओंकारेण आलम्बनेन परमात्मानमभिध्यायतः फलं ब्रह्मलोकप्राप्तिः क्रमेण च सम्यग्दर्शनोत्पत्तिरिति क्रममुक्त्यभिप्रायमेतद् भविष्यतीत्यदोषः**' (सू.भा. १-३-१३) इति ॥

अत एवेहापि –

पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तस्थानि भूतानि येन सर्वमिदं ततम् ॥८-२२॥

इति। 'पर एव पुरुषो भक्त्याऽनन्यया लभ्य' इत्युक्तम्। व्याख्यातं च भाष्यकृता–

'**पुरुषः पुरि शयनात् पूर्णत्वाद्वा स परः पार्थ – परो निरतिशयो यस्मात् पुरुषान्न परं किञ्चित् । स भक्त्या लभ्यस्तु ज्ञानलक्षणया अनन्यया आत्मविषयया**' (गी.भा.८-२२) – इत्यादिना। उत्तरश्लोकावतरणिकायां तु–

'**प्रकृतानां योगिनां प्रणवावेशितब्रह्मबुद्धीनां कालान्तर–मुक्तिभाजां ब्रह्मप्रतिपत्तये उत्तरो मार्गो वक्तव्य इति 'यत्र काले' इत्यादि विवक्षितार्थसमर्पणार्थमुच्यते**' (गी.भा.८-२३) – इत्युक्तम्। तेन ब्रह्मलो–कप्राप्तिः परपुरुषभक्त्या च ज्ञानलक्षणया क्रममुक्तिरेव ब्रह्मप्राप्तिर्विवक्षिता 'गच्छन्ति ब्रह्म ब्रह्मविदो जनाः' इत्यनेनेति च गम्यते इति सर्वमनवद्यम् ॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'अक्षरब्रह्मोपासनोपदेशो' नाम**
**एकादशं सोपानम्**

# १२. ध्यानयोगोपदेशः

६१. इह खलु कर्मयोगेनेश्वरमभ्यर्च्य सिद्धिं गतानां मुमुक्षूणां द्वयी निष्ठा उक्ता भावनालक्षणोपासनया सोपाधिकब्रह्मनिरुपाधि-कब्रह्मान्यतराविष्टचेतस्तया तत्तदुपास्यं प्राप्य सम्यग्ज्ञानप्राप्तिद्वारा क्रमेण संसारान्मुक्तिः अथवा ज्ञाननिष्ठामार्गं प्रविश्य सद्योमुक्तिः-इति च । तत्र भावनामार्गं प्रविष्टानां मुक्तिर्व्याख्याता -

(१) ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ।।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ।।१२-६,७।।

इति। विश्वरूपोपासकानां योगिनां भगवत्प्रसादेन क्रममुक्तिरिति ।

(२) जरामरणमोक्षाय मामाश्रित्य यतन्ति ये ।
ते ब्रह्म तद्विदुः कृत्स्नमध्यात्मं कर्म चाखिलम् ।।७-२९ ।।

तत्र प्रयाता गच्छन्ति ब्रह्म ब्रह्मविदो जनाः ।।८-२४ ।।

अत्येति तत्सर्वमिदं विदित्वा
योगी परं स्थानमुपैति चाद्यम् ।।८-२८ ।।

-इति च, नाडीद्वारेण धारणायोगमाश्रितानाम् अक्षरोपासकानां योगिनां ज्ञानलक्षणभक्तिद्वारा क्रममुक्तिः - इति च ।।

अथ ये ज्ञाननिष्ठायोग्यताप्राप्तिद्वारा सद्योमुक्तिपथे प्रवृत्तास्तेषां निष्ठा निरूप्यते। भावनापथेन कालान्तरे मुक्तिं प्रेप्सतां ह्यपेक्षया इहैव सम्यग्ज्ञानेन मुमुक्षतां हि गतिः सूक्ष्मतरविषयत्वाद् भावनालक्षणोपासना-निरूपणानन्तरमेव सम्यग्दर्शनोपायभूतयोगनिरूपणं स्थाने इति ।।

६२. यद्यपि विश्वरूपोपासनमुपश्रुत्यार्जुनः -

एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते ।
ये चाप्यक्षरमव्यक्तं तेषां के योगवित्तमाः ॥१२-१॥

इति विश्वरूपोपासकाक्षरब्रह्मचिन्तकानां मध्ये के योगवित्तमाः? -इत्येव पृच्छति, तथाप्यत्र नैकादशोक्तविश्वरूपोपासका अष्टमाध्यायोक्ता-क्षरब्रह्मोपासकाश्चेत्युभयेषां के योगवित्तमाः? इति पृच्छ्यते; अक्षरोपास कानामोंकारप्रतीके ब्रह्मदृष्टिक्षेपणपराणामत्र वक्ष्यमाणाद्वेष्टा सर्वभूतानामि त्यादिलक्षणपूगस्याञ्जस्येनानन्वयात्, अत्रोङ्कार इत्युपास्यानुल्लेखाच्च। यद्यपि चाक्षरब्रह्मज्ञानलक्षणभक्तिभाजां सम्यग्दर्शिनां लक्षणमेवात्र विवक्ष्यते 'अद्वेष्टा सर्वभूतानाम्' इत्यादिना, तथाप्यक्षरज्ञानोपायान्वेषका एवात्राक्षरोपासका विवक्षिताः-इत्यतीतग्रन्थार्थपर्यालोचनया अवगम्यते। न हि केवलं सम्यग्ज्ञाननिष्ठा एव वर्णिता अतीतग्रन्थे, किन्तु सांख्ययोग ध्यानयोगतदुपायनिष्ठा अपीत्यतः ये भगवदुपासनामार्गे प्रविष्टाः ये च ज्ञाननिष्ठोपायमार्गे त एवात्र पृच्छ्यन्ते 'तेषां के योगवित्तमाः' इति युक्तं कल्पयितुम्। भगवत्प्रतिवचनार्थालोचनेनाप्येष एव प्रश्नार्थ इति निश्चीयते। सप्रयोजनश्चायं प्रश्नः। यत्कारणं द्विविधमिह शास्त्रे भगवदु-पासनं निःश्रेयसफलकमुपदिश्यते - भावनारूपं येनानुष्ठितेन कालान्तरे भगवन्तं प्रविशत्युपासकः, सम्यग्ज्ञानोपायानुष्ठानरूपं च येनेहैव तं प्रविशति। तद्यथा-

'विशन्ति यद्यतयो वीतरागाः' ॥८-११॥

भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन ।
ज्ञातुं द्रष्टुं च तत्त्वेन प्रवेष्टुं च परंतप ॥११-५४॥

इति च भावनारूपमुपासनं येन कालान्तरे भगवन्तं प्रविशति; 'ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति। समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम् ॥

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः। ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।' (१८-५४,५५) इति सम्यग्ज्ञानोपायानुष्ठानलक्षणं येनेहैव तं विशते। अतोऽर्जुनः पृच्छति कतरदत्र विशिष्टतरं भवेदिति जिज्ञासया। भाष्यकारकृतपातनिकातोऽप्ययमेव प्रष्टुरभिप्राय इत्यवगम्यते। कथम् ?

**''द्वितीयप्रभृतिषु विभूत्यन्तेष्वध्यायेषु परमात्मनो ब्रह्मणः अक्षरस्य विध्वस्तसर्वोपाधिविशेषस्य उपासनमुक्तम्। सर्वयोगैश्वर्यसर्व ज्ञानशक्तिमत्सत्त्वोपाधेरीश्वरस्य तव चोपासनं तत्र तत्रोक्तम्। विश्वरूपा ध्याये तु ऐश्वरमाद्यं समस्तजगदात्मरूपं विश्वरूपं त्वदीयं दर्शितमुपासनार्थमेव त्वया। तच्च दर्शयित्वा उक्तवानसि 'मत्कर्मकृद्' (११-५५) इत्यादि। अतोऽहमनयोरुभयोः पक्षयोर्विशिष्टतरबुभुत्सया त्वां पृच्छामि इत्यर्जुन उवाच'' ।।** (गी.भा. १२-१) इति ।।

[अत्र द्वितीयाद्यध्यायेष्वक्षरोपासनमुक्तम् - इत्युक्त्या गम्यते यदुपा सनमत्र ज्ञानोपायानुष्ठितिरेव न भावनारूपमिति।]

अत्र सोपाधिकोपासनात् परोक्षफलकात् विशिष्टतरं सद्यःफलकं निरुपाधिकोपासनमिति स्वत एव विज्ञायत इत्यतोऽत्र वैशिष्ट्यं पृष्टम् , न ज्यायस्त्वनिर्दिधारयिषया, किं तर्हि ? सुखतरानुष्ठेयबुभुत्सयेत्यवगम्यते। भगवत्प्रतिवचनार्थपरिशीलनेनाप्येष एव प्रष्टुरभिप्राय इति निश्चीयते । एवं ह्यत्र प्रतिवचनम्-

मय्यावेश्य मनो ये मां नित्ययुक्ता उपासते ।
श्रद्धया परयोपेतास्ते मे युक्ततमा मताः ।।१२-२।।

ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते ।
सर्वत्रगमचिन्त्यञ्च कूटस्थमचलं ध्रुवम् ।।

सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।।

क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम् ।
अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते ।।१२–३,४,५।।

इति । 'क्लेशोऽधिकतरः' इति हि भगवान् मन्यते। अतः सुखतरानुष्ठातार एवात्र युक्ततरा इत्यवगम्यते।।

६३. अत्र यद्यप्यर्जुनेन विश्वरूपोपासका एव परामृष्टाः 'एवं सततयुक्ता ये' इति, भगवता च 'ते मे युक्ततमाः' इत्यत्र; तथा प्यर्थादष्टमाध्यायोक्ता अक्षरोपासका अप्यक्षरतत्त्वविज्ञानोपायानुष्ठातृभ्यो युक्ततमा इत्युक्ता एव भवन्ति। यत ओंकारप्रणवावेशितबुद्धयो हि निरालम्बनाव्यक्ताक्षरविज्ञानोपायानुष्ठातृभ्यः सुखतरोपायज्ञा इति सर्वसंप्रतिपन्नम्। तस्मात् 'अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते' (१२–५) इति प्रतिवचनेनैव तेऽपि युक्ततमत्वेन परिगणिता भवन्तीति स्थितम् ।।

६४. तदेवं मानसभावनारूपसाधनापेक्षया सूक्ष्मतरविषयत्वाद–क्षरब्रह्मोपासनोपदेशनिरूपणानन्तरं मानसप्रणिधानरूपध्यानयोगोपदेशो निरूप्यते।।

६५. ओंकारालम्बनद्वारा अक्षरोपासकानामिव अत्रापि कर्मयोगस्य बहिरङ्गत्वमस्ति, कर्मयोगस्यापि सङ्गत्यागफलत्या–गरूपसंन्यासधर्मविशिष्टत्वात् । उपासनायां प्रवृत्तस्य तु कर्मसंन्यास एव कर्तव्यो भवतीत्युक्तम्, 'विशन्ति यद्यतयो वीतरागाः' (८–११) इति वचनबलात्। आर्थिकं तु तत्सर्वं तत्र। इह पुनः साक्षाद्वचनमेवा स्त्युभयत्रापि –

आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते ।
योगारूढस्य तस्यैव शमः कारणमुच्यते ।।६–३।।

इति। **भाष्यं** चात्र भवति-

**''आरुरुक्षोः आरोढुमिच्छतः, अनारूढस्य ध्यानयोगे अवस्थातुमशक्तस्यैव इत्यर्थः। कस्य आरुरुक्षोः? मुनेः कर्मफलसंन्यासिनः इत्यर्थः। किं आरुरुक्षोः ? योगम् । कर्म कारणं साधनमुच्यते। योगारूढस्य पुनः तस्यैव शमः उपशमः सर्वकर्मभ्यः निवृत्तिः कारणं योगारूढस्य साधनम् उच्यते इत्यर्थः। यावद्यावत् कर्मभ्य उपरमते तावत्तावत् निरायासस्य जितेन्द्रियस्य चित्तं समाधीयते। तथा सति स झटिति योगारूढो भवति। तथा चोक्तं व्यासेन – 'नैतादृशं ब्राह्मणस्यास्ति वित्तं यथैकता समता सत्यता च। शीलं स्थितिर्दण्डनिधानमार्जवं ततस्ततश्चोपरमः क्रियाभ्यः' ।।** (मो.ध.१७५-३७) **इति''** ।। (गी.भा. ६-३) इति ।।

> यदा हि नेन्द्रियार्थेषु न कर्मस्वनुषज्यते ।
> सर्वसङ्कल्पसंन्यासी योगारूढस्तदोच्यते ।।६-४।।

सङ्कल्पत्यागाद्यदा कामत्याग आवर्ज्यते तदा योगारूढो भवति। तत ऊर्ध्वं कर्मणां प्रयोजनाभावात् विक्षेपवत्वाच्च कर्मसंन्यास एव योगिना कर्तव्यः- इत्युक्तमत्र।।

६६. धारणायोग इवात्राप्यासनप्राणायामादिना योगानुष्ठानार्थं सज्जीभवितव्यम् -

> शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः ।
> नात्युच्छ्रितं नातिनीचं चैलाजिनकुशोत्तरम् ।।

> तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
> उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ।।

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः॥६-११,१२,१३,१४॥

स्पर्शान्कृत्वा बहिर्बाह्यांश्चक्षुश्चैवान्तरे भ्रुवोः ।
प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणौ ॥
यतेन्द्रियमनोबुद्धिर्मुनिर्मोक्षपरायणः ।
विगतेच्छाभयक्रोधो यः सदा मुक्त एव सः ॥५-२७,२८॥

इत्यादिवचनेभ्यः ॥

६७. योगप्रकारस्तु धारणायोगप्रकारतो भिन्न एव -

तत्रैकाग्रं मनः कृत्वा यतचित्तेन्द्रियक्रियः ।
उपविश्यासने युञ्ज्याद्योगमात्मविशुद्धये ॥६-१२॥

[आत्मविशुद्धिरत्र विक्षेपराहित्यम्, चित्तमलस्य कर्मयोगेनैव परिक्षीणत्वात्।]

समं कायशिरोग्रीवं धारयन्नचलं स्थिरः ।
सम्प्रेक्ष्य नासिकाग्रं स्वं दिशश्चानवलोकयन् ॥

प्रशान्तात्मा विगतभीर्ब्रह्मचारिव्रते स्थितः ।
मनः संयम्य मच्चित्तो युक्त आसीत मत्परः ॥६-१३,१४॥

[अत्र नाडीद्वारा भ्रूमध्ये, तत ऊर्ध्वं गत्वा च मूर्ध्नि धारणा न कर्तव्या भवति, किन्तु आत्मावेक्षणपरत्वेनानुष्ठेयम्।]

आहारविहारादिषु युक्ताचरन् आत्मन्येव चित्तं विनियच्छेत् -

सङ्कल्पप्रभवान् कामांस्त्यक्त्वा सर्वानशेषतः ।
मनसैवेन्द्रियग्रामं विनियम्य समन्ततः ॥

शनैः शनैरुपरमेद् बुद्ध्या धृतिगृहीतया ।
आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् ।।

यतो यतो निश्चरति मनश्चञ्चलमस्थिरम् ।
ततस्ततो नियम्यैतदात्मन्येव वशं नयेत् ।।

प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् ।
उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ।।

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।।६-२४,२५,२६,२७,२८।।

अत्रेन्द्रियनिग्रहः, मनस आत्मन्येव स्थापनम्, ततो योगबलादात्मन्येव च मनोविलापनम्, ततो ब्रह्मभावः - इति योगप्रक्रिया। एषा च प्रक्रिया श्रुतावध्यात्मयोगसंज्ञिता इत्थमभिवर्णिता -

यच्छेद् वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि।
ज्ञानमात्मनि महति नियच्छेत् तद्यच्छेच्छान्त आत्मनि।।
(का.१-३-१३)

इति।।

स एष प्रकारो गुरुमुखादेवाधिकारिभिर्विस्तरेणाधिगन्तव्यः।।

६८. धारणायोगस्य फलम् अग्न्यादिमार्गेण ब्रह्मप्राप्तिः (८-२४), सम्यग्ज्ञानात् क्रममुक्तिश्चेत्युक्तम् (८-२८)। इह पुनः न गतिपूर्विका ब्रह्मप्राप्तिः, सूक्ष्मदर्शिना योगिना स्वात्मनः एव ब्रह्मात्मना दर्शनम् -

युञ्जन्नेवं सदात्मानं योगी विगतकल्मषः ।
सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते।।

[ब्रह्मसंस्पर्शो नाम अन्यस्पर्शाभाव एव। अस्पर्शो नाम योगोऽयम् - इति (गौ. का.४-२) अभियुक्तैर्वर्णितो ब्रह्मात्मभाव एवायम्।]

सर्वभूतस्थमात्मानं सर्वभूतानि चात्मनि ।
ईक्षते योगयुक्तात्मा सर्वत्र समदर्शनः ॥

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ॥

[एकत्वादेव चोभयोरित्याशयः।]

सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः ।
सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥

६-२८,२९,३०,३१॥

६९. तदेवं कर्मयोगेन सिद्धिं गतो ध्यानयोगमभ्यस्य स्वात्मानमेवाद्वयब्रह्मरूपेण पश्यन् इहैव मुक्तमात्मानं पश्यन् कृतकृत्यो भवतीति प्रत्यक्षसिद्धमिदमध्यात्मविद्याफलमिति शास्त्रदृष्टफलेष्वनुपासनाफलेषु दृढविश्वासः स्यात् मुमुक्षूणामिति सर्वं सुस्थम् ॥

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'ध्यानयोगोपदेशो' नाम**
**द्वादशं सोपानम्**

# १३. सांख्ययोगोपदेशः

७०. अथ गीताशास्त्रोपदिष्टानां सर्वेषां योगसोपानानामन्तिमं सोपानं सांख्ययोगं निरूपयिष्यामः। तत्र योगशब्दः सांख्ययोग एव मुख्यवृत्त्या प्रवर्तते, युज्यते एकीक्रियते परमात्मना अनेनेति शब्दार्थयोगात्। अथ समाध्यर्थकस्य युज्यतेरपि योगशब्दो व्युत्पादयितुं शक्यते, तेन कर्मयोग ध्यानयोगावपि योगशब्दार्थौ भविष्यत इति। तत्रापि ज्ञाननिष्ठालक्षणस्य सांख्ययोगस्य सर्वथापि मुख्यवृत्त्या योगशब्दार्थत्वमुपपद्यते। इतरत्र तु कर्मयोगादौ तादर्थ्यादपि योगशब्दो गौण एवेत्यापतति। तदाह **भाष्यकारः–**

**'योऽयं योगोऽध्यायद्वयेनोक्तः ज्ञाननिष्ठालक्षणः ससंन्यासः कर्मयोगोपायः, यस्मिन् वेदार्थः परिसमाप्तः, प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च । गीतासु च सर्वास्वयमेव योगो विवक्षितो भगवता'** (गी.भा.४-१-अव.)इति।।

७१. यः पुनः –

ध्यानेनात्मनि पश्यन्ति केचिदात्मानमात्मना।
अन्ये साङ्ख्येन योगेन कर्मयोगेन चापरे।।१३-२४।।

इति साधनविकल्पोपदेश इव । तत्र नायमर्थः सांख्ययोगेन वा ध्यानयोगेन वा कर्मयोगेन वा यथायथम् अधिकारिणः पश्यन्तीति। न हि कर्मयोगेनात्मानं साक्षात् पश्यन्ति केचन, येनेत्थमपि भगवदभिप्रायः कल्प्येत। कथं तर्हि? कर्मयोगेन बहिरङ्गेन शुद्धान्तःकरणाः ध्यानयोगेन च तदभिमानं हित्वा साक्षात् पश्यन्ति केचित्। केचित्तु सांख्येनैव योगेन केवलेन पश्यन्ति सुसंस्कृतबुद्धित्वात् इत्यर्थः। एष एवाभिप्रायो भगवत

इति द्वितीयाध्यायादारभ्य यावद्द्वादशाध्यायसमाप्ति, भगवदुपदेशार्थमनने कृतपरिश्रमाणां सुनिश्चितो भवति ।।

७२. न्यायतश्च – न हि ध्यानयोगिवत् कर्मयोगिवद्वा सांख्ययोगी स्वामात्मानं किञ्चित् साधनमनुष्ठायानन्तरमेव पश्यति, किन्त्वना त्ममतितिरस्कारेणात्मन्येवात्मानं पश्यतीति सांख्ययोगादिस्वरूप तत्त्ववि-वेचनेनैव गम्यते। तथा चोदाहृतश्लोक**भाष्यम्** –

**''ध्यानं नाम शब्दादिभ्यो विषयेभ्यः श्रोत्रादीनि करणानि मनसि उपसंहृत्य, मनश्च प्रत्यक्चेतयितरि एकाग्रतया यच्चिन्तनं तद्ध्यानम्। तथा 'ध्यायतीव बकः, ध्यायतीव पृथिवी, ध्यायन्तीव पर्वताः' (छां. ७-६-१) इत्युपमोपादानात् तैलधारावत् संततोऽविच्छिन्नप्रत्ययो ध्यानम्। तेन ध्यानेनात्मनि बुद्धौ पश्यन्ति आत्मानं प्रत्यक्चेतनम् आत्मना स्वेनैव ध्यानसंस्कृतेनान्तःकरणेन केचित् योगिनः। अन्ये सांख्येन योगेन; सांख्यं नाम 'इमे सत्त्वरजस्तमांसि गुणाः मया दृश्याः, अहं तेभ्योऽन्यः तद्व्यापारसाक्षिभूतो नित्यो गुणविलक्षण आत्मा' इति चिन्तनम्, एष सांख्यो योगः। तेन, 'पश्यन्ति आत्मानमात्मना' इत्यनुवर्तते। कर्मयोगेन, कर्मैव योगः, ईश्वरार्पणबुद्ध्यानुष्ठीयमानं घटनारूपं योगार्थत्वात् योग उच्यते गुणतः, तेन सत्त्वशुद्धिज्ञानोत्प त्तिद्वारेण चापरे ।।''** (गी.भा. १३-२४)

इति ।।

एवं च **सांख्ययोगो दृग्दृश्यविवेचनात्मक एव अनुभवानु-सारितर्कयुक्, ध्यानयोगस्तु मनसः प्रत्यक्प्रवणतामापाद्यात्मन्येव प्रणिधानपूर्वकं स्थापनम्, कर्मयोगः पुनः ईश्वरार्पणबुद्ध्या कर्माण्य-नुष्ठाय चित्तसंस्कारसंपादनम् –** इत्यवगम्यते। तेन सांख्ययोगस्यैव केवलं संनिपत्योपकारकत्वमात्मावगतौ, तदितरयोस्त्वारादुपकारकत्वमिति

निश्चीयते, इत्यतोऽपि सांख्ययोगस्यैव साक्षात् ज्ञाननिष्ठाफलत्वात्तस्यैव मुख्यवृत्त्या योग शब्दवाच्यत्वम्, तदितरयोस्तु भक्त्या - इति ।।

७३. तदिदानीं सांख्ययोगप्रक्रियाभेदाः प्रदर्श्यन्ते जिज्ञासूनामुपकाराय। तत्र सांख्यं नाम परमार्थात्मतत्त्वनिरूपणम्। सांख्यं च तत् योगश्च - इति सांख्ययोगः, सांख्यमेव परमात्मना एकीभावे साधनं भवतीति। तथा च यया यया प्रक्रियया सर्वप्रत्यगात्मभूते परमात्मनि साक्षादवगतिर्जायते, सा सा सांख्ययोगशब्दवाच्येति स्थिते, प्रथमं श्रीकृष्णेन समुपदिष्टा बाल्याद्यवस्थानिरूपणप्रक्रियैव सांख्ययोगाभिख्यां तावदर्हतीति सैवात्र विव्रियते संक्षेपेण ।।

७४.

(1) देहिनोऽस्मिन्यथा देहे कौमारं यौवनं जरा।
तथा देहान्तरप्राप्तिर्धीरस्तत्र न मुह्यति ।।२-१३ ।।

अत्र देहित्वेन प्राकृतजनैर्विभाव्यमान आत्मा बाल्यकौमारयौवनजराख्यास्ववस्थासु व्यावर्तमानास्वपि तद्द्रष्टुरात्मनोऽव्यभिचरितस्वरूपेणैवानुभूयमानत्वात्, आत्मा तावन्निरवस्थ एव सन्नवस्थावानिव लक्ष्यते। एवं देहान्तरप्राप्तिरप्यव्यभिचरितस्वरूपे एव मूढैरध्यारोप्यते इत्यनुभवानुसारी तर्क उपक्षिप्तः ।।

ननु 'तथा देहान्तरप्राप्तिः' इत्यप्रसिद्धानुवादोऽयम्, न हि प्राकृता अयमात्मा जन्मान्तरगतदेहसम्बन्धीति विश्वसन्ति इति चेत्। नैष दोषः। अर्जुनस्य धर्माधर्मजन्मान्तरस्वर्गनरकादिविवेकवत एव शोकग्रस्तस्य प्रबोधनाय प्रवृत्तत्वात् भगवतः। अर्जुनो हि - 'पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः' (१-३६) - आततायिनामपि धार्तराष्ट्राणां हनने पापमेव प्राप्नुयात् इति,

अधर्माभिभवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्णसङ्करः ।।

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्तपिण्डोदकक्रियाः ॥१-४१,४२॥

इत्यादिना लोकान्तरसम्बन्ध्यात्मास्तित्वे श्रद्धां बध्नन्नेव हि पृच्छति स्म 'पृच्छामि त्वां धर्मसम्मूढचेताः' (२-७) इति । अतो नाप्रसिद्धानुवादोऽयम्; किं तर्हि, जन्मान्तरलोकान्तरसम्बन्ध्यात्मास्तित्वमभ्युपगम्यैवाप्यधिकतत्त्वमजानतोऽर्जुनस्य मोहमपनेतुं प्रयत्नः। बाल्याद्यवस्थावत्त्वमिव जननमरणाद्यवस्थावत्त्वमप्यविक्रिये एवात्मन्यध्यस्तमिति बोधयितुं प्रवृत्तिः इति सर्वमनवद्यम्॥

(2) मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्यास्तांस्तितिक्षस्व भारत॥२-१४॥

स्यादेतत् - बाल्यकौमाराद्यवस्था अध्यारोपिता आत्मनीत्येतदसत्। देही हि देहस्वामी धर्माधर्मवशाद् देहमिमं प्राप्तो, बाल्याद्यवस्थास्तथ्यत एवाश्नुते 'सोऽहम्' इति प्रतिसन्धानानुभवात्। अन्यथा हि बाल्ये कृतस्य पुण्यस्य पापस्य वा कौमारे यौवने वाऽननुवृत्तिः स्यात्; तथा च तत्तद्देहान्तरं भजमानस्य अकृताभ्यागमः कृतविप्रणाशश्च स्यादिति प्राकृतपुण्यपापफलानुभवानुपपत्तिरेव प्रसज्येतेति॥

तत्रोत्तरमिदम् - यथा देहित्वं कस्यामप्यवस्थायामनुपपन्नं तथा तत्तदवस्थाकृतत्वेन विभाव्यमानस्य पुण्यपापादेरपि संश्लेषोऽप्यनुपपन्न एव। तथा च सूक्ष्मदेहतद्धर्मतत्कर्मतत्फलैरपि संबन्धो मूढैरेवाध्यारोप्यते असंसर्गिण्यात्मनि। न चैवं शास्त्रप्रामाण्यानुपपत्तिः, शास्त्रकृत एव हि पुण्यपापसम्बन्धः, न प्रत्यक्षादिप्रमाणोपलभ्यः - इति। यतो यथाप्राप्तानुवादेन हि शास्त्रं कर्तृत्वादिकारकक्रियातत्फलाभिसम्बन्धमनूद्य कर्माणि विधत्ते । न तु कर्तृत्वादेरस्तित्वेऽपि व्याप्रियते॥

शरीरेन्द्रियसंघातं क्रियाकारकफलसत्यत्वं चाभिमन्यमान एव पुरुषः स्वभावतः। तादृशपुरुषमधिकृत्यैव शास्त्रं धर्माधर्मतत्फलसंबन्धादिकं पुरुषस्य ज्ञापयितुं प्रवृत्तं क्षपितकल्मषान्तःकरणः सन् यथा तत्त्वार्थजिज्ञासया प्रवर्तेतेति। अत एव हि वक्ष्यति –

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ।।५-१४।।

इति। अत आत्मसतत्त्वज्ञापने प्रवृत्तो भगवान् ब्रवीति –

'मात्रास्पर्शास्तु कौन्तेय शीतोष्णसुखदुःखदाः।
आगमापायिनोऽनित्याः' ।।२-१४।।

इति।नेदमत्र विवक्षितम् – 'इन्द्रियविषयसंयोगाः तथ्यत एव शीतोष्णसुखदुःखरूपद्वन्द्वं जनयन्ति। ते त्वागच्छन्त्यपगच्छन्ति चेत्यतः तांस्तितिक्षस्व' इति। न ह्यात्मनः कूटस्थनित्यतां बाल्ययौवनाद्यवस्थारहिततां च ज्ञापयितुं प्रवृत्तः सुखदुःखादितितिक्षां शिक्षयते इत्युपपद्यते। कस्तर्हि श्लोकस्यार्थः ? अयमर्थः – यथैव स्थूलशरीरतद्धर्मतत्कर्मतदवस्थाभिरसंबद्ध एवायमात्मा संबद्ध इव विभाव्यते अविवेकिभिः, दृश्यस्य शरीरादेः व्यभिचरत्स्वरूपस्य दृग्रूपात्मसंबन्धानुपपत्तेः – एवमेव सूक्ष्मशरीरतद्धर्मतत्कर्मतदवस्थाभिरसम्बन्ध एव आत्मनः, व्यभिचरत्स्वरूपत्वात् सुखदुःखादेः – इति। शीतोष्णादिर्हि बाह्यद्वन्द्वं कस्यचित् सुखहेतुरिति विभाव्यते कस्यचित्तु दुःखहेतुरिति। तथा एकस्यैव पुरुषस्य कदाचित् सुखहेतुत्वं शीतोष्णादेः, कदाचित् दुःखहेतुत्वमपीत्यत आगमापायिनः – व्यभिचरत्स्वरूपा एव ते आदावन्ते चातथाभावान्मृषैवेत्यप्यसत्त्वमेव तेषां युक्तमिति ।।

७५. स्यादेतत् – 'आगमापायिनोऽनित्याः' इति शीतोष्णादिद्वन्द्वस्यानित्यत्वमेव विवक्षितं भगवतः, नासत्यत्वम्। न ह्यागच्छतो

गच्छतश्च स्थितिकालेऽप्यसत्त्वमिति युज्यते, अनित्यत्वमेव तु। अतः कथमयं भगवद्वचनाभिप्रायः स्यात्, अन्यत्राभिनिवेशात्? भगवान् हि 'गतासूनगतासूंश्च नानुशोचन्ति पण्डिताः' (२-११) इति गतासवो वा स्युरगतासवो वा भीष्मादयः, उभयथापि ते न शोच्याः - इति प्रकृत्य 'न त्वेवाहं जातु नासं न त्वं नेमे जनाधिपाः' (२-१२) इति सर्वे षामप्यात्मनो नित्यत्वमेव प्रतिजानीते। तदुपबृंहणार्थं चात्मनो नित्यत्वं हेतुमानयति 'देहिनोऽस्मिन् यथा देहे' (२-१३) इति दृष्टान्तमुदाहरन् । एवं च यथास्मिन् देहेऽन्यामन्यां चावस्थां गच्छतो न नाशः, उत्पत्तिर्वा; एवमेव मरणानन्तरमपि देहान्तरं प्राप्स्यमानस्यापीति गम्यते-इति नित्य त्वेऽनुमानमेवैतदित्यवगम्यते। तत्कथमप्रस्तुतप्रक्रिया विरच्यते श्लोका-क्षराण्यन्यथान्यथा व्याख्यानेनेति चेत्। नैष दोषः, वाक्यशेषादुपपत्तेः। वाक्यशेषे हि भगवदुक्तिर्दृश्यते -

'य एवं वेत्ति हन्तारं यश्चैनं मन्यते हतम् ।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते' ।।२-१९।।

इति ।

'न जायते म्रियते वा कदाचित्' (२-२०) इति च इति । तत्र केवलं नित्यत्वमेव सिषाधयिषितम्, कथमिदं संगच्छेत वचनं 'न जायते' इत्यादि ? कथं च -

यदि मामप्रतीकारमशस्त्रं शस्त्रपाणयः ।
धार्तराष्ट्रा रणे हन्युस्तन्मे क्षेमतरं भवेत् ।।१-४६।।

इति, मरणादप्यबिभ्यतोऽर्जुनस्य मात्रास्पर्शान् बाह्यसुखदुःखे तितिक्षस्व - इत्युपदेशः संगच्छेत ? तस्मात् नायमात्मनित्यत्ववादः। कस्तर्हि? तत्सत्यत्ववादः। शरीरतद्धर्मतत्कर्मतत्फलादेरसत्त्ववाद एवेति सिद्धम्।।

इतश्चात्रायमेव सिद्धान्त इत्यवगम्यते। एवं च -

नासतो विद्यते भावो नाभावो विद्यते सतः।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ।।२-१६।।

इति सत्त्वासत्त्वलक्षणविभागवचनं वाक्यशेषगतं नैवोपपद्यते तेषां येऽत्रात्मनित्यत्वमेव बुबोधयिषितं न सत्यासत्यविवेकः इति मन्यन्ते[१२] ।।

७६. अपि चात्र प्रकरणे आत्मसतत्त्वज्ञानमेव प्रकृतं विस्तृतं चेत्यत्र यथा 'नासतो विद्यते भावः' इति श्लोकः, तथाऽयमपि श्लोकोऽस्ति यः-ये केवलमात्मनित्यत्वप्रतिपादनमेव प्रकरणस्य प्रयोजनं मन्यन्ते तेषामप्रसक्तप्रक्रियाऽऽपादनं भगवति दुर्वारणं स्यात् - इति निरूपयति[१३] -

अविनाशि तु तद्विद्धि येन सर्वमिदं ततम् ।
विनाशमव्ययस्यास्य न कश्चित्कर्तुमर्हति ।।२-१७।।

अस्मिन् हि श्लोके सदसतोः स्वरूपलक्षणोपस्थापनसमनन्तरमेवानीते आत्मनोऽविनाशित्वे हेतुरुच्यते 'येन सर्वमिदं ततम्' इति। अयं च श्लोकपादः शास्त्रेऽस्मिन् पुनःपुनरभ्यासेन निवेशितोऽक्षरशः अर्थतश्च -

1) पुरुषः स परः पार्थ भक्त्या लभ्यस्त्वनन्यया ।
यस्यान्तस्थानि भूतानि येन सर्वमिदं ततम् ।।८-२२।।

2) मया ततमिदं सर्वं जगदव्यक्तमूर्तिना ।।९-४।।

3) त्वया ततं विश्वमनन्तरूप ।। ११-३८।।

4) सर्वं समाप्नोषि ततोऽसि सर्वः ।।११-४०।।

5) सर्वमावृत्य तिष्ठति ।।१३-१३।।

6) यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।

१२,१३. त्रुटितमाकरग्रन्थेऽपेक्षितं तु ।

स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।।१८-४६।।

अत्र सर्वत्रापि भगवन्तमेव विशेषयितुं प्रवृत्ता 'सर्वमिदं ततम्' इति वाचोयुक्तिरिति स्पष्टम्। तत्रैवं स्थिते आत्मनोऽविनाशित्वं समर्थयितुं प्रवृत्ते प्रकरणे किं कारणं सर्वगतत्वमुच्यते ? ननु देहनाशेऽप्यविनाशी अयमात्मा इत्येवालं स्यात्। तस्मात् आत्मनः सतत्त्वं क्षेत्रज्ञेश्वरैकत्वं वक्तुमेवायं श्लोकोऽत्र निबद्धः। आत्मनश्च सतत्त्वं भगवद्भावेनावस्थितिरिति तदेव हेतूकृत्यात्मनोऽप्यविनाशित्वमुच्यते - इत्यकामैरप्यनु मन्तव्यम् ।।

७७. इतश्चायमेव निर्णयो यद्वासुदेवाख्यपरब्रह्मस्वरूपेणैवात्मनो नित्यत्वमात्यन्तिकमुच्यते, न केवलमस्मत्प्रत्ययगम्यजीवात्मरूपेणेति, यावता वाक्यशेषभूताः श्लोकाः परब्रह्मण्येवाञ्जस्येन समनुगच्छन्ति। यथा चेदं तथा दिङ्मात्रमिह दर्शयिष्यामः -

अन्तवन्त इमे देहा नित्यस्योक्ताः शरीरिणः ।
अनाशिनोऽप्रमेयस्य तस्माद्युध्यस्व भारत ।।२-१८।।

अत्र 'इमे देहाः' इति सन्निकृष्टवाचिना इदंशब्देन परामृश्यमाना देहाः, सर्वेषामप्ययमात्मा, न केवलमेकस्यैव - इत्युक्तम् । 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (१३-२) इति हि वक्ष्यति। 'नित्यस्य अनाशिनः' इति सर्वप्रकारेणापि नित्यत्वमविनाशित्वं च ब्रुवता श्रुत्यनुगमोऽपि प्रदर्शितं भवति-'अविनाशी वा अरेऽयमात्मा अनुच्छित्तिधर्मा' (बृ. ४-५-१४), 'अजो नित्यः शाश्वतोऽयं पुराणः' (का.१-२-१८) इति हि श्रूयते। एवम् 'अप्रमेयस्य' इत्यनेनापि 'एकधैवानुद्रष्टव्यमेतदप्रमयं ध्रुवम्। विरजः पर आकाशादज आत्मा महान् ध्रुवः' (बृ. ४-४-२०) इति श्रुतिरनुगता भवति। न ह्यस्मत्प्रत्ययगोचरो जीवो भवत्यप्रमेय - इति।।

य एनं वेत्ति हन्तारं यश्चैनं मन्यते हतम्।
उभौ तौ न विजानीतो नायं हन्ति न हन्यते।।२-१९।।

इहापि श्रुत्यनुगमः सुस्फुटः -

'हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्। उभौ तौ न विजानीतो नायं हन्ति न हन्यते।।' (का. १-२-१९) इति श्रुत्यक्षराणामप्यनुसरणात् । एवम् - 'न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूयः' (२-२०) इत्यत्रापि सुस्फुट एव (का. १-२-१८) श्रुत्यनुगमः। एवमुत्तरत्रापि 'वेदाविनाशिनम्' (२-२१) इत्यत आरभ्य 'अव्यक्तोऽयमचिन्त्योऽयम्' (२-२५) इति श्लोकं यावद् आत्मनः क्रियाकर्तृत्वं कर्मत्वं च निषेधयन् भगवान् संसारिणः पारमार्थिकमेव परमात्मस्वरूपं श्रुतिप्रतिपाद्यं मनसि कृत्वैवात्मस्वरूपं वर्णयति। 'तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि' (२-२५) इत्यपि 'तरति शोकमात्मवित्' (छां. ७-१-३) इति श्रुत्यनुगमः ।।

७८. इतश्च - 'अथ चैनं नित्यजातं नित्यं वा मन्यसे मृतम्' (२-२६) इति कल्पान्तरमभ्युपगम्यापि शोककारणं नास्ति - इति कृत्वाचिन्तया हि ततः पूर्वं जनिमृतिरहितमात्मतत्त्वं बुबोधयिषितमिति गम्यते। तच्च कल्पान्तरं लोकसिद्धजीवात्मानुवादीति सर्वसंप्रतिपन्नम्। देहजनिमनु जाये, तन्मृतिमनु म्रिये चाहम् - एवं जननमरणसन्तानवानहम्- इति कार्यकरणसंघाताभिमानी हि जीवो नाम। अतोऽपि पूर्वस्मिन् कल्पे जीवस्य पारमार्थिकं रूपं 'न जायते न म्रियते' इति परामृष्टमिति गम्यते। परमात्मनि जनिमृतिप्राप्तेरेवाभावान्न तस्य निषेधः परमात्मविषयः, किन्तु अध्यस्तजननमरणवति तन्निषेध इत्येव हि युक्तम् - इति ।।

'आश्चर्यवत्पश्यति कश्चिदेनम्' (२-२९) इति तु कृत्वाचिन्तापरित्यागेन, पुनरपि श्रुत्यनुगमदर्शनात् । 'आश्चर्यो वक्ता कुशलोऽस्य लब्धा । आश्चर्यो ज्ञाता कुशलानुशिष्टः।।' (का. १-२-७) इति हि श्रुतिः। अतः सर्वमनवद्यम् ।।

७९. इदं त्वत्रावधेयं कर्मयोगे इन्द्रियप्रधानदृष्टिम्, ध्यानयोगे मनःप्रधानदृष्टिं चावलम्ब्य कर्तव्यं साधनमुपदिष्टम्। इह पुनः सांख्ययोगे अनुभवप्रधानदृष्ट्या अनात्मान आगमापाया इति अन्वयव्यतिरेकलक्षण-

तर्कानुगृहीतया आत्मवस्तुस्वरूपनिर्धारणं क्रियते इति ।।

८०. द्वितीयाध्याये 'अशोच्यानन्वशोचस्त्वं' (२-११) इत्यारभ्य 'देही नित्यमवध्योऽयं' (२-३०) इति श्लोकपर्यन्तं सांख्ययोगं निरूप्य, तत ऊर्ध्वं काम्यकर्मपरित्यागपूर्वकसङ्गत्यागफलत्यागाङ्गोपेतो योगाख्यः समत्वबुद्धियुक्तः कर्मयोगः सांख्ययोगोपायत्वेनोपदेक्ष्यते। ततः पश्चात् सोपायसांख्ययोगं साधितवतः स्थितप्रज्ञत्वमुच्यते इति सर्वोऽपि गीताशास्त्रार्थः संक्षेपेणोक्तो भवति । एतस्यैवार्थस्य विवरणं तत्तत्प्रसङ्गमानीय विवरिष्यते आगामिष्वध्यायेष्विति ज्ञेयम् ।।

८१. स्थितप्रज्ञस्य लक्षणं त्विह परमार्थात्मस्वरूपं विज्ञातवतः सर्वकामप्रहाणात्, अविद्याकामकर्मलक्षणसंसारस्यात्यन्तिकोपरमः, इति ज्ञापनार्थम्, जीवत एव ब्रह्मात्मना स्थितिरिति ज्ञापनार्थं च –

प्रजहाति यदा कामान्सर्वान्पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।२-५५।।

विहाय कामान् यः सर्वान् पुमांश्चरति निःस्पृहः ।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ।।२-७१।।

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।।२-७२।।

इत्युपक्रमोपसंहाराभ्यामवगम्यते। अस्य विस्तरस्तु यथास्थाने भवितेतीहोपरम्यते ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'सांख्ययोगोपदेशो' नाम**
**त्रयोदशं सोपानम्**

# १४. सांख्ययोगसंबन्धोपदेशः

८२. सर्वशास्त्रार्थसंग्रहभूते द्वितीयेऽध्याये विशिष्य सांख्यबुद्धिः, योगबुद्धिः - इति च द्वे बुद्धी आश्रित्य प्राधान्येन शास्त्रार्थोपदेशो विभज्योपन्यस्तः। तत्र सांख्यबुद्धिनिरूपणे -

अच्छेद्योऽयमदाह्योऽयमक्लेद्योऽशोष्य एव च।
नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥

अव्यक्तोऽयमचिन्त्योऽयमविकार्योऽयमुच्यते।
तस्मादेवं विदित्वैनं नानुशोचितुमर्हसि ॥२-२४, २५॥

इति सर्वभूतासंसृष्टत्वात्, करणागोचरत्वप्राप्तिं निर्विकारत्वं च विदितवतः शोकानवसर इत्युक्तम्। योगबुद्धिनिरूपणे च यद्यपि -

बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते ।
तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥

कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः ।
जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥२-५०, ५१॥

इति समत्वबुद्धिपूर्वकं फलं त्यक्त्वा कर्म कुर्वतां जन्मबन्धविनिर्मुक्तिः फलत्वेन निर्दिष्टा, तथापि -

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ॥२-४६॥

इति वेदोक्तसर्वधर्मानुष्ठानस्य फलमुदपानस्थानीयम्, विज्ञानफलं सर्वतः संप्लुतोदकस्थानीयम् इति सांख्यबुद्धेरेव प्रशंसितत्वात् 'दूरेण ह्यवरं कर्म बुद्धियोगात्' (२-४९) इत्यारभ्योक्तं सुकृतदुष्कृतहानम्, जन्मबन्धवि

निर्मुक्तिश्च किं सांख्यविज्ञानलक्षणबुद्धिफलम् उताहो समत्वबुद्धियुक्तकर्मानुष्ठानलक्षणयोगफलम् इति निःसंशयं न निश्चीयते । अपि च 'प्रजहाति यदा कामान्' (२-५५) इत्यारभ्य वितानितं स्थितप्रज्ञलक्षणम् उपसंहरन् ब्रवीति स्म भगवान् -

एषा ब्राह्मी स्थितिः पार्थ नैनां प्राप्य विमुह्यति ।
स्थित्वास्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति ।।२-७२।।

इति। सर्वकामप्रहाणपूर्वकं स्थितप्रज्ञत्वमापन्नस्यैव ब्रह्मणि स्थितिं ब्रह्मनिर्वाणप्राप्तिं च ब्रुवन् सांख्यबुद्धेरेव योगबुद्ध्यपेक्षया ज्यायस्त्वमभिमन्यते भगवानित्यतः, कर्मयोगस्यापि किं स्वातन्त्र्येण परमपुरुषार्थप्राप्तिरस्ति किं वा नेति संशयोऽपि भवति। अतः शात्रोक्तसांख्यज्ञानकर्मानुष्ठानयोर्मध्ये कतरद्गरीयः श्रेयःसाधनम् इति निश्चेतुं प्रयत्नः कर्तव्यः ।।

८३. अत्र 'एषा तेऽभिहिता सांख्ये बुद्धिर्योगे त्विमां शृणु' (२-३९) इति सांख्यबुद्ध्यनन्तरं योगस्याप्यनुष्ठेयत्वेनोपदेशदर्शनात् कर्मणोऽपि ज्ञानवदनुष्ठेयत्वमुच्यत इति केचिन्मन्यते स्म । तदिदं मतं तेषां वृत्तिकाराणां स्वप्रतिज्ञावाक्यशेषविरुद्धम्, अर्जुनस्य प्रश्नेन भगवतः प्रतिवचनेन च विरुद्धम्, गीतोक्तकर्मसंन्यासोपदेशविरुद्धम्, युक्तिविरुद्धं चेति विस्तरेण प्रत्याख्यातं भगवता भाष्यकारेणेति नेह पुनर्विमर्शनमर्हति । गीतोक्त एव तु कर्मज्ञानसंबन्धोऽत्र निरूप्यते, उपदेशसोपानक्रमप्रत्यभिज्ञानार्थम् ।।

८४. यथोक्तप्रकारेण संशयमापन्नोऽर्जुनः पृच्छति -

ज्यायसी चेत्कर्मणस्ते मता बुद्धिर्जनार्दन ।
तत्किं कर्मणि घोरे मां नियोजयसि केशव ।।

व्यामिश्रेणेव वाक्येन बुद्धिं मोहयसीव मे ।
तदेकं वद निश्चित्य येन श्रेयोऽहमाप्नुयाम् ।।३-१,२।।

सर्वकामत्यागोपदेशेन स्थितप्रज्ञतासंपादनपूर्वकं ब्राह्मी स्थितिर्ब्रह्मनिर्वाणप्राप्तिश्च स्यादित्युक्त्या ज्ञानमेव श्रेयःसाधनमित्यभिप्रेतमिति भाति, त्वं तु 'कर्मण्येवाधिकारस्ते' (२-४९), 'युद्धाय युज्यस्व' (२-३८) इति च हिंसात्मके युद्धरूपे कर्मण्येव नियोजयसि, 'बुद्ध्या युक्तो यया पार्थ कर्मबन्धं प्रहास्यसि', 'नेहाभिक्रमनाशोऽस्ति' (२-३९, ४०) इत्यादिना युद्धे प्रवृत्तिमपि प्रशंसन् सापि श्रेयस्करीति मन्यसे इव भाति । तस्माद्व्यामिश्रमिव तव वचनम् । तस्मान्मया किं सांख्यबुद्धिमाश्रित्य कर्मत्याग एव कर्तव्यः, किं वा कर्मैव कर्तव्यम्? – इत्येतयोरेकं निश्चित्य वद – इति प्रश्नः ॥

८५. अत्र भगवतः प्रतिवचनम् आ अध्यायपरिसमाप्ति ।

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम् ॥३-३॥

मयि सर्वाणि कर्माणि संन्यस्याध्यात्मचेतसा ।
निराशीर्निर्ममो भूत्वा युध्यस्व विगतज्वरः ॥३-३०॥

इत्युपक्रमोपसंहाराभ्याम्, मध्येऽपि, 'नियतं कुरु कर्म त्वम्' (३-८), 'यज्ञार्थात्कर्मणोऽन्यत्र लोकोऽयं कर्मबन्धनः। तदर्थं कर्म कौन्तेय मुक्तसङ्गः समाचर ॥' (३-९) 'तस्मादसक्तः कर्म समाचर ।' (३-१९) इत्यभ्यासात्, ज्ञानयोगापरनामा सांख्ययोगः सांख्यबुद्धिभूमिकामारूढान् प्रत्युपदिश्यते, योगबुद्ध्याश्रितानां तु सङ्गत्यागफलत्यागपूर्वकमीश्वरार्थं कर्मानुष्ठानलक्षणः कर्मयोग एव । तथा चार्जुनस्य योगबुद्ध्याश्रितस्य कर्मयोग एव ज्यायान्- इत्युक्तं भवति ॥

८६. यत्पुनरर्जुनस्याध्यारोप्य वादः कर्मसंन्यासपूर्वकं ब्राह्मीस्थिति-प्रापणी बुद्धिरेव ज्यायसी कर्मणः सकाशादिति नासौ भगवतो वास्तविकी मतिः। यत्कारणम् –

न कर्मणामनारम्भान्नैष्कर्म्यं पुरुषोऽश्नुते ।
न च संन्यसनादेव सिद्धिं समधिगच्छति ।।३-४।।

इति तमध्यारोपमपनयति भगवान्, यद्यपि सांख्यैर्नैष्कर्म्यसिद्धिः, केवलं कर्मसंन्यासात् प्राप्यते। कथं तर्हि, सांख्यबुद्ध्याश्रयणेन परमार्थसंन्यासमासाद्य। तथा च वक्ष्यति – 'नैष्कर्म्यसिद्धिं परमां संन्यासेनाधिगच्छति' (१८-४९) इति । योगबुद्ध्याश्रितेन तु सङ्गत्यागफलत्यागपूर्वकं कर्मणामारम्भादेव सत्त्वशुद्धिमासाद्य नैष्कर्म्यसिद्धिः परम्परया आसाद्यते । एतेन 'तत्किं कर्मणि घोरे मां नियोजयसि?' (३-१) इत्युपालम्भोऽपि प्रत्युक्तः। न च भगवतो व्यामिश्रवचस्त्वम्, भिन्नाधिकारित्वस्यैव विवक्षितत्वात् ज्ञानयोगकर्मयोगयोः ।।

८७. अत्रैवाध्याये सांख्यानां परमार्थसंन्यासोऽपि साधितः –

यस्त्वात्मरतिरेव स्यादात्मतृप्तश्च मानवः।
आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ।।३-१७।।

इति । एवमेव हि स्थितप्रज्ञस्य लक्षणेऽप्युक्तम् –

प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।२-५५।।

इति । न च परमार्थसंन्यासिनः सांख्या बाह्यकर्मसंन्यासमेकान्ततः कुर्वन्ति । ये हि ज्ञानिनः एव सन्तो निमित्तविशेषाद् गार्हस्थ्ये एव तिष्ठन्ति, ते लोकसंग्रहार्थं कर्म कुर्वन्त एव परमार्थदृष्ट्या संन्यासिन एव स्थिता भवन्ति । एतदप्यत्र जनकादिदृष्टान्तात्, लीलाविग्रहं धृतवतो भगवतो दृष्टान्ताच्च प्रदर्शितम् ।।

कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।
लोकसंग्रहमेवापि सम्पश्यन्कर्तुमर्हसि ।।

न मे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन ।
नानवाप्तमवाप्तव्यं वर्त एव च कर्मणि ।। ३-२०,२२।।

एष तूपदेशो नार्जुनस्य लोकसङ्ग्रहार्थकर्मण्यधिकृतत्वं विवक्षित्वा; किन्तु लोकसङ्ग्रहार्थं कर्म कुर्वतां सांख्यानां मार्गमनुसृत्य योगबुद्ध्या श्रितैरपि कर्मसङ्गत्यागः कर्तव्य इति बोधनार्थम्। अत एव हि ब्रवीति -

तस्मादसक्तः सततं कार्यं कर्म समाचर ।
असक्तो ह्याचरन्कर्म परमाप्नोति पूरुषः ।।३-१९।।

प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः ।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते ।।

तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः ।
गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ।।३-२७, २८।।

इति।।

८८. परमप्रकृतं त्विदम् - सांख्ययोगः कर्मयोगश्चेति एतौ न परस्परव्यावृत्तौ निःश्रेयसोपायौ। नापि सांख्यबुद्धेर्योगबुद्ध्यपेक्षया ज्यायस्त्वमस्ति । किं तर्हि? यदेव सांख्ययोगेन प्राप्यते निःश्रेयसं तदेव तु सहसा सांख्यबुद्ध्याश्रयणेऽसमर्थानां योगबुद्ध्याश्रयणेन परम्परया लभ्यते - इत्यनयोरुपायोपेयभावो ज्ञेय इति। तथा च वक्षति -

सांख्ययोगौ पृथग् बालाः प्रवदन्ति न पण्डिताः।
एकमप्यास्थितः सम्यगुभयोर्विन्दते फलम् ।।

यत्साङ्ख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ।
एकं साङ्ख्यं च योगं च यः पश्यति स पश्यति ।।५-४,५।।

इति। अत्र विस्तरस्तूत्तरत्र संन्याससतत्त्वविचारे भवितेत्यास्तां तावत् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'सांख्ययोगसंबन्धोपदेशो' नाम**
**चतुर्दशं सोपानम्**

# १५. ज्ञानयज्ञोपदेशः

८९. अधिगतमेतद् यत्काममोहितानाम् आसुरीं प्रकृतिमाश्रितानां कामकारेण वर्तमानानां क्वचित् शास्त्रीयकर्माचरणेऽपि दम्भाहङ्कारयुक्तानां भगवत्प्राप्तिमार्गपरिभ्रष्टानाम् अधमगतिप्राप्तिरेवान्तिमं फलम् । जितात्मनां दैवीं प्रकृतिमाश्रितानां तु यज्ञार्थं सङ्गत्यागफलत्यागपूर्वकं कर्म कुर्वतां कर्मयोगद्वारा सांख्ययोगमासाद्य ब्रह्मात्मन्येव स्थितप्रज्ञानां ब्रह्मनिर्वाणप्राप्तिः परमं फलम् इति । अथेदानीमिदं निरूप्यते यत् - यथोक्तप्रकारेण स्थितप्रज्ञतां प्राप्तानां कृतकृत्यानामपि शास्त्रीययज्ञादिकमस्ति, तत्तु तेषां ज्ञाने परिसमाप्तत्वान्नैव बन्धकं भवतीति ।।

९०. यद्यपि द्वितीयतृतीयाध्याययोरपि - 'बुद्धियुक्तो जहातीह', 'कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः। जन्मबन्धविनिर्मुक्ताः' (२-५०,५१), 'कर्मणैव हि संसिद्धिमास्थिता जनकादयः ।' (३-२०) 'विद्वान् युक्तः समाचरन्' (३-२६) इत्यादिना इदमुक्तम्,[१४] तथापि तदेवं चतुर्थे विस्तरेणोक्तं ज्ञानयोगस्य संस्तुत्यर्थमिति हिरुगिह निरूप्यत इत्यनवद्यम् ।।

१४. नास्त्याकरग्रन्थेऽपेक्षितं तु ।

९१. द्वितीयाध्याये सांख्यं प्राधान्येनोक्तम्, योगस्तु तदुपायत्वेन । तत्रापि कर्मयोगो ध्यानयोगद्वारेण सांख्योपाय इति, भगवदर्थत्वेनैव कर्म ध्यानं च योगत्वं प्रतिपद्येते इति सूचितम् - 'योगस्थः कुरु कर्माणि' (२-४८), 'तानि सर्वाणि संयम्य युक्त आसीत मत्परः' (२-६१) इति च । तृतीये तु इन्द्रियमनोबुद्धिमाश्रित्यैव कामस्यानर्थहेतुत्वात्ताननतीत्य परमात्मनि निष्ठां संपिपादयिषयैव कर्मयोगध्यानयोगानुष्ठानमुपदिश्यते इति स्पष्टीकृतम् -

काम एष क्रोध एष रजोगुणसमुद्भवः ।
महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते ।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम् ।।

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम् ।।

इन्द्रियाणि पराण्याहुरिन्द्रियेभ्यः परं मनः ।
मनसस्तु परा बुद्धिर्यो बुद्धेः परतस्तु सः ।।

एवं बुद्धेः परं बुद्ध्वा संस्तभ्यात्मानमात्मना ।
जहि शत्रुं महाबाहो कामरूपं दुरासदम् ।।३-४०,४१,४२,४३ ।।

इति ।।

एवं चासुरप्रकृतेरिन्द्रियमनोबुद्धीराश्रित्यैवात्मलाभात्, तन्निग्रहार्थम् इन्द्रियादिसंयमानुष्ठानमेव योगः, वशीकृतयोगानां साक्षादेवात्मतत्त्वविमर्शनं तु सांख्यम् - इत्युक्तं भवति ।।

तत्र ये योगबुद्धिमाश्रित्य भगवद्दर्शनार्थं यतन्ते, ते **योगिनः**, ये तु

सांख्यबुद्धिमाश्रित्य ते **सांख्याः** । तत्र योगैः सांख्यद्वारेणैव भगवद्दर्शनप्राप्तेः कर्मयोगध्यानयोगयोर्गौणं योगत्वम्, सांख्यं तु साक्षात्साधनत्वात्तस्यैव मुख्यं योगत्वमित्यवोचाम ।।

९२. तदेवं साक्षादाराद् वा भगवत्तत्त्वं ये विदुः, त एव **ज्ञानिन** उच्यन्ते शास्त्रे । तस्यास्य ज्ञानस्य योगाख्यस्योपदेशसंप्रदायः पूर्वं प्रवर्तितोऽपि[१५] महता कालेन विनष्ट इति तेनैव श्रीकृष्णरूपिणा भक्तायार्जुनायोपदिश्य पुनरपि प्रवर्तितः। तदिदं संप्रदायप्रवर्तकत्वमपि स्वयमेव कथितवान् ज्ञानस्य स्वरूपं माहात्म्यं च प्रचिख्यापयिषुः –

इमं विवस्वते योगं प्रोक्तवानहमव्ययम् ।
विवस्वान्मनवे प्राह मनुरिक्ष्वाकवेऽब्रवीत् ।।

एवं परम्पराप्राप्तमिमं राजर्षयो विदुः ।
स कालेनेह महता योगो नष्टः परन्तप ।।

स एवायं मया तेऽद्य योगः प्रोक्तः पुरातनः ।
भक्तोऽसि मे सखा चेति रहस्यं ह्येतदुत्तमम् ।।४-१,२,३ ।।

तत्रार्जुनः पप्रच्छ –

अपरं भवतो जन्म परं जन्म विवस्वतः ।
कथमेतद्विजानीयां त्वमादौ प्रोक्तवानिति ।।४-४।।

इति ।।

९३. अत्र द्वितीयाध्याये यत्प्रोक्तं 'न जायते म्रियते वा कदाचित्' (२-२०) इति सांख्यं ज्ञानम्, आत्मा सर्वेष्वपि शरीरेषु जायमान इव यल्लक्ष्यते, अनेक इव च – तदज्ञानदृष्ट्यैव, परमार्थतस्तु एक एवायमात्मा सर्वेषु देहेषु – 'अन्तवन्त इमे देहा नित्यस्योक्ताः

१५. भगवता

शरीरिणः' (२-१८) इति च, तदिदं पुनरप्यर्जुनमुखेन शङ्कित्वा परमार्थज्ञापनार्थमिदं प्रश्नोत्थापनम् । अत आह भगवान् -

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन ।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप ।।

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ।।

यदा यदा हि धर्मस्य ग्लानिर्भवति भारत ।
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहम् ।।

[आत्मानं सृजामि - मायादेहमुत्पादयामि, जात इव भवामीत्यर्थः ।]

परित्राणाय साधूनां विनाशाय च दुष्कृताम् ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ।।४-५,६,७,८।।

इति ।।

इदं तु पार्थस्य प्रश्नापाकरणायोक्तम्, भगवतो लीलाजन्म कर्म च प्रासङ्गिकम् । अत्रावान्तरतात्पर्यमेव वाक्यस्य; प्रकृतं तु सांख्यज्ञानमेव । अतो यदेवोक्तं द्वितीये 'न त्वेवाहं जातु नासं न त्वम्' (२-१२) इत्यादि, तदेवानूद्य ज्ञानप्रशंसामेवानुवर्तयति -

जन्म कर्म च मे दिव्यम् एवं यो वेत्ति तत्त्वतः ।
त्यक्त्वा देहं पुनर्जन्म नैति मामेति सोऽर्जुन।।४-९।।

इति । अत्रेदं विवक्षितं यन्न कस्यापि जन्म वा मरणं वा विद्यते तत्त्वतः, आत्मबुद्ध्या सांख्यास्तु विजानन्ति नास्माकमात्मा जायते म्रियते वा इति; प्राकृतास्तु मन्यन्ते जननमरणसंतानवन्तो वयमिति । तेषां यस्तु

बुद्ध्यते शास्त्राचार्योपदेशतो 'न कस्याप्यात्मा जायते म्रियते वा' इति स तत एव भगवद्भावमाप्नोतीति । तदाह –

वीतरागभयक्रोधा मन्मया मामुपाश्रिताः ।
बहवो ज्ञानतपसा पूता मद्भावमागताः ॥४-१०॥

[मद्भक्ता एव मत्तत्त्वं जानन्ति, तत एव च मद्भावं गच्छन्तीत्यर्थः ।]

९४. अत्र ज्ञानं तपस्त्वेन संस्तुतम् । शास्त्रोक्ततपसापि यद्दुरापं निःश्रेयसं तज्ज्ञानेनाप्यत इतीत्थं महाभागं ज्ञानमिति । एवं शास्त्रविहित यज्ञेनापि यद्दुरापं तदनेन ज्ञानेनावाप्यत इति संस्तोतुं पातनिकां करोति –

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्षुभिः ।
कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥४-१४,१५॥

यथा न भगवतो जन्ममृती तथा एवंज्ञानिनोऽपीत्युक्तम् । एवं यथैव भगवतः चातुर्वर्ण्यविभागादि कुर्वतोऽपि भगवतस्तत्र न वास्तविकं कर्तृत्वम्, एवं तज्ज्ञानवतोऽपि ॥

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः ।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः ॥४-१९॥

[सर्वे लौकिका वैदिकाश्चेत्यर्थः]

९५. तत्र ज्ञानी यदि गृहस्थो यदि वा तुर्याश्रमी, तस्य ज्ञानं सर्वश्रेष्ठो यज्ञ एवेति मन्तव्यम् इति ज्ञानं संस्तुतम् । ज्ञानयज्ञमनुतिष्ठतः सर्वं कर्माकर्मैव संपद्यत इति यत्संसूचितम् 'ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः' (४-१९) इति तदेव विवरिष्यन् आह –

त्यक्त्वा कर्मफलासङ्गं नित्यतृप्तो निराश्रयः ।
कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति सः ॥

निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः ।
शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥

यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः ।
समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥

गतसङ्गस्य मुक्तस्य ज्ञानावस्थितचेतसः ।
यज्ञायाचरतः कर्म समग्रं प्रविलीयते ॥

ब्रह्मार्पणं ब्रह्म हविर्ब्रह्माग्नौ ब्रह्मणा हुतम् ।
ब्रह्मैव तेन गन्तव्यं ब्रह्मकर्मसमाधिना ॥४-२०,२१,२२,२३,२४॥

अत्र 'कर्मण्यभिप्रवृत्तोऽपि नैव किञ्चित्करोति' (४-२०) इति गृहस्थाश्रमस्थज्ञानिविषयम्। 'शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम्' (४-२१) इति 'कृत्वापि न निबध्यते' (४-२२) इति च कर्मसंन्यासं कृत्वा केवलमनिवार्यभिक्षाटनादिप्रवृत्तो यश्चतुर्थाश्रमी तद्विषयमिति विवेकः । ब्रह्मार्पणमिति तूभयत्र समानम् । तथा च व्याख्यातं **भाष्यकारेण –**

(१) '**ब्रह्मार्पणम् – येन करणेन ब्रह्मवित् हविरग्नावर्पयति तद् ब्रह्मैवेति पश्यति तस्यात्मव्यतिरेकेणाभावं पश्यति, यथा शुक्तिकायां रजताभावं पश्यति । तदुच्यते ब्रह्मैवार्पणमिति, यथा यद्रजतं तच्छुक्तिकैवेति । ब्रह्म अर्पणमिति असमस्ते पदे । यदर्पणबुद्ध्या गृह्यते लोके तदस्य ब्रह्मविदो ब्रह्मैवेत्यर्थः ।**' (गी.भा. ४-२४) इत्यादिरीत्या पूर्ववत्कर्मणि प्रवृत्तोऽपि नैव किञ्चित्करोति गृहस्थज्ञानी – इति दर्शयितुम्, (२) ''**एवं लोकसङ्ग्रहं चिकीर्षुणापि क्रियमाणं कर्म परमार्थतोऽकर्म ब्रह्मबुद्ध्युपमृदितत्वात् । एवं सति निवृत्तकर्मणोऽपि**

**सर्वकर्मसंन्यासिनः सम्यग्दर्शनस्तुत्यर्थं यज्ञत्वसंपादनं ज्ञानस्य सुतरामुपपद्यते – यदर्पणादि अधियज्ञे प्रसिद्धं तदस्य अध्यात्मं ब्रह्मैव परमार्थदर्शिनः इति**'' ।। (गी.भा. ४-२४) इति च संन्यासिज्ञानिनो दर्शनं स्तोतुम् ।।

९६. तदेवं यत् ज्ञानिना लोकसङ्ग्रहार्थं कर्म क्रियते तत् वस्तुतोऽकर्मैव । न तेन कर्तृत्वभोक्तृत्वे तस्येति वस्तुतो व्यावहारिकं कर्म वा अकर्म वा न तस्यास्ति । यथा भगवतः चातुर्वर्ण्यसृष्ट्यादौ इतीदं ज्ञानयज्ञोपदेशस्य प्रयोजनम् ।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान्मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ।।४-१८।।

इत्यनात्माश्रितकर्माकर्मणोरात्माऽसंस्पर्शदर्शनार्थं संसूचितस्य परमार्थसर्वसंन्यासस्यैव ज्ञाननिष्ठालक्षणस्य स्तुत्यर्थम् ।।

द्रव्ययज्ञास्तपोयज्ञा योगयज्ञास्तथापरे ।।४-२८।।

इति विविधयज्ञोपन्यासस्तु ज्ञानयज्ञस्तुत्यर्थमेव –

श्रेयान् द्रव्यमयाद्यज्ञाज्ज्ञानयज्ञः परन्तप ।
सर्वं कर्माखिलं पार्थ ज्ञाने परिसमाप्यते ।।४-३३।।

इत्यादिना ज्ञाने एव सर्वकर्मफलान्तर्भावोक्तेः ज्ञानस्तुतिः ज्ञानप्राप्यमोक्षोपदेशादिनैवोपक्षीणत्वादध्यायस्येति सर्वं सुस्थम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपाद श्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'ज्ञानयज्ञोपदेशो' नाम**
**पञ्चदशं सोपानम्**

# १६. परमार्थसंन्यासोपदेशः

९७. अधिगतमेतत् यज्ज्ञानयज्ञो नाम तत्त्वज्ञानमेव, यत्प्रभावात् तत्त्वदर्शी कृतेनापि कर्मणा न लिप्यते, अकृतेनापि न प्रत्यवायी भवति प्रत्युत समस्तकर्मकृदपि भवेदिति । तत्राज्ञानिन एव कर्मणा लिप्यन्ते ज्ञानी तु कुर्वन्नपि नैव किञ्चित्करोतीति व्याहतोक्तिरिव भातीत्यतः कर्माकर्मसंन्याससतत्त्वं विमृश्य विवेचनीयं भवतीति संन्यासोपदेशसोपानमिदानीं निरूप्यते ।।

९८. तत्र सर्वास्वपि गीतासु नियतं कर्मावश्यं कर्तव्यं न परित्याज्यं मुमुक्षुभिरिति भूयोभूय उपदिष्टं दृश्यते । तत्त्ववित्तु कर्म नैव करोतीति च । तदिदमपि विरुद्धोपदेशनमिव प्रतिभात्यापाततः यतः कथं नु साधकैः क्रियमाणमेव कर्म कर्मसंन्यासं प्राप्य ज्ञानस्योपायो भविष्यतीति शङ्कापि समुन्मिषेत् केषांञ्चित् हृदय इत्यतोऽपि विचारणीयं भवति कर्मसंन्यास-तत्त्वम् । तदर्थं सोपानारम्भः ।।

९९. तत्रेदं रहस्यम्-जन्मादिसर्वविक्रियारहितेऽपि परमार्थात्मनि जायते, करोति कर्माणि, कारयति च, कदाचित्तु तूष्णीमास्ते इत्यविद्यया कल्पितं मूढैः शरीरेन्द्रियमनोबुद्धिधर्माध्यासेन । सैषा कल्पना व्युदस्ता द्वितीये परमार्थस्वरूपं ज्ञापयता भगवता - (१) 'अन्तवन्त इमे देहाः' (२-१८), (२) 'न जायते म्रियते वा' (२-२०), (३) 'य एनं वेत्ति हन्तारम्' (२-१९), (४) 'वेदाविनाशिनं नित्यम् ...कं घातयति हन्ति कम्' (२-२१) इत्यादिभिरात्मस्वरूपनिरूपणपरैः वाक्यैः । यत्पुनर्मन्यन्ते जनाः कर्तारो भोक्तार एव च वयमिति- तत्र काम्यत्यागः सङ्गफलत्या-गपूर्वकः कर्मानुष्ठानरूपः कर्मयोगोऽपि मन्दाधिकारिणां मुमुक्षूणां कृते तदीययैव व्यवहारदृष्ट्या समुपदिष्टः । एकदेशसंन्यासेन साम्येन गौणोऽसौ संन्यासः । परमार्थसंन्यासस्तु नित्यसंन्यस्तसर्वकर्मरूपात्मज्ञानमेवेति बोधयितुं यदुक्तं 'कं घातयति हन्ति कम्' (२-२१) इति, तदेव पुनरपि

कर्मसतत्त्वविवेचनेन चतुर्थेऽपि वितत्यानुवर्ण्यते ।।

१००. तत्र कर्माकर्मसंबन्ध आत्मनि विद्यते इत्यविवेकिनामिव प्राकृतानाम् आत्मानात्मविवेकिनामपि पण्डितानां व्यामोहोऽस्तीत्यतः कर्मतत्त्वं विचारणीयमिति प्रस्तूयाह भगवान् –

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।
तत्ते कर्म प्रवक्ष्यामि यज्ज्ञात्वा मोक्ष्यसेऽशुभात् ।।

कर्मण्यकर्म यः पश्येदकर्मणि च कर्म यः ।
स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृत् ।।४-१६,१८।।

आत्मन्यकर्तरि यत्कर्मदर्शनं तन्मिथ्यादर्शनं कार्यकरणसंघाताश्रयस्य तस्यात्मन्यसंभावितेऽप्यध्यारोप्य अहं कर्ता एतस्मिन्नहं नियुक्तः, एतत् फलं च मया भोक्तव्यमिति **क्रियाकारकफलात्मकतादर्शनात्** । एवम् अध्यारोपितकर्तृत्वे एव आत्मनि, कार्यकरणसंघाते स्थितं व्यापारोपरमम्, तत्फलं निरायासत्वलक्षणं सुखित्वं चाध्यारोप्य यद्दर्शनम्, 'अहमिदानीं न किञ्चित्करोमि, तूष्णीं सुखमासे इति' तदपि मिथ्यादर्शनमेव कर्तृतन्त्रस्यैव कर्मत्वानपायात् । तदेवं देहादिसंघाताश्रयस्य करणाकरणान्यथाकरणलक्षणस्य सर्वस्यापि कर्मात्मकत्वे सिद्धे अकर्मत्वेन विभावनम्, तस्य चाकर्मण आत्मन्यध्यारोपणं च सर्वथापि मिथ्यादर्शनमेव । तदेवमध्यारोपिते कर्मणि कर्माभावं यः पश्येत् स बुद्धिमान्, तदितरस्तु आत्मनि कर्माकर्मसंबन्धदर्शी अबुध एवेति वाक्यार्थः ।।

यद्यपि 'अन्तवन्त इमे देहाः' (२-१८) इत्यत्र देहादिसंघातस्य असत्त्वमेवोक्तम् 'नासतो विद्यते भावः' (२-१६) इति प्रकृत्य । तथाप्यत्र देहादिसंघाते असत्स्वभावेऽपि क्रियाकर्तृत्वं क्रियोपरमश्च मिथ्यास्वभावेऽपि संघाते अध्यारोपयति भगवान् कूटस्थनित्ये आत्मनि क्रियाकारकसंबन्धाभावं ब्रह्मस्वभावतां च विवक्षुः – इत्यदोषः ।।

१०१. तदेवं यत्सर्वथापि कर्माकर्मतत्फलासंबन्धदर्शनमात्मनि स एवैष **परमार्थसंन्यासो** नाम, न तु शास्त्रोक्तकर्मणस्त्यागः तत्त्वविविदिषुणा विदुषा वापि क्रियमाणः सर्वकर्मसंन्यासलक्षणः। तदिदं पूर्वमेव दर्शित-मस्माभिः कर्मसंन्यासविभागोपदेशसोपाने इत एवाऽऽकृष्येति ज्ञेयम् ।।

तमिमं परमार्थसंन्यासमिहाप्यनूद्य सम्यग्दर्शनं स्तौति भगवान् -

योगसंन्यस्तकर्माणं ज्ञानसञ्छिन्नसंशयम् ।
आत्मवन्तं न कर्माणि निबध्नन्ति धनञ्जय ।।४-४१।।

**भाष्यं** चात्र भवति -

**'योगसंन्यस्तकर्माणं परमार्थदर्शनलक्षणेन योगेन संन्यस्तानि कर्माणि येन परमार्थदर्शिना धर्माधर्माख्यानि तं योगसंन्यस्तकर्माणम् । कथं योगसंन्यस्तकर्मा इति? आह - ज्ञानसञ्छिन्नसंशयं ज्ञानेन आत्मेश्वरैकत्वदर्शनलक्षणेन सञ्छिन्नः संशयो यस्य सः ज्ञानसञ्छिन्नसंशयः। य एवं योगसंन्यस्तकर्मा तम् आत्मवन्तम् अप्रमत्तं गुणचेष्टारूपेण दृष्टानि कर्माणि न निबध्नन्ति अनिष्टादिरूपं फलं नारभन्ते हे धनञ्जय ।।'** (गी.भा. ४-४१)

[अनिष्टादिरूपं - 'अनिष्टमिष्टं मिश्रं च' (१८-१२) इत्यष्टाद-शाध्याये वक्ष्यमाणम् इत्यर्थः। तत्र हि 'कर्मणः फलं त्रिविधमपि न भवति परमार्थसंन्यासिनां क्वचित्' इति वक्ष्यति।]

१०२. पञ्चमेऽपि तत्त्वज्ञानरहितानां मुमुक्षूणां कर्मसंन्यासकर्मयो-गयोर्मध्ये कर्मयोग एवाश्रितो वरम् इति -

संन्यासः कर्मयोगश्च निःश्रेयसकरावुभौ।
तयोस्तु कर्मसंन्यासात्कर्मयोगो विशिष्यते।।५-२।।

इत्यनेनोक्त्वा,

संन्याससस्तु महाबाहो दुःखमाप्तुमयोगतः ।
योगयुक्तो मुनिर्ब्रह्म न चिरेणाधिगच्छति ।।५-६।।

इत्याह । अत्र **भाष्यम्** –

**''संन्याससस्तु पारमार्थिकः हे महाबाहो दुःखम् आप्तुं प्राप्तुम् अयोगतः योगेन विना । योगयुक्तः वैदिकेन कर्मयोगेन ईश्वरसमर्पितरूपेण फलनिरपेक्षेण युक्तः, मुनिः मननात् ईश्वरस्वरूपस्य मुनिः, ब्रह्म परमात्मज्ञानलक्षणत्वात् प्रकृतः संन्यासः 'ब्रह्म' उच्यते, 'न्यास इति ब्रह्मा ब्रह्मा हि परः' (तै.ना. ७८) इति श्रुतेः, ब्रह्म परमार्थसंन्यासं परमात्मज्ञाननिष्ठालक्षणं न चिरेण क्षिप्रमेव अधिगच्छति प्राप्नोति । अतः मया उक्तम् 'कर्मयोगो विशिष्यते' (५-२) इति** ।।''(गी.भा. ५-६) इति ।।

[अत्र परमात्मज्ञाननिष्ठैव परमार्थसंन्यासः तत्र सर्वथापि सर्वकर्मसंबन्धाभावात् । तस्य च सङ्गत्यागफलत्यागलक्षण-गौणसंन्यासयुक्तः कर्मयोगः साधनम् – इत्युक्तम् ।]

१०३. स चायं परमार्थसंन्यासो द्विविधो – गृहे एव तिष्ठतो ज्ञानिनः कर्म कुर्वतोऽपि सकारकफलस्य कर्मणो ब्रह्मबुद्ध्या प्रविलापनरूपः, तुर्याश्रमे स्थितस्य व्यावहारिकदृष्ट्या शारीरं केवलं कर्म कुर्वतोऽपि कर्ममात्रेऽकर्मदृष्ट्या तत्प्रविलापनं चेत्यवोचाम ज्ञानयज्ञोपदेशसोपाने (ख.९५)। तमिमं द्विप्रकारमपि संन्यासमिहापि विविच्य दर्शयति भगवान् –

1. योगयुक्तो विशुद्धात्मा विजितात्मा जितेन्द्रियः ।
सर्वभूतात्मभूतात्मा कुर्वन्नपि न लिप्यते ।।५-७।।

इति लोकसंग्रहार्थं कर्म कुर्वतो ज्ञानिनः परमार्थसंन्यासः । अत्र **भाष्यम् –**

**'यदा पुनः अयं सम्यग्दर्शनप्राप्त्युपायत्वेन योगेन युक्तः योगयुक्तः, विशुद्धात्मा विशुद्धसत्त्वः, विजितात्मा विजितदेहः,**

**जितेन्द्रियश्च, सर्वभूतात्मभूतात्मा सर्वेषां ब्रह्मादीनां स्तम्बपर्यन्तानां भूतानाम् आत्मभूतः आत्मा प्रत्यक्चेतनो यस्य सः सर्वभूतात्मभूतात्मा सम्यग्दर्शीत्यर्थः, स तत्रैवं वर्तमानः लोकसंग्रहाय कर्म कुर्वन्नपि न लिप्यते न कर्मभिः बध्यते इत्यर्थः ।।**' (गी.भा. ५-७)

[अत्र सम्यग्दर्शनसंपन्नो व्यवहारदृष्ट्या कर्म कुर्वन्नपि स्वदृष्ट्या कर्मण्यकर्मदर्शित्वात् परमार्थतः संन्यास्येवेत्युक्तम् ।]

2. नैव किञ्चित्करोमीति युक्तो मन्येत तत्त्ववित् ।
पश्यन् शृण्वन् स्पृशन् जिघ्रन् अश्नन् गच्छन् स्वपन् श्वसन् ।।

प्रलपन् विसृजन् गृह्णन् उन्मिषन् निमिषन्नपि ।
इन्द्रियाणीन्द्रियार्थेषु वर्तन्त इति धारयन् ।।५-८,९।।

यथोक्तसम्यग्दर्शिनो लौकिककर्ममात्रसंबन्धोऽपि नास्त्येवेत्यर्थः ।

3. सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी ।
नवद्वारे पुरे देही नैव कुर्वन्न कारयन् ।।५-१३।।

अत्र सर्वं कर्म सर्वथा संन्यस्तवतो ज्ञाननिष्ठस्य कर्ममात्रेण कार्यकरणाश्रितेन संसर्गो नास्ति कर्मण्यकर्मदर्शनादित्युक्तम् ।।

१०४. तमिमं परमार्थसंन्यासं भाष्यकारो **द्वितीयाध्यायगत** 'वेदाविनाशिनं नित्यम्... कथं स पुरुषः पार्थ कं घातयति हन्ति कम्' (२-२१) इति श्लोकार्थव्याख्यानावसरेऽपि 'सर्वकर्माणि मनसा संन्यस्यास्ते सुखं वशी' (५-१३) इतीमं श्लोकार्थं परामृश्य निरूपयामास । तदिह जिज्ञासूनामर्थायोदाहरिष्यामः-

**''ननु 'मनसा' इति वचनात् न वाचनिकानां कायिकानां च संन्यासः इति चेत् । न, सर्वकर्माणि इति विशेषितत्वात् । मानसानामेव सर्वकर्मणामिति चेत् । न, मनोव्यापारपूर्वकत्वात् वाक्कायव्यापाराणां**

**मनोव्यापाराभावे भावानुपपत्तेः। शास्त्रीयाणां वाक्कायकर्मणां कारणानि मानसानि कर्माणि वर्जयित्वा अन्यानि सर्वकर्माणि मनसा संन्यस्यास्ते इति चेत्। न, 'नैव कुर्वन्न कारयन्' इति विशेषणात्। सर्वकर्मसंन्यासः अयं भगवता उक्तः मरिष्यतो न जीवतः इति चेत्। न, 'नवद्वारे पुरे देहे आस्ते' इति विशेषणानुपपत्तेः। न हि सर्वकर्मसंन्यासेन मृतस्य तद्देहे आसनं संभवति। अकुर्वतः अकारयतश्च देहे संन्यस्य इति संबन्धः, न देहे आस्ते इति (इति) चेत्। न, सर्वत्र आत्मनोऽविक्रियत्वावधारणात्। आसनक्रियायाश्च अधिकरणापेक्षत्वात् तदनपेक्षत्वाच्च संन्यासस्य संपूर्वस्तु न्यासशब्दः त्यागार्थः, न निक्षेपार्थः। तस्मात् गीताशास्त्रे आत्मज्ञानवतः संन्यासे एवाधिकारः, न कर्मणीति तत्र तत्र उपरिष्टात् आत्मज्ञानप्रकरणे दर्शयिष्यामः।** (गी.भा. २-२१)

इति ।।

**चरमाध्याये**ऽपि समुपपादितोऽयं परमार्थसंन्यासो **भाष्ये** -'सहजं कर्म कौन्तेय सदोषमपि न त्यजेत्' (१८-४८) इति श्लोकार्थव्याख्यानप्रसङ्गेन। तत्र हि -'**किम् अशेषतः त्यक्तुम् अशक्यं कर्म इति न त्यजेत्? किं वा सहजस्य कर्मणः त्यागे दोषो भवतीति**'? इति चिन्ताविषयमुपन्यस्य सांख्य बौद्धकाणादपक्षान्निशात्य स्वपक्षे सर्वदोषविनिर्मुक्तत्वमेवमुपसंहृतम् -

''**कथं तर्हि आत्मनः अविक्रियत्वे अशेषतः कर्मणस्त्यागः नोपपद्यते इति ? यदि वस्तुभूताः गुणाः, यदि वा अविद्याकल्पिताः, तद्धर्मः कर्म, तत् आत्मनि अविद्याध्यारोपितमेव इति अविद्वान् 'न हि कश्चित् क्षणमपि अशेषतस्त्यक्तुं शक्नोति' (३-५) इति उक्तम्। विद्वांस्तु पुनः विद्यया अविद्यायां निवृत्तायां शक्नोत्येव अशेषतः कर्म परित्यक्तुम्, अविद्याध्यारोपितस्य शेषानुपपत्तेः। न हि तैमिरिकदृष्ट्या अध्यारोपितस्य द्विचन्द्रादेः तिमिरापगमेऽपि शेषो अवतिष्ठते। एवं च सति इदं वचनम् उपपन्नम् 'सर्वकर्माणि मनसा'(५-१३) इत्यादि**।।'' (गी.भा. १८.४८)

एवं तत्समनन्तरश्लोकेऽपि -

''**नैष्कर्म्यसिद्धिं परमां प्रकृष्टां कर्मजसिद्धिविलक्षणां सद्योमुक्त्यवस्थारूपाम्, संन्यासेन सम्यग्दर्शनेन तत्पूर्वकेण वा सर्वकर्मसंन्यासेन अधिगच्छति प्राप्नोति । तथा चोक्तम् - 'सर्वकर्माणि मनसा संन्यस्य, नैव कुर्वन्न कारयन्नास्ते**' (५-१३) **इति ।।**'' (गी.भा. १८-४९)

१०५. तदेवं सर्वविक्रियारहितकूटस्थनित्यचैतन्यात्मना अवस्थानमेव सम्यग्दर्शिनां परमार्थसंन्यासः। शास्त्रोक्तकर्मणां विधिवत् त्यागो मुख्यसंन्यासः, कर्मसङ्गफलत्यागस्तु गौण इति व्यावहारिकदृष्ट्या वाचोयुक्तिरिति सर्वमनवद्यम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'परमार्थसंन्यासोपदेशो' नाम**
**षोडशं सोपानम्**

# १७. निस्त्रैगुण्यभावोपदेशः

१०६. आसुरं भावं परित्यज्य शास्त्रोक्तकर्मानुष्ठाने प्रवृत्तानां स्वधर्ममनुतिष्ठतां मुमुक्षूणामयमुपदेशो भगवतः -

त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन ।
निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।।२-४५।।

इति ।।

यद्यपि काम्यकर्मवर्जनपूर्वकं सङ्गं फलं च त्यक्त्वा स्वधर्म एवानुष्ठेय इति वाक्यार्थोऽवसीयते -

भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम् ।
व्यवसायात्मिका बुद्धिः समाधौ न विधीयते ।।२-४४।।

इति समनन्तरपूर्वश्लोके कामात्मतानिन्दासामर्थ्यात्, **'एष तवोपदेशः स्वधर्ममनुतिष्ठतः'** (गी.भा. २-४५) इति प्रकृतश्लोकभाष्याच्च । तथापि -

व्यवसायात्मिका बुद्धिरेकेह कुरुनन्दन ।
बहुशाखा ह्यनन्ताश्च बुद्धयोऽव्यवसायिनाम् ।।२-४१।।

यावानर्थ उदपाने सर्वतः सम्प्लुतोदके ।
तावान्सर्वेषु वेदेषु ब्राह्मणस्य विजानतः ।।२-४६।।

इति चैवं श्लोकद्वयार्थं तद्भाष्याभिप्रायं च समालोचयतामिदमवश्यं मनसि स्फुरेत् यत्, शास्त्रीयकर्मानुष्ठाने प्रवृत्तान् सांख्यबुद्धिलिप्सून् मुमुक्षूनेवाधिकृत्य प्रवृत्तोऽयं निस्त्रैगुण्यभावोपदेशः । एवं ह्यत्र **भाष्यम् -**

(1) **'येयं सांख्ये बुद्धिरुक्ता योगे च, वक्ष्यमाणलक्षणा सा - व्यवसायात्मिका निश्चयस्वभावा एकैव बुद्धिः, इतरविपरीतबुद्धिशाखाभेदस्य बाधिका, सम्यक्प्रमाणजनितत्वात्, इह श्रेयोमार्गे हे कुरुनन्दन । याः पुनरितरा विपरीतबुद्धयः, यासां शाखाभेदप्रचारवशात् अनन्तोऽपारोऽनुपरतः संसारो नित्यप्रततो विस्तीर्णो भवति, प्रमाणजनितविवेकबुद्धिनिमित्तवशाच्च उपरतास्वनन्तभेदबुद्धिषु संसारोऽप्युपरमते ता बुद्धयः बहुशाखाः'** (गी.भा. २-४१)

इत्यादि व्यवसायात्मिकबुद्ध्युपदेशश्लोके ।।

[अनेन व्यवसायात्मिका बुद्धिरियं सांख्यबुद्धिं योगबुद्धिं वा व्यपाश्रित्य परमपुरुषार्थं प्रेप्सून्प्रति उपदिष्टा काम्यकर्मनिन्दार्थवाद-पूर्वकम् - इति गम्यते ।]

(2) **''सर्वेषु वेदोक्तेषु कर्मसु यान्युक्तान्यनन्तानि फलानि तानि नापेक्ष्यन्ते चेत् किमर्थं तानि ईश्वरायेत्यनुष्ठीयन्त इति? उच्यते, शृणु-यथा लोके कूपतडागाद्यनेकस्मिन्नुदपाने परिच्छिन्नोदके यावान् यावत्परिमाणः स्नानपानादिः अर्थः फलं प्रयोजनं स सर्वोऽर्थः सर्वतस्संप्लुतोदकेऽपि तावानेव संपद्यते तत्रान्तर्भवतीत्यर्थः। एवं तावान् तावत्परिमाण एव संपद्यते सर्वेषु वेदेषु वेदोक्तेषु कर्मसु योऽर्थः यत्कर्मफलं सोऽर्थः ब्राह्मणस्य संन्यासिनः परमार्थतत्त्वं विजानतः योऽर्थः यत् विज्ञानफलं सर्वतःसंप्लुतोदकस्थानीयं तस्मिन् तावानेव संपद्यते तत्रैवान्तर्भवतीत्यर्थः। 'यथा कृतायविजितायाधरेयाः संयन्त्येवमेनं सर्वं तदभिसमेति यत् किञ्च प्रजाः साधु कुर्वन्ति यस्तद्वेद यत्स वेद' (छां.४-१-४) इति श्रुतेः। 'सर्वं कर्माखिलम्' (४-३३) इति च वक्ष्यति । तस्मात् प्राक् ज्ञाननिष्ठाधिकारप्राप्तेः कर्मण्यधिकृतेन कूपतडागाद्यर्थस्थानीयमपि कर्म कर्तव्यम् ।।''** (गी.भा. २-४६)

[एतेन कर्मयोगिभिरीश्वरार्थं क्रियमाणमपि फलमारात् सर्वतः संप्लुतोदकार्थस्थानीयतत्त्वविज्ञानफले परिसमाप्त्यर्थम् - इत्युक्तं भवति ।]

१०७. एवं तावन्मुमुक्षूणां कर्मयोगिनामुपदिश्यमानो निस्त्रैगुण्यभावः, सर्वतस्संप्लुतोदकस्थानीयसम्यग्दर्शनोपायभूतसांख्य बुद्धिलाभाय कथं नाम व्यवसायात्मकबुद्धिप्राप्तिः परम्परयापि भवेत् साधकानामित्यभिप्रायेणेति स्थितम्। तस्मिन्नेतस्मिन् निस्त्रैगुण्यभा-वसाधनमार्गे प्रस्थितस्येदमुपदिश्यते 'निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान्' (२-४५) इति ।।

तत्र द्वन्द्वपराहतबुद्धिरासुरप्रवृत्तिहेतुरित्यतस्ततो निर्मुक्तिरेष्टव्या तावच्छास्त्रोक्तपुण्यकर्मानुष्ठानेन। यदाह भगवान् -

इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन भारत ।
सर्वभूतानि सम्मोहं सर्गे यान्ति परन्तप ।।

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम् ।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ।।७-२७, २८।।

अत्र **भाष्यम् -**

(1) **केन पुनः मत्तत्त्ववेदनप्रतिबन्धेन प्रतिबद्धानि सन्ति जायमानानि सर्वभूतानि मां न विदन्ति? इत्यपेक्षायामिदमाह- इच्छाद्वेषसमुत्थेन, इच्छा च द्वेषश्च इच्छाद्वेषौ ताभ्यां समुत्तिष्ठतीति इच्छाद्वेषसमुत्थः, तेन इच्छाद्वेषसमुत्थेन। केन इति विशेषापेक्षायामिद माह - द्वन्द्वमोहेन द्वन्द्वनिमित्तः मोहः द्वन्द्वमोहः तेन। तावेव इच्छाद्वेषौ शीतोष्णवत् परस्परविरुद्धौ सुखदुःखतद्धेतुविषयौ यथाकालं सर्वभूतैः संबध्यमानौ द्वन्द्वशब्देन अभिधीयेते। तत्र यदा इच्छाद्वेषौ सुखदुः खतद्धेतुसंप्राप्त्या लब्धात्मकौ भवतः, तदा तौ सर्वभूतानां प्रज्ञायाः स्ववशापादनद्वारेण परमार्थात्मतत्त्वविषयज्ञानोत्पत्तिप्रतिबन्धकारणं मोहं जनयतः। न हि इच्छाद्वेषदोषवशीकृतचित्तस्य यथाभूतार्थविषयज्ञान मुत्पद्यते बहिरपि; किमु वक्तव्यं ताभ्यामाविष्टबुद्धेः संमूढस्य प्रत्यगात्मनि बहुप्रतिबन्धे ज्ञानं नोत्पद्यत इति। अतः तेन इच्छाद्वेषसमुत्थेन द्वन्द्वमोहेन, भारत भरतान्वयज, सर्वभूतानि संमोहितानि सन्ति संमोहं संमूढतां सर्गे जन्मनि, उत्पत्तिकाले इत्येतत्, यान्ति गच्छन्ति हे परंतप। मोहवशान्येव सर्वभूतानि जायमानानि जायन्ते इत्यभिप्रायः। यतः एवम् अतः, तेन द्वन्द्वमोहेन प्रतिबद्धप्रज्ञानानि सर्वभूतानि संमोहितानि माम् आत्मभूतं न जानन्ति। अत एव आत्मभावेन मां न भजन्ते।।''** (गी.भा.७-२७)

(2) **"के पुनः अनेन द्वन्द्वमोहेन निर्मुक्ताः सन्तः त्वां विदित्वा यथाशास्त्रमात्मभावेन भजन्ते ? इत्यपेक्षितमर्थं दर्शयितुम् उच्यते – येषां तु पुनः अन्तगतं समाप्तप्रायं क्षीणं पापं जनानां पुण्यकर्मणां पुण्यं कर्म सत्त्वशुद्धिकारणं विद्यते येषां ते पुण्यकर्माणः तेषां पुण्यकर्मणाम्, ते द्वन्द्वमोहनिर्मुक्ताः यथोक्तेन द्वन्द्वमोहेन निर्मुक्ताः भजन्ते मां परमात्मानं दृढव्रताः। 'एवमेव परमार्थतत्त्वं नान्यथा' इत्येवं सर्वपरित्यागव्रतेन निश्चितविज्ञानाः दृढव्रता उच्यन्ते।** (गी.भा. ७-२८)

एवमिच्छाद्वेषात्मकद्वन्द्वेन मोहिताः त्रैगुण्यं भजन्ते । मोहविरहिताश्च निस्त्रैगुण्यभावमाप्नुवन्तीत्युक्तं भवति । द्वन्द्वमोहात्यये पुण्यकर्मानुष्ठानं कारणमिति च ।।

१०८. यद्यपि पुण्यकर्माचरणं द्वन्द्वमोहापगमे कारणं[१६] भवति, तथापि न तन्मात्रेण द्वन्द्वनिवृत्तिरत्यन्ताय भवेत्, इच्छाद्वेषसुख दुःखतद्धेतुरूपयोरिच्छाद्वेषविषयभूतबाह्यविषयाणामत्यन्तायानपगमात्। अतो **नित्यसत्त्वस्थेन** दृढव्रतमास्थाय भगवान् भजनीय इत्यप्युक्तं यथोदाहृतश्लोके। तेन हि भजनेन सर्वेऽपि गुणा अत्यन्तं विनिवर्तन्ते, यदप्याह **भगवान्** –

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ।।

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ।। ७-१३, १४।।

इति। एवं पुण्यकर्मणा पापनिवृत्तिद्वारा शुद्धसत्त्वप्राप्तेरवकाशः, शुद्धसत्त्वानां च भगवद्भजने दृढनिश्चयः, ततश्च मायात्मकगुणात्ययः, भगवद्भावश्चेति क्रम उपदिष्टो ज्ञेयः ।।

---

१६. आकरग्रन्थे त्रुटितमिदं पदम्, अपेक्षितं तु।

१०९. निर्योगक्षेमस्यैव पुरुषस्य यथोक्तक्रमेण निस्त्रैगुण्यभावः शक्यसाधन इति 'निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेमो भव' (२-४५) इत्युपदिष्टम् । यस्य हि 'इदमद्य मया लब्धमिदं प्राप्स्ये मनोरथम्' (१६-१३) इत्यनुपात्तस्योपादानलक्षणयोगोऽस्ति, तस्यैव इदं मया सुरक्षितव्यं चोरशत्रुप्रभृतिभ्यः - इति क्षेमश्च इति, 'असौ मया हतः शत्रुर्हनिष्ये चापरानपि' (१६-१४) इति चासुरभावोऽनुपरतो भवतीत्यत इच्छाद्वेषसमुत्थद्वन्द्वभावोऽपि संततो भवेत्। ये तु भगवन्तमेव भजन्ते तेषां योगक्षेमं भगवानेव वहतीति ते निर्योगक्षेमा भवेयुः। तदुक्तं भगवतैव -

अनन्याश्चिन्तयन्तो मां ये जनाः पर्युपासते ।
तेषां नित्याभियुक्तानां योगक्षेमं वहाम्यहम् ।।९-२२।।

इति।।

११०. तत्र त्रिगुणात्मके संसारे -

सत्त्वं रजस्तम इति गुणाः प्रकृतिसम्भवाः ।
निबध्नन्ति महाबाहो देहे देहिनमव्ययम् ।।१४-५।।

इत्युक्तरीत्या यद्यपि त्रयाणामपि गुणानां बन्धकत्वमुक्तम्, तथापि सत्त्वगुणे विशेषोऽस्ति। यतः-

तत्र सत्त्वं निर्मलत्वात्प्रकाशकमनामयम् ।
सुखसङ्गेन बध्नाति ज्ञानसङ्गेन चानघ।।

रजो रागात्मकं विद्धि तृष्णासङ्गसमुद्भवम् ।
तन्निबध्नाति कौन्तेय कर्मसङ्गेन देहिनम् ।।

तमस्त्वज्ञानजं विद्धि मोहनं सर्वदेहिनाम् ।
प्रमादालस्यनिद्राभिस्तन्निबध्नाति भारत ।।१४-६,७,८।।

इत्युक्तरीत्या तमस आवरणात्मकत्वम्, रजसस्तु विक्षेपकरत्वं चेति तत्त्वार्थविवेचने तौ भूयोंऽशेन परिपन्थिनौ । सत्त्वं तु निर्मलमदुष्टं चेति तत्त्वविवेचने सहायकम् । ततः सत्त्वगुणविशिष्टस्य चित्तस्य यावदेव विषयविषयता तावदेव बन्धकत्वम् । यदा तु सुकृतवशात् साधुसङ्गाच्च तस्य प्रत्यक्प्रवणता तदेव सत्त्वं मोक्षाय कल्पते । यथोक्तम् -

मनो हि द्विविधं प्रोक्तं शुद्धं चाशुद्धमेव च।
अशुद्धं कामसंकल्पं शुद्धं कामविवर्जितम् ।।

मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासक्तं मुक्त्यै निर्विषयं स्मृतम्।।[१७]

-ब्रह्मबिन्दूपनिषत् -१,२।।

इति।।

तत्र विषयासक्तस्य बन्धकत्वमेवं विषदीकृतं **भाष्ये** -

**तत्र सत्त्वम् - ''निर्मलत्वात् स्फटिकमणिरिव प्रकाशकम् अनामयम् निरुपद्रवं सत्त्वं तन्निबध्नाति। कथम्? सुखसङ्गेन 'सुखी अहम्' इति विषयभूतस्य सुखस्य विषयिणि आत्मनि संश्लेषापादनेन, 'ममैव सुखं जातम्' इति मृषैव सुखे सञ्जनम् इति। सैषा अविद्या। न हि विषयधर्मः विषयिणो भवति। इच्छादि च धृत्यन्तं क्षेत्रस्यैव विषयस्य धर्मः (१३-६) इति उक्तं भगवता। अतः अविद्ययैव स्वकीयधर्मभूतया विषयविषय्यविवेकलक्षणया अस्वात्मभूते सुखे सञ्जयतीव, आसक्तमिव करोति, असङ्गं सक्तमिव करोति, असुखिनं सुखिनमिव। तथा ज्ञानसङ्गेन च ज्ञानमिति सुखसाहचर्यात् क्षेत्रस्यैव विषयस्य अन्तः करणस्य धर्मः, नात्मनः। आत्मधर्मत्वे सङ्गानुपपत्तेः, बन्धानुपपत्तेश्च। सुखे इव ज्ञानादौ सङ्गः मन्तव्यः। हे अनघ अपाप।।'' (गी.भा. १४-६)**

१७. मन एव मनुष्याणां कारणं बन्धमोक्षयोः ।
बन्धाय विषयासङ्गि मुक्त्यै निर्विषयं मनः ।। इति विष्णुपुराणे (६-७-८)

तदेवं सत्त्वस्य विषयप्रकाशकत्वेन निर्दोषत्वेऽपि परमार्थज्ञानपरमार्थसुख तत्त्वानध्यवसायहेतोरेव बन्धकत्वमिति तावन्मात्रमपनेतव्यं शुद्धसत्त्वाव-लम्बनेनेति 'नित्यसत्त्वस्थः' इति विशेषणस्याभिप्रायोऽवसीयते।

१११. तत्र गुणानामेषां प्रत्येकं स्वभाव एष यत् स्वेतरगुणद्वयाभिभवे एव स्वात्मलाभ इति। तदुक्तम् -

रजस्तमश्चाभिभूय सत्त्वं भवति भारत।
रजः सत्त्वं तमश्चैव तमः सत्त्वं रजस्तथा ॥१४-१०॥

अत एव श्रेयोऽर्थिभिः सात्त्विकमेव शास्त्रीयं कर्म कर्तव्यमित्युपदिष्टं श्रद्धात्रयविभागाध्याये, मुमुक्षूणां च ज्ञानकर्मकर्तृबुद्धिधृतिसुखानां गुणत्रयकृतो विभागः समुपदिष्टोऽष्टादशाध्याये, कथं नाम रजस्तमसोः परिहारेण सत्त्वप्रधाना एव भवेयुरधिकारिणः - इति ॥

सर्वत्र च नित्यसत्त्वस्थत्वे गुणत्रयात्यये च परमं साधनमिदमेवो पदिष्टं भगवता -

मां च योऽव्यभिचारेण भक्तियोगेन सेवते ।
स गुणान्समतीत्यैतान्ब्रह्मभूयाय कल्पते ॥१४-२६॥

इति ॥

११२. सोऽयं गुणत्रयात्यये साधनभूतो भक्तियोगो ब्रह्मभूयाख्यनिस्त्रैगुण्यभावफलावसानो यत्र यत्रांशतोऽस्ति स स भगवद्भक्तिसंबन्धादेव योगशब्देन व्यपदिश्यते गीताशास्त्रे। तत्र शास्त्रीयकर्मव्यपाश्रयणेन तामसगुणात्ययो लेशतः, कर्मयोगाश्रयणेन त्वशेषतस्तमोऽत्ययः सत्त्वावलम्बनं च भवति। तत्र सङ्गत्यागफलत्या-गपूर्वकं भगवदभ्यर्चनपर्यन्तानुधावनात्। ध्यानयोगेन तु रजोगुणात्ययोऽपि भवति योगारूढेनैव सर्वकर्मसंन्यासपूर्वकं भगवत्तत्त्वध्याने शुद्धसात्त्विके

प्रवेशात्। अनन्येनैव योगेन भगवत्प्रपत्त्या तु सर्वथा गुणत्रयात्ययः - 'मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।' (७-१४) इति वचनात् । एवं हि भगवतो **भाष्यकारस्य वचनम्-**

**''दैवी देवस्य मम ईश्वरस्य विष्णोः स्वभूता हि यस्मात् एषा यथोक्ता गुणमयी मम माया दुरत्यया, दुःखेन अत्ययः अतिक्रमणं यस्याः सा दुरत्यया। तत्र एवं सति सर्वधर्मान् परित्यज्य मामेव मायाविनं स्वात्मभूतं सर्वात्मना ये प्रपद्यन्ते ते मायाम् एतां सर्वभूतमोहिनीं तरन्ति अतिक्रामन्ति संसारबन्धनात् मुच्यन्ते इत्यर्थः ।।''** (गी.भा. ७-१४)

इति ।।

११३. तदेवं ''त्रैगुण्यविषया वेदा निस्त्रैगुण्यो भवार्जुन'' (२-४५) इत्ययमुपपदेशः स्वकर्मणा भगवदभ्यर्चनलक्षणात् कर्मयोगादारभ्य भगवदेकशरणताप्राप्तिपर्यन्तानां साधनानां व्यवसायात्मबुद्ध्यालम्बनेनाव्यभिचरितभक्तियोगेन संपृक्तेन त्रीनपि गुणानतीत्य नित्यनिस्त्रैगुण्यात्मकब्रह्मभावोपदेशपर इति सर्वं शुद्धम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'निस्त्रैगुण्यभावोपदेशो' नाम**
**सप्तदशं सोपानम्**

# १८. भगवत्स्वरूपसतत्त्वोपदेशः

११४. अधिगतमेतद् यत् सर्व एवायं संसारस्त्रिगुणात्मकः, निस्त्रैगुण्यभाव एव च संसारान्मोक्ष इति। तत्र व्यवहारदृष्ट्या वीक्ष्यमाणे-

न तदस्ति पृथिव्यां वा दिवि देवेषु वा पुनः ।
सत्त्वं प्रकृतिजैर्मुक्तं यदेभिः स्यात् त्रिभिर्गुणैः ।।१८-४०।।

इति। परमार्थतस्तु - 'न तदस्ति विना यत्स्यात् मया भूतं चराचरम्' (१०-३९) इति भगवदुक्तप्रकारेण सर्वं भगवन्मयम् । अतो गुणानामप्यात्मा स एव । तदप्युक्तं भगवता -

ये चैव सात्त्विका भावा राजसास्तामसाश्च ये।
मत्त एवेति तान्विद्धि न त्वहं तेषु ते मयि ।।७-१२।।

[भगवानेव मूलं स्वरूपस्थित्याश्रयश्च गुणानाम् इत्यर्थः।]

तत्र ये तामसराजसप्रचुरां प्रकृतिमाश्रिताः, कामक्रोधपरायणास्ते, जगदिदमनीश्वरं कामहैतुकं चेति मत्वा कामकारेण वर्तमाना अधोगतिम् ऋच्छन्ति। यदुक्तं भगवता -

त्रिभिर्गुणमयैर्भावैरेभिः सर्वमिदं जगत् ।
मोहितं नाभिजानाति मामेभ्यः परमव्ययम् ।।

न मां दुष्कृतिनो मूढाः प्रपद्यन्ते नराधमाः ।
माययापहृतज्ञाना आसुरं भावमाश्रिताः ।।७-१३,१५।।

इति । येऽपि शास्त्रप्रमाणकाः कामपराः ते देवर्षिपित्रादीनाराध्य तत्तद्भावं गच्छन्ति । यदाह-

कामैस्तैस्तैर्हृतज्ञानाः प्रपद्यन्तेऽन्यदेवताः ।

तं तं नियममास्थाय प्रकृत्या नियताः स्वया ।।

यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति ।
तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहम् ।।

स तया श्रद्धया युक्तस्तस्याराधनमीहते ।
लभते च ततः कामान्मयैव विहितान् हि तान् ।।

अन्तवत्तु फलं तेषां तद्भवत्यल्पमेधसाम् ।
देवान्देवयजो यान्ति मद्भक्ता यान्ति मामपि।।७-२०,२१,२२,२३।

इति ।।

यान्ति देवव्रता देवान् पितॄन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम् ।।९-२५ ।।

इति च ।।

ये तु राजसतामसप्रचुरां प्रकृतिं सात्त्विकीमपि कामदूषितां विजित्य भगवन्तमेव वासुदेवं भजन्ते, ते सर्वानेव गुणानतीत्य भगवद्भावमेव प्राप्नुवन्तीति। एतदर्थमेव च योगशब्दितसाधनान्युपदिष्टान्यस्मिन् शास्त्रे इति ।।

११५. अथ यत्संबन्धादेव कर्मध्यानादिकं योगशब्दार्हं भवति तस्य वासुदेवपरब्रह्मणः सतत्त्वं यथोपदिष्टं शास्त्रे तदिह संक्षिप्य निरूप्यते। अधिकं त्वत्र '**गीताशास्त्रार्थविवेकतो**'[१८] ग्राह्यम् ।।

भगवतो निरुपाधिकं रूपं सर्वानपि गुणानतीत्य स्वेनैव निर्विकल्पेन रूपेण स्वे महिम्नि प्रतिष्ठितम् एकमेवाद्वितीयमिति तदेव सर्वम्। अतो भगवतो रूपमिति व्यपदेशमात्रमेतत्, शिलापुत्रकस्य शरीरमितिवत्।

१८. अध्यात्मप्रकाशकार्यालयेन प्रकाशितम् ।

यदाह भगवान्-

(१) बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।।७-१९।।

[परिपक्वज्ञानवन्तमेकं मुक्त्वा न केनचिदन्येन विज्ञेयं वासुदेवस-तत्त्वम् ; सर्वात्मवासुदेवभावमापन्न एव ज्ञानी तन्मयत्वादात्मन्येव स्वात्मानन्यतया अवगच्छतीत्यर्थः ।]

(२) ब्रह्मणो हि प्रतिष्ठाहममृतस्याव्ययस्य च।
शाश्वतस्य च धर्मस्य सुखस्यैकान्तिकस्य च ।।१४-२७।।

अत्र **भाष्यम् - 'यया च ईश्वरशक्त्या भक्तानुग्रहादिप्रयोजनाय ब्रह्म प्रतिष्ठते प्रवर्तते, सा शक्तिः ब्रह्मैव अहम्। शक्तिशक्तिमतोरनन्यत्वात् इत्यभिप्रायः। अथवा, ब्रह्मशब्दवाच्यत्वात् सविकल्पकं ब्रह्म, तस्य ब्रह्मणो निर्विकल्पकः अहं अवाच्यः प्रतिष्ठा आश्रयः। किंविशिष्टस्य? अमृतस्य अमरणधर्मकस्य अव्ययस्य व्ययरहितस्य। किं च, शाश्वतस्य च नित्यस्य धर्मस्य ज्ञाननिष्ठालक्षणस्य सुखस्य तज्जनितस्य ऐकान्तिकस्य एकान्तनियतस्य च, 'प्रतिष्ठा अहम्' इति अनुवर्तते।।''** (गी.भा. १४-२७)

इति ।।

[अत्र ब्रह्मणः, तच्छक्तेः, तत्प्राप्तिसाधनभूतायाः निष्ठायाः, निष्ठाजनितसुखस्य च निर्विकल्पकब्रह्मस्वरूपमात्रेण प्रतिष्ठितत्वमि त्युक्तम् ।]

११६. एवं तावत् नित्यनिर्विकल्पकमेवावस्थितं वासुदेवाख्यं परं ब्रह्म व्यवहारदृष्ट्या साधकानुग्रहार्थं सविकल्पकानपि रूपविशेषान् गृह्णातीति शास्त्रार्थे स्थिते, केन केन रूपभेदेन कैः कैरधिकारिभिः कथं कथमु पास्यं भवतीत्येतदवरोहणक्रमेण संक्षिप्य प्रदर्श्यते जिज्ञासूनां सुखबोधाय ।।

तत्र स्वरूपेण स्थितं तत्त्वम् '**अक्षरम्**' इति समादिष्टं **द्वादशाध्याये**-

> ये त्वक्षरमनिर्देश्यमव्यक्तं पर्युपासते।
> सर्वत्रगमचिन्त्यं च कूटस्थमचलं ध्रुवम्।।
>
> सन्नियम्येन्द्रियग्रामं सर्वत्र समबुद्धयः ।
> ते प्राप्नुवन्ति मामेव सर्वभूतहिते रताः ।।१२-३, ४।।

अत्र अक्षरम् इत्यौपनिषदं तत्त्वम् 'अस्थूलमनणु' (बृ.३-८-८), 'यत्तदद्रेश्यम्' (मुं. १-१-६) इत्यादिलक्षणं यत् तदेव निर्दिश्यते इति स्पष्टम्। तच्च अनिर्देश्यत्वात् अव्यक्तत्वात् अचिन्त्यत्वाच्च सर्वकरणा-गोचरमित्यतः 'पर्युपासते' इति नोपास्योपासकभेदं प्रकल्प्य ध्यानमुपदि-श्यते तथा कर्तुमशक्यत्वात् '**येनाहुर्मनो मतम्। तदेव ब्रह्म त्वं विद्धि नेदम् यदिदमुपासते**' (के. १-६) इति श्रुत्या प्रत्यक्षमेवोपास्तिक्रिया-कर्मत्वनिषेधाच्चाब्रह्मतापि। किं तर्हि '**ते सर्वगं सर्वतः प्राप्य धीरा युक्तात्मानः सर्वमेवाविशन्ति**' (मुं. ३-२-५) इत्युक्तप्रकारेण तदात्मतया आसनमेव पर्युपासनम्, '**आत्मेत्येवोपासीत**' (बृ.१-४-७) इत्यादिवदेव तूपास्तिः। 'ते प्राप्नुवन्ति मामेव' इति प्राप्तिरपि प्राप्तप्राप्तिरुच्यते। तथा ह्याथर्वणवाक्य**भाष्यम्** - '**युक्तात्मानो नित्यसमाहितस्वभावाः सर्वमेव समस्तं शरीरपातकालेऽपि आविशन्ति भिन्ने घटे घटाकाशवत्, अविद्याकृतोपाधिपरिच्छेदं जहति**' (मुं भा. ३-२-५)

इति ।।

११७. अत्र देहेन्द्रियसंघातेऽभिमानं सर्वथा परित्यक्तवतामेवाधिकारः। अतः **एकादशेऽध्याये** समादिष्टविश्वरूपोपासनमेतदपेक्षया सुकरमि त्युपदिश्यते -

> क्लेशोऽधिकतरस्तेषामव्यक्तासक्तचेतसाम्।
> अव्यक्ता हि गतिर्दुःखं देहवद्भिरवाप्यते।।

ये तु सर्वाणि कर्माणि मयि संन्यस्य मत्पराः ।
अनन्येनैव योगेन मां ध्यायन्त उपासते ।।

तेषामहं समुद्धर्ता मृत्युसंसारसागरात् ।
भवामि नचिरात्पार्थ मय्यावेशितचेतसाम् ।।

मय्येव मन आधत्स्व मयि बुद्धिं निवेशय ।
निवसिष्यसि मय्येव अत ऊर्ध्वं न संशयः ।।१२-५,६,७,८।।

अत्र विश्वरूपं प्रदर्श्य श्रीकृष्णेन 'मत्कर्मकृत्' (११-५५) इत्यादिना विश्वरूपोपासनायाश्चोदितत्वात् अर्जुनेनापि 'एवं सततयुक्ता ये भक्तास्त्वां पर्युपासते' (१२-१) इति तदेव परामृश्य प्रश्नकरणाच्च 'मां ध्यायन्त उपासते' (१२-६) इत्यस्मच्छब्देन विश्वरूप एव भगवान् परामृश्यत इति गम्यते। न च तावता अक्षरस्य तदन्यत्वं शङ्क्यम्; 'ते प्राप्नुवन्ति मामेव' (१२-४) इति फलनिर्देशस्यासामञ्जस्य प्रसङ्गात्। इत्थं च यदेव भगवद्रूपमक्षरसंज्ञं निरुपाधिकम्, तदेव तु विश्वरूपतयोपास्यं निर्दिष्टम्। विश्वलक्षणोपाधिवशात् त्वनयोर्भेद इति गम्यते ।।

११८. 'यदक्षरं वेदविदो वदन्ति' (८-११) इत्युपदिष्टं तु ब्रह्म **अक्षराव्यक्ता**दिशब्दै**र्द्वादशे** निर्दिष्टमेव नातिरिक्तम्। परन्तु एकत्र प्रणवेऽक्षरबुद्धिमावेश्योपासनं कर्तव्यतया चोद्यते कालान्तरमुक्तिफलदम् 'यः प्रयाति त्यजन्देहं स याति परमां गतिम्' (८-१३) इति वचनात्, अन्यत्र तु साक्षादेव अक्षरध्यानं सम्यग्दर्शनेन सद्योमुक्तिफलदम्, 'सर्वत्र समबुद्धयः। ते प्राप्नुवन्ति मामेव' (१२-४) इत्युक्तेः- इति विशेषः ।।

११९. **दशमे** निर्दिष्टा **विभूतयः**, तत्र तत्र तारतम्येन भगवत्स्वरूपम् अभिव्यक्तम् इति तथोपास्यत्वाय निर्दिष्टाः। 'केषु केषु च भावेषु चिन्त्योऽसि भगवन् मया' (१०-१७) इति प्रश्नोपन्यासात् 'तत्तदेवावगच्छ त्वं मम तेजोंऽशसम्भवम्' (१०-४१) इति अंशशब्दादानपूर्वकं

प्रतिवचनाच्च। विश्वरूपस्यापि 'एकांशेन स्थितो जगत्' (१०-४२) इति तु न विश्वरूपात्मनोऽपि विभूतिविशेषख्यापनाय। कथं तर्हि ? सोपाधिकात् विश्वरूपादपि स्वेन निरुपाधिकेन निरस्तसर्वविशेषस्वभावेनास्त्येव भगवान् तदेव तु तस्य पारमार्थिकं रूपम् इति ज्ञापनाय। तथा हि **श्रुतिः** - पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि' इति, 'एतावानस्य महिमाऽतो ज्यायांश्च पूरुषः' (ऋ.१०-८-९०-३) इति च ॥

१२०. अथैवमक्षरस्य विश्वरूपाद् वैलक्षण्यद्योतनाय विश्वरूपस्यांशत्वनिर्देशेऽपि कथं परब्रह्मतत्त्वस्य कूटस्थत्वं भवेत्? अक्षरस्यैव विश्वरूपत्वेन प्रादुर्भावदशायामंशेन परिणामवत्त्वाभ्युपगमस्य दुर्वारणत्वादिति चेत्। नैष दोषः। मायया रूपभेदस्याप्याश्रयणात्। न ह्यविद्याकल्पितेन मायिकरूपभेदेन परमार्थत एव सांशत्वमापद्यते। एवमेव हि भगवतो लीलाविग्रहरूपवत्त्वाङ्गीकारः श्रीकृष्णरूपेण जन्म स्वेन कूटस्थरूपेणावस्थितिश्चावकल्पते। यदाह भगवान् स्वयमेव -

अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन् ।
प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया ॥४-६॥

**भाष्यं** चात्र भवति -

''**कथं तर्हि तव नित्येश्वरस्य धर्माधर्माभावेऽपि जन्म इति? उच्यते। अजोऽपि जन्मरहितोऽपि सन्, तथा अव्ययात्मा अक्षीणज्ञानशक्तिस्वभावोऽपि सन्, तथा भूतानां ब्रह्मादिस्तम्बपर्यन्तानाम् ईश्वरः ईशनशीलोऽपि सन्, प्रकृतिं स्वां मम वैष्णवीं मायां त्रिगुणात्मिकाम्, यस्या वशे सर्वं जगत् वर्तते यया मोहितं सत् स्वमात्मानं वासुदेवं न जानाति, तां प्रकृतिं स्वाम् अधिष्ठाय वशीकृत्य संभवामि देहवानिव भवामि, जात इव आत्ममायया आत्मनो मायया, न परमार्थतो लोकवत्॥**''(गी.भा.४-६)

इत एव ह्याकृष्य सम्बन्धग्रन्थे स्पष्टमेवोक्तम् भगवता **भाष्यकारेण** –

**'स आदिकर्ता नारायणाख्यो विष्णुः भौमस्य ब्रह्मणो ब्राह्मणत्वस्य रक्षणार्थं देवक्यां वसुदेवात् अंशेन कृष्णः किल संबभूव। ... स च भगवान् ज्ञानैश्वर्यशक्तिबलवीर्यतेजोभिः सदा संपन्नः त्रिगुणात्मिकां वैष्णवीं स्वां मायां मूलप्रकृतिं वशीकृत्य अजोऽव्ययो भूतानामीश्वरो नित्यशुद्धबुद्धमुक्तस्वभावोऽपि सन् स्वमायया देहवानिव जात इव च लोकानुग्रहं कुर्वन् लक्ष्यते ।।'** (गी.भा.संबन्धग्रन्थे)

इति ।।

१२१. तदेतत् भगवतः कूटस्थनित्यं स्वरूपं बोधयितुमुपायत्वेन पदे पदे एषैव मायाख्या प्रकृतिरुपन्यस्ता दृश्यते गीतासु। तद्यथा –

**सप्तमे** तावत् –

मय्यासक्तमनाः पार्थ योगं युञ्जन्मदाश्रयः ।
असंशयं समग्रं मां यथा ज्ञास्यसि तच्छृणु ।।७-१।।

भगवत्स्वरूपं यथावत् ज्ञातुमुपायं निर्दिदिक्षुराह –

भूमिरापोऽनलो वायुः खं मनो बुद्धिरेव च।
अहंकार इतीयं मे भिन्ना प्रकृतिरष्टधा ।।

अपरेऽयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्।
जीवभूतां महाबाहो ययेदं धार्यते जगत्।।७-४, ५।।

इति मायामपरप्रकृतित्वेन, तत्कार्यभूते जगति प्रविष्टां जीवरूपां परप्रकृतित्वेन च प्रतिजज्ञे। ततः स्वमक्षरं रूपं गुणत्रयात्मकमायायाः सकाशात् परमिति बोधयामास ।

दैवी ह्येषा गुणमयी मम मया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते।।७-१४।।

इति मायां मायामात्रत्वाद्भगवदेकप्रपत्त्या तर्तव्यां चाह ।

**पुनर्नवमे**ऽपि-

मयाध्यक्षेण प्रकृतिः सूयते सचराचरम् ।
हेतुनानेन कौन्तेय जगद्विपरिवर्तते ।।९-१०।।

इति मायामयस्य जगतोऽध्यक्षत्वेन स्वां निर्दिश्य मायिकीं स्वां मानुषीं तनुमतीत्य स्थितमात्मानमेव ज्ञेयत्वेन निर्दिदेश -

अवजानन्ति मां मूढा मानुषीं तनुमाश्रितम् ।
परं भावमजानन्तो मम भूतमहेश्वरम् ।। ९-११ ।।

इति ।।

तथा **त्रयोदशे**ऽपि -

यावत्सञ्जायते किञ्चित्सत्त्वं स्थावरजङ्गमम् ।
क्षेत्रक्षेत्रज्ञसंयोगात् तद्विद्धि भरतर्षभ ।। १३-२६ ।।

इति प्रकृतिपुरुषाविवेकनिबन्धनसंयोगेन मिथ्याज्ञानेन पुनः पुनर्जनिप्राप्तिलक्षणः संसारः इत्युक्त्वा -

प्रकृत्यैव च कर्माणि क्रियमाणानि सर्वशः ।
यः पश्यति तथाऽऽत्मानमकर्तारं स पश्यति ।। १३-२९ ।।

प्रकृतेर्विविक्तस्य पुरुषस्यासंसारिस्वभावत्वम् -

यदा भूतपृथग्भावमेकस्थमनुपश्यति ।
तत एव च विस्तारं ब्रह्म सम्पद्यते तदा ।।

अनादित्वान्निर्गुणत्वात् परमात्मायमव्ययः ।
शरीरस्थोऽपि कौन्तेय न करोति न लिप्यते ।।१३-३०,३१।।

इति परप्रकृतित्वेन, निर्दिष्टस्य जीवस्याप्यपरप्रकृतिसंबन्धाधानात् परमात्मनः एवोत्पत्तिमिवापन्नस्य प्रकृतिपुरुषसतत्त्वविवेकात् ब्रह्मभावमाह ।।

एवं **पञ्चदशाध्याये**ऽपि संसारवृक्षं मायामयं प्रकृत्य 'ममैवांशो जीवलोके' (१५-७) इति परप्रकृतिशब्दोदितं जीवमप्युपवर्ण्य ते एव प्रकृती क्षराक्षरनामनी अतीत्य स्थितत्वात् भगवान् पुरुषोत्तम इत्याह -

यस्मात्क्षरमतीतोऽहमक्षरादपि चोत्तमः ।
अतोऽस्मि लोके वेदे च प्रथितः पुरुषोत्तमः ।।१५-१८।।

इति ।।

१२२. तदेवं नित्यनिरस्तसमस्तोपाधिकमेवाक्षराख्यस्य भगवतः स्वरूपम् । त्रिगुणात्मकमायाख्यप्रकृतिलक्षणोपाधिवशादेव जगत्कारणत्वं विश्वरूपत्वं च व्यपदिश्यते। मायाविलसितमेव च तस्य देवकीवसुदेवसुतत्वेन लीलाविग्रहधारणं जन्म, साधुपरित्राणधर्मसंस्थापनादिकर्मसंबन्धश्च नैव पारमार्थिकं तस्य साकारत्वम्, सगुणत्वम्, सांशत्वम्, जन्मकर्मसंबन्धो वा, नित्यशुद्धबुद्धमुक्तस्वभावत्वादिति गीतोपदेशः ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'भगवत्स्वरूपसतत्त्वोपदेशो' नाम**
**अष्टादशं सोपानम्**

# १९. जीवसतत्त्वोपदेशः

१२३. अथ योऽसावधिकृतः शास्त्रोपदिष्टयोगेषु तस्यास्य जीवस्य सतत्त्वं निरूपणीयम्। यद्यपि सांख्यादियोगनिरूपणप्रसङ्गेन जीवोऽपि निरूपित एव, जीवत्वेन विभाव्यमानस्यैव जन्मबाल्याद्यवस्थासु व्यभिचरत्स्वपि स्वरूपेणैवाव्यभिचारिणाऽवतिष्ठमानस्य कर्तृत्वभोक्तृत्व रहितब्रह्मात्मरूपत्वावधारणात्। 'एषा ब्राह्मी स्थितिः पार्थ' (२-७२) इत्यादिना तद्रूपेणावस्थितेः संस्तुतत्वाच्च। तथापि -

बहूनि मे व्यतीतानि जन्मानि तव चार्जुन।
तान्यहं वेद सर्वाणि न त्वं वेत्थ परन्तप।।४-५।।

ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति।
भ्रामयन्सर्वभूतानि यन्त्रारूढानि मायया।।१८-६१।।

प्रकृतिं स्वामधिष्ठाय सम्भवाम्यात्ममायया।।४-६।।

तमेव शरणं गच्छ सर्वभावेन भारत।
तत्प्रसादात् परां शान्तिं स्थानं प्राप्स्यसि शाश्वतम्।।१८-६२।।

यज्ज्ञात्वा मुनयः सर्वे परां सिद्धिमितो गताः।।१४-१।।

स्थित्वाऽस्यामन्तकालेऽपि ब्रह्मनिर्वाणमृच्छति।।२-७२।।

इत्यादिस्थलेषु जीवस्याज्ञत्वेश्वरनियम्यत्वेश्वरप्रसादलभ्यपुरुषार्थवत्त्वा नेकत्वज्ञानलभ्यमुक्त्यतिशयवत्त्वादिना ईश्वरवैलक्षण्यादेरपि प्रतिपाद-काभासवचनानामपि दर्शनात् शास्त्रार्थनैर्मल्याय जीवसतत्त्वं हिरुङ् निरूप्यं भवति मन्दमतीनां जिज्ञासूनां व्यामोहो यथा व्यपनीयेत। अत उपदेशसोपानान्तरं प्रारभ्यते।।

१२४. तत्रार्जुनस्य अज्ञत्वम्, अशक्तत्वम्, कर्तृत्वभोक्तृत्वादिकं च लोकसिद्धमेवेति तदनूद्यार्थान्तरं तात्पर्येण कथनं तावदन्वाख्यानमात्रं न तत्र तात्पर्यवदित्यविरोधो द्रष्टव्यः। तद्यथा –

'अशोच्यानन्वशोचस्त्वम्' (२-११) इति 'नानुशोचन्ति पण्डिताः' (२-११) इति ज्ञानिस्वभावप्रतिपादनायानुवादः, 'कर्मण्येवाधिकारस्ते' (२-४७) इति कर्मयोगविधानार्थं कर्तृत्वानुवादः, 'अहङ्कारविमूढात्मा कर्ताहमिति मन्यते' (३-२७) इति 'तत्त्ववित्तु ...। गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते' (३-२८) इति तत्त्वज्ञानप्रशंसार्थमनुवादः, 'न त्वं वेत्थ परन्तप' (४-५) इतीश्वरस्य सर्वज्ञत्वप्रतिपादनार्थमज्ञत्वस्यानुवाद इत्येवं सर्वत्र जीवस्य निहीनोपाधिसंबन्धात् संसारित्वानुवादो न विरुध्यते ।।

१२५. एवम्

न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।
इति मां योऽभिजानाति कर्मभिर्न स बध्यते ।।४-१४।।

यो मां पश्यति सर्वत्र सर्वं च मयि पश्यति ।
तस्याहं न प्रणश्यामि स च मे न प्रणश्यति ।।६-३०।।

बहूनां जन्मनामन्ते ज्ञानवान्मां प्रपद्यते ।
वासुदेवः सर्वमिति स महात्मा सुदुर्लभः ।।७-१९।।

ये भजन्ति तु मां भक्त्या मयि ते तेषु चाप्यहम् ।।९-२९।।

मद्भक्त एतद्विज्ञाय मद्भावायोपपद्यते ।।१३-१८।।

गुणेभ्यश्च परं वेत्ति मद्भावं सोऽधिगच्छति ।।१४-१९।।

यो मामेवमसम्मूढो जानाति पुरुषोत्तमम् ।
स सर्वविद्भजति मां सर्वभावेन भारत ।।१५-१९।।

इत्यादिस्थलेषु यत्र यत्र भगवत्तत्त्वज्ञानेन वेत्तुः फलं संकीर्त्यते भगवद्भावलक्षणम् तत्र सर्वत्राप्यज्ञानत एव जीवस्य पृथग्भावः, ज्ञानमात्रेण नित्यसिद्धेशत्वमेवाभिव्यज्यत इति कथनार्थमिति वेद्यम्।।

यदपि क्रियाकारकफलात्मकत्वं लोके दृष्टं जीवस्य, तदपि तत्त्वज्ञानाभावादविद्यासंवीतचेतस्त्वादेवेति भगवतैव सुस्पष्टमुद्घोषितम् -

न कर्तृत्वं न कर्माणि लोकस्य सृजति प्रभुः ।
न कर्मफलसंयोगं स्वभावस्तु प्रवर्तते ।।

नादत्ते कस्यचित्पापं न चैव सुकृतं विभुः ।
अज्ञानेनावृतं ज्ञानं तेन मुह्यन्ति जन्तवः ।।५-१४,१५ ।।

इति। कथमविद्यास्वभावकृत एव तु कर्तृत्वादिकमित्यत्राप्याह भगवान्-

अधिष्ठानं तथा कर्ता करणं च पृथग्विधम् ।
विविधाश्च पृथक्चेष्टा दैवं चैवात्र पञ्चमम् ।।१८-१४।।

इत्यधिष्ठानादिपञ्चभिः संहतत्वकल्पनालक्षणाविद्यैव कर्तृत्वे हेतुरित्युक्त्वा-

तत्रैवं सति कर्तारमात्मानं केवलं तु यः।
पश्यत्यकृतबुद्धित्वान्न स पश्यति दुर्मतिः ।।१८-१६।।

इति केवलस्यात्मनोऽकर्तृत्वमेव परमार्थत इत्याह। न्याय्यं चैतत् - न हि 'अविकार्योऽयमुच्यते' (२-३०) इत्युक्तरीत्याविकार्यस्वभावस्यात्मनः शरीरादिभिः संहननं तैः संभूय कर्तृत्वं वा शक्यकल्पनं कथञ्चिदपि। अत एवाह भगवान् -

पुरुषः प्रकृतिस्थो हि भुङ्क्ते प्रकृतिजान्गुणान्।
कारणं गुणसङ्गोऽस्य सदसद्योनिजन्मसु ।।१३-२१।।

इति गुणसङ्गेन कर्तृत्वभोक्तृत्वम्; स्वरूपेण च परमात्मत्वमेवेति च -

उपद्रष्टानुमन्ता च भर्ता भोक्ता महेश्वरः ।
परमात्मेति चाप्युक्तो देहेऽस्मिन्पुरुषः परः ।।१३-२२।।

इति ।।

१२६. यत्तु 'अपरेयमितस्त्वन्यां प्रकृतिं विद्धि मे पराम्' (७-५) इत्युत्कृष्टप्रकृतित्वेन, 'ममैवांशो जीवलोके जीवभूतः सनातनः' (१५-७) इत्यंशत्वेन च भगवत्संबद्धत्वमेव तु जीवस्य, तत्तु परमपुरुषादभिन्नत्वमेव जीवतत्त्वम् उपाधिवशाद् भिन्नमिवावभासते, उपाधेश्चाविद्याप्रत्युपस्थापितत्वात् अविद्यापाये जीवत्वापायः, नित्यसिद्धेश्वरत्वाभिव्यक्तिश्च-इति बोधनार्थम्। न पुनरीश्वरसंबन्धित्वेन तदायत्तत्वस्य तदवयवत्वस्य वा प्रतिपादनार्थम्। यथा हीश्वरांशत्वं प्रकृतिः - इत्युक्ती तदनन्यत्वमेव बोध्यत्वेनोच्येते, यथा वा घटाद्याकाशस्य परमाकाशस्यांशत्ववाचोयुक्त्या आकाशानन्यत्वमेव न ततोऽन्यत्वं तद्वत्। तथा च **भाष्यम् -**

''**यथा जलसूर्यकः सूर्यांशः जलनिमित्तापाये सूर्यमेव गत्वा न निवर्तते तेनैव आत्मना संगच्छति, एवमेव। यथा वा घटाद्युपाधिपरिच्छिन्नो घटाद्याकाशः आकाशांशः सन् घटादिनिमित्तापाये आकाशं प्राप्य न निवर्तते। अतः उपपन्नमुक्तम् 'यद्गत्वा न निवर्तन्ते' (१५-६) इति । ननु निरवयवस्य परमात्मनः कुतोऽवयवः एकदेशो अंशः इति? सावयवत्वे च विनाशप्रसङ्गः, अवयवविभागात्। नैष दोषः। अविद्याकृतोपाधिपरिच्छिन्नः एकदेशः अंश इव कल्पितो यतः दर्शितश्च अयमर्थः क्षेत्राध्याये विस्तरशः**'' (गी.भा. १५-७)

इति ।।

तस्मात् प्रकृतित्वमंशत्वं च तत्साधर्म्यद्योतनेनैकात्म्यसूचनार्थमेवेति सिद्धम् ।।

१२७. एवं जीवस्योत्क्रान्त्यादिकीर्तनमपि भगवता तादात्म्यप्रतिपादनार्थमेव। विविधावस्थाभागिव परिभाव्यमानोऽपि सदा परमात्मस्वरूपत्वेनावतिष्ठते, न तत्त्वाज्जातुचित्प्रच्युतो भवतीत्येतज्ज्ञापनार्थमेव–

उत्क्रामन्तं स्थितं वापि भुञ्जानं वा गुणान्वितम्।
विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः ।।१५–१०।।

इति भगवत्स्वरूपत्वस्य सर्वदा ज्ञानिभिरनुभूयमानत्वकथनात्। तथा हि **भाष्यम्** –

''**एवंभूतमपि एनम् अत्यन्तदर्शनगोचरप्राप्तं विमूढाः दृष्टादृष्टविषयभोगबलाकृष्टचेतस्तया अनेकधा मूढाः नानुपश्यन्ति। 'अहो कष्टं वर्तते' इति अनुक्रोशति च भगवान् ।।**'' (गी.भा. १५–१०)

इति ।।

न त्वत्रांशत्वमवधार्यते, भगवत्स्वरूपं तु न ह्यंश एव इत्युक्तमत्र, अपि तु 'ममैवांशः' इति। आहुश्च **संप्रदायविदः** –

मरणे संभवे चैव गत्यागमनयोरपि।
स्थितौ सर्वशरीरेषु ह्याकाशेनाविलक्षणः ।।

संघाताः स्वप्नवत्सर्वे ह्यात्ममायाविसर्जिताः।
आधिक्ये सर्वसाम्ये वा नोपपत्तिर्हि विद्यते।।गौ.का.३–९,१०।।

इति ।।

[घटाकाशादीनां सर्वास्ववस्थास्वप्याकाशाविलक्षणत्वमेव। घटाद्युपाधीनामप्याकाशाभिन्नत्वं यथा, तथा जीवानां परमात्माभिन्नत्वमेव, संघातानां च मायिकत्वात् इत्यर्थः।]

अत एवैनं पारमार्थिकेन स्वरूपेण द्रष्टुं प्रयतितव्यं मुमुक्षुभिरिति तद्दर्शनं सुदुर्लभं कुयोगिनामिति 'न हि निन्दा'न्यायेन स्तौति –

यतन्तो योगिनश्चैनं पश्यन्त्यात्मन्यवस्थितम्।
यतन्तोऽप्यकृतात्मानो नैनं पश्यन्त्यचेतसः ।। १५-११।।

इति ।

विशदीकृतं च **भाष्यकारेणै**तत् –

''**केचित्तु यतन्तः प्रयत्नं कुर्वन्तः योगिनश्च समाहितचित्ताः एनं प्रकृतम् आत्मानं पश्यन्ति 'अयमहमस्मि' इति उपलभन्ते । आत्मनि स्वस्यां बुद्धौ अवस्थितम्। यतन्तोऽपि शास्त्रादिप्रमाणैः अकृतात्मानः असंस्कृतात्मानः तपसा इन्द्रियजयेन च, दुश्चरितात् अनुपरताः, अशान्तदर्पाः, प्रयत्नं कुर्वन्तोऽपि नैनं पश्यन्ति अचेतसः अविवेकिनः**'' (गी.भा. १५-११)

इति ।।

एतदुक्तं भवति – दुश्चरितादुपरताः शास्त्राचार्योपदेशशमदमादि-संस्कृतमनस एवैनं संसारित्वापादकोपाधिभिर्विविच्य स्वेन पारमार्थिकेन परमात्मरूपेण द्रष्टुं शक्नुवन्ति नान्ये बाह्यविषयविषयकप्रत्ययापकृष्टचेतसः इति ।।

१२८. तत्स्वरूपविवेचनप्रकारश्च विस्तरेण प्रतिपादितः क्षेत्राध्याये –

महाभूतान्यहंकारो बुद्धिरव्यक्तमेव च ।
इन्द्रियाणि दशैकं च पञ्च चेन्द्रियगोचराः ।।

इच्छा द्वेषः सुखं दुःखं संघातश्चेतना धृतिः ।
एतत् क्षेत्रं समासेन सविकारमुदाहृतम् ।।१३-५,६।।

इति विषयभूतं क्षेत्रं प्रदर्श्य अमानित्वादितत्त्वज्ञानार्थदर्शनपर्यन्तं ज्ञानसाधनगणमुपदिश्य 'ज्ञेयं यत् तत् प्रवक्ष्यामि' (१३-१२) इति प्रतिज्ञाय -

सर्वतः पाणिपादं तत्सर्वतोऽक्षिशिरोमुखम्।
सर्वतः श्रुतिमल्लोके सर्वमावृत्य तिष्ठति।।१३-१३।।

इत्यविद्याध्यारोपितसर्वजीवदेहावयवत्वेन गम्यमानाः पाणिपादादयः यच्छक्तिनिबन्धना एव च दृश्यन्ते - तदेव सर्वकार्यकरणविवर्जितं निर्विशेषं क्षेत्रज्ञस्य पारमार्थिकं स्वरूपमिति दर्शयन्नाह -

सर्वेन्द्रियगुणाभासं सर्वेन्द्रियविवर्जितम्।
असक्तं सर्वभृच्चैव निर्गुणं गुणभोक्तृ च ।।१३-१४।।

इत्यादिना ।।

१२९. तस्मात् यदेव सूत्रितं क्षेत्राध्यायादौ -

इदं शरीरं कौन्तेय क्षेत्रमित्यभिधीयते ।
एतद्यो वेत्ति तं प्राहुः क्षेत्रज्ञ इति तद्विदः।।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।।१३-१, २।।

इति तदेव सर्वक्षेत्रावभासककूटस्थनित्यचैतन्यभगवत्स्वरूपानन्यत्वात् क्षेत्रज्ञाख्यस्य जीवस्य पारमार्थिकं सतत्त्वम् इति सर्वं शुद्धम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'जीवसतत्त्वोपदेशो' नाम**
**एकोनविंशं सोपानम्**

# २०. स्थितप्रज्ञलक्षणोपदेशः

१३०. एवं तावत् जीवस्य सतत्त्वम् अद्वितीयब्रह्मत्वमेवेति नित्यशुद्धबुद्धमुक्तस्वभावाः एव सर्वे क्षेत्रज्ञा अनेकत्वेन संसारित्वेन च विभाव्यमाना लोकदृष्ट्या – इति निर्णीतम् 'क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत' (१३-२) इति वचनात्, भगवत्स्वरूपं चाजाव्ययस्वभावमिति च। अतः परस्य ग्रन्थस्य किमुत्थानमिति ? उच्यते – द्विविधा हि शास्त्रप्रतिपाद्या जीवाः – मुक्ताः कृतकृत्याः, मुमुक्षवश्च पुरुषार्थसा धन-ानुष्ठातार इति। तत्र मुक्ताः शास्त्रदृष्ट्या भगवत आत्मभूता एव ते इति न तान्प्रति किञ्चिदुपदेष्टव्यमवशिष्यते 'एतद् बुद्ध्वा बुद्धिमान् स्यात् कृतकृत्यश्च भारत' (१५-२०) इति वचनात्, मुमुक्षवस्तु कर्मयोगाद्य-नुष्ठाने नियुज्यन्ते, आत्मेश्वरभेदमाश्रित्याध्यारोपदृष्ट्या इति स्थितिः। अत एव शास्त्रे तत्तद्योगोपदेशान्ते कृतकृत्यलक्षणान्यनुकीर्त्यन्ते, कथम् नाम मुमुक्षवः कृतकृत्यव्यवहारानुकारेण साधनान्यनुष्ठाय सम्यग्ज्ञानं लब्ध्वा पुरुषार्थं प्राप्नुयुरिति। तथा चोक्तं भाष्यकारेण स्थितप्रज्ञलक्षणानु कीर्तनप्रकरणव्याख्यानप्रसङ्गेन –

''**यो हि आदित एव संन्यस्य कर्माणि ज्ञानयोगनिष्ठायां प्रवृत्तः, यश्च कर्मयोगे**[१९]**, तयोः 'प्रजहाति' इत्यारभ्य अध्यायपरिसमाप्तिपर्यन्तं स्थितप्रज्ञलक्षणं साधनं चोपदिश्यते। सर्वत्रैव हि अध्यात्मशास्त्रे कृतार्थलक्षणानि यानि तान्येव साधनानि उपदिश्यन्ते, यत्नसाध्यत्वात् ।**'' (गी.भा.२-५५)

इति ।।

अत्र हि 'बुद्ध्या विशुद्धया युक्तः' (१८-५१) इत्यारभ्योपदिष्टायां ज्ञाननिष्ठायां प्रवृत्तस्य, 'स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः।'

१९.'कर्मयोगेन' इत्यतो वरं 'कर्मयोगे' इत्येव पठितमिति तथैव स्थापितोऽत्र पाठः।
– इयं टिप्पणी ग्रन्थकृत एव

(१८-४६) इत्युपदिष्टे कर्मयोगे प्रवृत्तस्य च स्थितप्रज्ञलक्षणान्येव साधनत्वेनोच्यन्ते इत्याह **भाष्यकृत्** ।।

तस्मात् यानि यानि शास्त्रेऽत्र कृतकृत्यलक्षणानि तत्र तत्रोक्तानि तानि तानि संकलय्य निर्दिश्यन्ते साधकानामर्थाय ।।

१३१. कृतार्थाः सम्यग्दर्शिनोऽत्र 'स्थितप्रज्ञाः', 'युक्ताः', 'भक्ताः' 'गुणातीता'श्च - इति चतुर्धा व्यपदिष्टाः। स्थितप्रज्ञलक्षणानि तावत् द्वितीयाध्याये समुपदिष्टानि। तत्र प्रप्रथमं लक्षणमिदमुदाहृतम् -

(१) प्रजहाति यदा कामान् सर्वान् पार्थ मनोगतान् ।
आत्मन्येवात्मना तुष्टः स्थितप्रज्ञस्तदोच्यते ।।२-५५।।

अयं **कामप्रहाणलक्षणः** सर्वप्रधानोपदेश इति गम्यते। उपसंहारेऽपि -

विहाय कामान् यः सर्वान् पुंमाश्चरति निःस्पृहः।
निर्ममो निरहङ्कारः स शान्तिमधिगच्छति ।।२-७१।।

इत्युपसंहारात्, श्रुत्यनुगमाच्च। 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः। अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते ।।' (का.२-३-१४) इति हि श्रुतिः। कामस्य सर्वानर्थमूलत्वस्मरणाच्च। 'ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते। सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ।।' (२-६२) इत्युपक्रम्य 'बुद्धिनाशात् प्रणश्यति' (२-६३) इत्यन्तेन ग्रन्थेन सर्वपुरुषार्थाद् भ्रंशो भवति कामोपहतचित्तस्य - इति हि स्मर्यते। उत्तरत्रापि 'काम एष क्रोध एष रजोगुणसमुद्भवः। महाशनो महापाप्मा विद्ध्येनमिह वैरिणम् ।।' (३-३७) इति बहुधा निन्दिष्यमाणत्वाच्च ।।

(२) दुःखेष्वनुद्विग्नमनाः सुखेषु विगतस्पृहः।
वीतरागभयक्रोधः स्थितधीर्मुनिरुच्यते ।।२-५६।।

यः सर्वत्रानभिस्नेहस्तत्तत्प्राप्य शुभाशुभम्।
नाभिनन्दति न द्वेष्टि तस्य प्रज्ञा प्रतिष्ठिता।।२-५७।।

अत्र **द्वन्द्वप्रहाणं** स्थितप्रज्ञलक्षणमुक्तम्। इदं च भगवद्भक्त्यनुष्ठाने संनिकृष्टं साधनम्। वक्ष्यति हि -

येषां त्वन्तगतं पापं जनानां पुण्यकर्मणाम्।
ते द्वन्द्वमोहनिर्मुक्ता भजन्ते मां दृढव्रताः ।। ७-२८।।

इति ।।

(३) **इन्द्रियनिग्रहः** तृतीयं साधनम् -

यदा संहरते चायं कूर्मोऽङ्गानीव सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता।।२-५८।।

इत्युपक्रम्य -

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता।।२-६१।।

इत्युपसंहाराद् हीन्द्रियवशीकारो बुद्धेः प्रतिष्ठायां प्रथमं साधनमिति गम्यते। वक्ष्यति ह्युत्तरत्रापि -

आवृतं ज्ञानमेतेन ज्ञानिनो नित्यवैरिणा ।
कामरूपेण कौन्तेय दुष्पूरेणानलेन च।।

इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते।
एतैर्विमोहयत्येष ज्ञानमावृत्य देहिनम्।।

तस्मात्त्वमिन्द्रियाण्यादौ नियम्य भरतर्षभ।
पाप्मानं प्रजहि ह्येनं ज्ञानविज्ञाननाशनम्।।३-३९,४०,४१।।

इति ।।

इहाप्युपसंहरिष्यति पुनरपि -

तस्माद्यस्य महाबाहो निगृहीतानि सर्वशः ।
इन्द्रियाणीन्द्रियार्थेभ्यस्तस्य प्रज्ञा प्रतिष्ठिता ।।२-६८।।

इति ।।

(४) विषया विनिवर्तन्ते निराहारस्य देहिनः ।
रसवर्जं रसोऽप्यस्य परं दृष्ट्वा निवर्तते ।।

यततो ह्यपि कौन्तेय पुरुषस्य विपश्चितः ।
इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ।।

तानि सर्वाणि संयम्य युक्त आसीत मत्परः ।
वशे हि यस्येन्द्रियाणि तस्य प्रज्ञा प्रतिष्ठिता ।।२-५९,६०,६१।।

केवलं पुरुषप्रयत्नेनेन्द्रियमनसोर्निग्रहो दुरापः, अतः परमेश्वरे एव तु चित्तं समाधाय तत्रैव स्थितौ तत्परः स्यादित्ययं परमोपदेशः स्थितप्रज्ञत्वं प्रेप्सूनाम् ।।

१३२. तदेवं स्थितप्रज्ञलक्षणोपदेशेन साधकानां कामप्रहाणम्, द्वन्द्वप्रहाणम्, इन्द्रियसंयमः, भगवत्येव तात्पर्येण चित्तसमाधानं च कर्तव्यतया समुपदिष्टं भवति साधनचतुष्टयमित्यवधेयम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'स्थितप्रज्ञलक्षणोपदेशो'[२०] नाम**
**विंशं सोपानम्**

---

२०. अत्र 'कृतकृत्यलक्षणोपदेशः' इति नामान्तरमपि दत्तं मूलग्रन्थे ।

# २१. युक्तलक्षणोपदेशः

१३३. यथैव भवगद्भावमापन्नः पुरुषो विविधविषयेष्वविक्षिप्तबुद्धित्वात् सर्वस्याप्यात्मभूते स्वात्मन्येवात्मानन्यत्वेन स्थितबुद्धित्वाच्च 'स्थितप्रज्ञः' इत्युच्यते, एवमेव परमात्मनि समाहितचित्तत्वादेव 'युक्तः' इत्युच्यते। तत्रापि स्थितप्रज्ञवदेव कामराहित्यादिकं लक्षणं वर्णितं मुमुक्षूणां साधनप्रदर्शनार्थम्।।

१३४. तद्यथा -

(१) शीतोष्णसुखदुःखेषु तथा मानापमानयोः।।

ज्ञानविज्ञानतृप्तात्मा कूटस्थो विजितेन्द्रियः।
युक्त इत्युच्यते योगी समलोष्टाश्मकाञ्चनः।।६-७, ८।।

इति द्वन्द्वप्रहाणम्, इन्द्रियसंयमः, कामराहित्यं चोक्तम्। कामप्रहाणं च विशिष्य -

(२) यदा विनियतं चित्तमात्मन्येवावतिष्ठते।
निःस्पृहः सर्वकामेभ्यो युक्त इत्युच्यते तदा।।६-१८।।

इत्यत्रोपदिष्टम् ।

(३) आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।
सुखं वा यदि वा दुःखं स योगी परमो मतः।।६-३२।।

इत्यात्मवदेव सर्वभूतेषु सुखं दुःखं चेति सहानुभूत्या वर्तनमुपदिष्टम्।।

(४) योगिनामपि सर्वेषां मद्गतेनान्तरात्मना ।
श्रद्धावान्भजते यो मां स मे युक्ततमो मतः।।६-४७।।

इति श्रद्धाभक्तिपुरःसरं भगवान् सेवनीय इत्युक्तम्।।

१३५. तदेवं युक्तलक्षणकथनप्रसङ्गेनापि तान्येव कामप्रहाणादीनि पुरुषार्थसाधनत्वेन मुमुक्षून् प्रत्युपदिष्टानीति गम्यते ।।

१३६. किञ्चान्यत् -

अनाश्रितः कर्मफलं कार्यं कर्म करोति यः ।
स संन्यासी च योगी च न निरग्निर्न चाक्रियः ।।

यं संन्यासमिति प्राहुर्योगं तं विद्धि पाण्डव ।
न ह्यसंन्यस्तसङ्कल्पो योगी भवति कश्चन ।।६-१,२।।

इति युक्तत्वप्राप्तये उपदेक्ष्यमाणाभ्यां कर्मसंन्याससर्वसङ्कल्पसंन्यासाभ्यां कर्मयोगेऽपि कर्मफलत्यागसङ्कल्पत्यागांशयोः संस्तुत्या युक्तलक्षणवर्णनं कर्मयोगिने साधनोपदेशार्थमिति गम्यते ।।

१३७. इत्थं च युक्तलक्षणवर्णनमपि मुमूक्षूणां साधनोपदेशार्थमिति सिद्धम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'युक्तलक्षणोपदेशो' नाम**
**एकविंशं सोपानम्**

# २२. भक्तलक्षणोपदेशः

१३८. सम्यग्ज्ञानवान् मुक्तो भक्तत्वेनापि व्यपदिष्टोऽस्मिन् शास्त्रे। तस्य लक्षणान्यपि मुमुक्षूणां साधनोपदेशार्थं यथा भवति तथाधुना निरूप्यते।।

१३९. अत्रानुक्रान्तानि भक्तलक्षणानि विम्रक्ष्यन्ते, यथा तानि मुमुक्षूणां साधनानि भवेयुः पुरुषार्थप्राप्तये इति निदर्शनार्थम् -

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी।।

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः।।१२-१३,१४।।

अत्र (१) शत्रुष्वपि द्वेषत्यागः, सर्वेषु मैत्री, दुःखितेषु पापिष्वपि करुणा - इत्येतानि साधनानि, (२) अहंममत्वबुद्धित्वत्यागलक्षणं वैराग्यम्, (३) देहस्थित्यर्थं यावल्लब्धः तन्मात्रेण संतुष्टिः - इति कामप्रहाणम्, (४) भगवदर्पितमनोबुद्धित्वरूपा भक्तिश्च - इत्येतानि साधनानि समुपदिष्टानि भवन्ति।।

१४०.

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्तो यः स च मे प्रियः।।१२-१५।।

अनेन सर्वभूतेभ्योऽभयप्रदानलक्षणा **अहिंसा, तितिक्षा** च समुपदिष्टा भवति।।

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः ।

सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः ।।१२-१६।।

अनेन निःस्पृहता, बाह्याभ्यन्तरशौचम्, दक्षता, समत्वबुद्धिः, निर्भयता, काम्यकर्मत्याग इत्येते समुपदिष्टाभवन्ति ।।[२१]

१४१. अथ **द्वन्द्वप्रहाणमुच्यते निर्योगक्षेमता** च-

योन हृष्यति न द्वेष्टि न शोचति न काङ्क्षति।
शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ।।

समः शत्रौ च मित्रे च तथा मानापमानयोः।
शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ।।१२-१७, १८।।

१४२.

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येन केनचित्।
अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ।।१२-१९।।

संतुष्टो येन केनचित् - इति यदृच्छालाभसन्तुष्टिः, 'अनिकेत' इति परिव्राजकधर्मपालनं ग्रामपुरपत्तनादिषु कुत्रचिदपि नियतेन वसति-राहित्यमुच्यते। 'मौनी' इति परतत्त्वानुसंधानशीलता, वाक्संयमश्च नान्तरीयकः। 'स्थिरमतिः' इत्यात्मैकत्वविचारनित्यत्वमुपदिष्टम्।।

१४३. अथ कृतार्थलक्षणत्वेनानुक्रान्तानि मुमुक्षूणां साधनत्वेन परिभावनीयानि इत्याह -

ये तु धर्म्यामृतमिदं यथोक्तं पर्युपासते।
श्रद्दधाना मत्परमा भक्तास्तेऽतीव मे प्रियाः ।।१२-२०।।

---

२१. मूले श्लोकस्तद्विवरणं च त्रुटितम्, किन्त्वपेक्षितमिति योजितम् ।

इमे संन्यासिधर्माः नियमेन पालनीयाः मुमुक्षुभिः। श्रद्धा च तदनुष्ठाने सततम् वोढव्या, वासुदेवे चाक्षरात्मनि तात्पर्यवद्भिर्भाव्यम्। 'श्रद्धावाँल्लभते ज्ञानं तत्परः संयतेन्द्रियः' (४-३९) इति ह्युक्तमन्यत्र। ये त्विदमपि साधनपूगमनुतिष्ठन्ति ते भगवतोऽतीव प्रियाः, लब्धतत्त्वज्ञाना अमृता भवन्तीत्यर्थः ।।

तदिदमुक्तं **भाष्यकृता** कण्ठरवेण-

**'यस्मात् धर्म्यामृतमिदं यथोक्तमनुतिष्ठन् भगवतः विष्णोः परमेश्वरस्य अतीव प्रियो भवति, तस्माद् इदं धर्म्यामृतं मुमुक्षुणा यत्नतः अनुष्ठेयं विष्णोः प्रियं परं धाम जिगमिषुणा इति वाक्यार्थः ।।'** (गी.भा. १२-२०)

इति ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'भक्तलक्षणोपदेशो' नाम**
**द्वाविंशं सोपानम्**

# २३. ज्ञानिलक्षणोपदेशः

१४४. अथ येन परमज्ञानेन युक्ता एव परमात्मनो मुख्यभक्ताः स्युः तदिह निरूप्यते। यद्यपि भगवत्तत्त्वज्ञानं भगवद्भक्तिश्चेत्येते संज्ञा भेदमात्रेण भिद्येते न वस्तुनि कश्चिद्भेदोऽस्ति, यतः परमप्रेमवत एव भगवान् आत्मनस्तत्त्वं विवृणोति, भगवत्तत्त्वं कृत्स्नशः परिज्ञानवत

एव च परा प्रीतिः सञ्जायेत नान्यस्य कस्यचित्, तथापि प्रेमज्ञानलक्षणवृत्त्युत्पत्त्यपेक्षया भक्तिः, ज्ञानं चेति व्यपदेशो भवति। यथा ह्यौष्ण्यं प्रकाशश्चेति दाह्यप्रकाश्यापेक्षया व्यपदेशो भवति, न ह्यौष्ण्यव्यावृत्तः प्रकाशः प्रकाशव्यावृत्तमौष्ण्यं वा समस्ति वस्तुनि, तद्वदिति ज्ञेयम्।।

अपि च भगवति प्रेम भगवतो ज्ञानम् इति व्यवहारे भेदज्ञानेऽपि न भगवतः प्रेम्णश्च विभागोऽस्ति भगवतस्तज्ज्ञानस्य वा; न हि निरस्तसमस्तविशेषे अक्षरात्मनि भगवति कश्चिदपि विभागश्चिन्तयितुमपि शक्यते एकमेव ह्यद्वितीयम् अक्षरस्वरूपमिति। अथ च - लौकिकं प्रेम लौकिकं च ज्ञानं यथाप्रसिद्धमाश्रित्याध्यारोपदृष्ट्या उपदेशो भवति शास्त्रे - भगवान्, भक्तिः, भक्तश्चेति; ज्ञेयम्, ज्ञानम्, ज्ञातेति चेत्यविरोधः।।

१४५. तदेवं स्थिते येन ज्ञानेन युक्ताः, परभक्ताः, भगवतः प्रियाः भवन्ति तत्क्षेत्रज्ञाध्याये निरूप्यते। यथाह **भाष्यकारः** -

"**अतीतानन्तराध्याये च 'अद्वेष्टा सर्वभूतानाम्' (१२-१३) इत्यादिना यावदध्यायपरिसमाप्तिः तावत् तत्त्वज्ञानिनां संन्यासिनां निष्ठा यथा ते वर्तन्ते इत्येतदुक्तम्। केन पुनस्ते तत्त्वज्ञानेन युक्ताः यथोक्तधर्माचरणाद्भगवतः प्रिया भवन्तीति? एवमर्थश्चायमध्यायः आरभ्यते**" (गी.भा. १३. अव) इति।।

तस्मात्, इह ज्ञानिलक्षणस्य पृथङ्निरूपणं प्रतिपादनसौकर्यार्थमेवेति ज्ञेयम्।।

१४६. यदप्यत्र क्षेत्रक्षेत्रज्ञविवेकज्ञानं तत्साधनानि चोक्त्वा तदनन्तरं क्षेत्रज्ञस्य पारमार्थिकं स्वरूपं वर्ण्यते 'ज्ञेयं यत्तत् प्रवक्ष्यामि' (१३-१२) इत्यादिना, तदपि साधनगणस्य ज्ञानिलक्षणत्वं विवक्षित्वैवेति बोध्यम्। पूर्वाध्यायेष्विव स्थितप्रज्ञादिलक्षणोपदेशेषु लक्षणानामेव साधनत्वविवक्षणात्। यथाह **भाष्यकृत्** -

**'अधुना तु तज्ज्ञानसाधनगणम् अमानित्वादिलक्षणम् – यस्मिन् सति तज्ज्ञेयविज्ञाने योग्योऽधिकृतो भवति यत्परः संन्यासी 'ज्ञाननिष्ठः' उच्यते, तममानित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान् ।।'** (गी.भा. १३-७)

इति ।।

१४७. अत्र साधनानां स्वाभिधानेनैवोल्लेखनात् पाठकाः स्वयमेव प्रभवेयुस्तेषां वशीकरणे इति न तत्र पराक्रम्यतेऽस्माभिः। अत्रापि काम प्रहाणम्, द्वन्द्वप्रहाणम्, इन्द्रियसंयमः – इत्यादि पूर्ववदेव ग्राह्यम्। अत्रोक्तमधिकं पूर्वत्रापि द्रष्टव्यं साधनगणसंपूर्तये। विशिष्य चात्र आचार्यो पासनम्, भगवत्यनन्ययोगेन भक्तिः, अध्यात्मज्ञाननित्यत्वम्, तत्त्वज्ञाना र्थदर्शनं चानुसंधेयम् ।।

(१) **आचार्योपदेशगम्यं तावज्ज्ञानम्** –

तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया।
उपदेक्ष्यन्ति ते ज्ञानं ज्ञानिनस्तत्त्वदर्शिनः ।।४-३४।।

इति ।।

(२) **भगवति चानन्ययोगेनाव्यभिचारिणी** भक्तिः द्वितीयं प्रधानं साधनम्। उक्तं हि –

तेषां सततयुक्तानां भजतां प्रीतिपूर्वकम्।
ददामि बुद्धियोगं तं येन मामुपयान्ति ते ।।

तेषामेवानुकम्पार्थमहमज्ञानजं तमः।
नाशयाम्यात्मभावस्थो ज्ञानदीपेन भास्वता ।।१०-१०,११।।

इति ।।

तत्र 'अनन्ययोगः' इत्थं व्याकृतः **आचार्यैः** –

''**मयि च ईश्वरे अनन्ययोगेन अपृथक्समाधिना 'न अन्यो भगवतो वासुदेवात् परः अस्ति, अतः स एव नो गतिः' इत्येवं निश्चिता अव्यभिचारिणी बुद्धिः अनन्ययोगः, तेन भजनं भक्तिः न व्यभिचरणशीला अव्यभिचारिणी ।।**'' (गी.भा.१३-१०)

इति ।।

(३) **अध्यात्मज्ञाननित्यत्वम्** आत्मतत्त्वविषयकज्ञाने नित्यमेव साभिनिवेशत्वम् अध्यात्मज्ञाननित्यत्वम्। आत्मसतत्त्वज्ञानमेव परमपुरुषार्थसाधनमिति दृढनिश्चयः। यदेवेच्छति तदर्थं हि प्रयतते इति ।।

(४) **तत्त्वज्ञानार्थदर्शनम्** - इत्थं व्याख्यातं भाष्यकृद्भिः -

'**अमानित्वादीनां ज्ञानसाधनानां भावनापरिपाकनिमित्तं तत्त्वज्ञानम्, तस्यार्थः मोक्षः संसारोपरमः। तस्यालोचनं तत्त्वज्ञानार्थदर्शनम्। तत्त्व-ज्ञानफलालोचने हि तत्साधनानुष्ठाने प्रवृत्तिः स्यादिति।**' (गी.भा.१३-११)

इति ।।

एतेन मुमुक्षुत्वं साधनमित्युक्तं भवति ।।

१४८. तदेवम् अमानित्वादिसाधनानां नित्यनिरन्तरानुष्ठानेन यो विजानाति 'सर्वस्यात्मा अहमेव वासुदेवाख्यं परं ब्रह्म' इति तस्मिन् व्यवहारदृष्ट्या अमानित्वादीनि स्वभावत एव भवन्तीति ज्ञानिलक्षणानि भवन्ति । एतज्ज्ञानयुक्तत्वादेव ज्ञानिनोऽद्वेष्टृत्वादिधर्माचरणाद्भगवतः प्रिया भवन्ति, भगवद्भावेन च नित्यमवतिष्ठन्त इति सर्वं सुस्थम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'ज्ञानिलक्षणोपदेशो' नाम**
**त्रयोविंशं सोपानम्**

# २४. गुणातीतलक्षणोपदेशः

१४९. अथ कृतकृत्यो ज्ञानी त्रीनपि सत्त्वादीन् गुणानतीतो निस्त्रैगुण्यब्रह्मात्मनैवावतिष्ठत इत्येतत् ज्ञापयितुं गुणातीतलक्षणं यथानुवर्णितमस्मिन् शास्त्रे तथा संक्षिप्य दर्शयिष्यामः। यतस्तान्येव मुमुक्षूणां साधनानि भवन्तीति ।।

१५०. चतुर्दशाध्याये गुणातीतलक्षणान्येवमनुक्रान्तानि -

(१) प्रकाशं च प्रवृत्तिं च मोहमेव च पाण्डव।
न द्वेष्टि सम्प्रवृत्तानि न निवृत्तानि काङ्क्षति।।

उदासीनवदासीनो गुणैर्यो न विचाल्यते।
गुणा वर्तन्त इत्येव योऽवतिष्ठति नेङ्गते।।१४-२२,२३।।

अत्र ज्ञानिनां सर्वगुणातीतत्वात् विधिनिषेधकिङ्करत्वं न संभवतीत्यतो यथेष्टाचरणं प्राप्तमिति न शङ्कनीयं यतस्तेषां स्वदृष्ट्या इच्छैव तावन्नास्ति क्रियाकर्तृत्वं वा, कुत एव यथेष्टाचरणं? तदिदमुक्तं नैष्कर्म्यसिद्धिकृता **श्रीमत्सुरेश्वराचार्येण** -

प्रत्याचक्षाण आहातो यथेष्टाचरणं हरिः।
यस्य सर्वे समारम्भाः प्रकाशं चेति सर्वदृक्।।नै.सि.४-६४।।

इति ।।

यस्य सर्वे समारम्भाः कामसङ्कल्पवर्जिताः।
ज्ञानाग्निदग्धकर्माणं तमाहुः पण्डितं बुधाः।।४-१९।।

इत्यत्र लोकसङ्ग्रहार्थं शरीरस्थितिमात्रार्थं कर्म कुर्वतोऽपि सर्वाणि कर्माणि कामसङ्कल्पवर्जितेनैव क्रियमाणानीव भवन्तीति न तस्य यथेष्टचेष्टाप्राप्तिः। 'प्रकाशं' चेत्यादिना गुणातीतत्वप्रतिपादनस्थले तु प्रत्युपस्थापितगुणत्रयसाक्षित्वेनैव वर्तमानत्वात् न तस्य गुणव्यापारेण

चेष्टावत्त्वं कारितमिति सुतरां न यथेष्टचेष्टाप्राप्तिः - इति श्लोकार्थः। एतेन - मुमुक्षुभिरपि सर्वव्यापारेषु संप्राप्तेषु निवृत्तेषु वा गुणा एव गुणेषु वर्तन्त इत्यनुसंधानपरैः तत्रोदासीनैर्भाव्यम्। स्वकर्मणा भगवदभ्यर्चनव्यग्रैर्भगवत्तत्त्वान्वेषणपरैर्वा भूत्वा गुणव्यापारा उपेक्षणीया इत्युपदिष्टं भवति ।।

(२) समदुःखसुखः स्वस्थः समलोष्टाश्मकाञ्चनः।
तुल्यप्रियाप्रियो धीरस्तुल्यनिन्दात्मसंस्तुतिः ।।

मानापमानयोस्तुल्यस्तुल्यो मित्रारिपक्षयोः।
सर्वारम्भपरित्यागी गुणातीतः स उच्यते ।।१४-२४,२५।।

अत्र द्वन्द्वप्रहाणं सर्वत्र भगवद्भावनया समत्वबुद्धिः सर्वविषयवैतृष्ण्यं चाभ्यसनीयम् - इत्युपदिश्यते । 'तुल्यनिन्दात्मसंस्तुतिः'- इत्यनेन हर्षविषादराहित्यलक्षणा समत्वबुद्धिरुपदिष्टा भवति। 'सर्वारम्भपरित्यागी' इत्यनेन - ध्यानयोगिनां सर्वकर्मसंन्यासः[२२] कर्मयोगिनां भगवति सर्वकर्मसंन्यासश्च[२३] समुपदिष्टः ।।

(३) मां च योऽव्यभिचारेण भक्तियोगेन सेवते।
स गुणान् समतीत्यैतान् ब्रह्मभूयाय कल्पते ।।१४-२६।।

इति तु भगवद्भक्तिपूर्वकमेव कर्म ध्यानं चानुष्ठेयम्, भक्तिरेव तु निस्त्रैगुण्यात्मभावे परमं साधनमिति चोच्यत इति स्पष्टमेवेति शिवम्।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'गुणातीतलक्षणोपदेशो' नाम**
**चतुर्विंशं सोपानम्**

---

२२. गी. ६-३ द्रष्टव्यः
२३. गी. ३-३० द्रष्टव्यः

# २५.ज्ञाननिष्ठोपदेशः

१५१. अथेदानीमस्या उपदेशसोपानपङ्क्तेश्चरमं सोपानं ज्ञाननिष्ठोपदेशाख्यं निरूपणीयम्, यत्समारूढस्तद्विष्णोः परमं पदमाप्नोति। तथा हि प्रतिज्ञातं **गीताभाष्ये** –

**'तस्यास्य गीताशास्त्रस्य संक्षेपतः प्रयोजनं परं निःश्रेयसं सहेतुकस्य संसारस्य अत्यन्तोपरमलक्षणम्। तच्च सर्वकर्मसंन्यासपूर्वकाद् आत्मज्ञाननिष्ठारूपाद् धर्माद् भवति॥'** (गी.भा.संबन्धोक्तिः)

इति॥

१५२. सेयं ज्ञाननिष्ठा गीतोपदेशसोपानपारम्परीं क्रमक्रमेणाधिरूढस्य सुखेनासाद्यते। तथा चोक्तं भगवता शास्त्रार्थोपदेशमुपसञ्जिहीर्षुणा –

(1) स्वे स्वे कर्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्मनिरतः सिद्धिं यथा विन्दति तच्छृणु॥

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम्।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः॥१८-४५,४६॥

इति। तदिदं कर्मयोगाभिधं सोपानं सङ्गृहीतमष्टमोपदेशे॥

(2) सिद्धिं प्राप्तो यथा ब्रह्म तथाप्नोति निबोध मे।
समासेनैव कौन्तेय निष्ठा ज्ञानस्य या परा॥१८-५०॥

अत्र कार्यकरणसंघातस्य ज्ञाननिष्ठायोग्यतालक्षणसिद्धिं प्राप्तस्य ज्ञाननिष्ठाप्राप्तिः तया च परमात्मप्राप्तिश्च प्रतिज्ञाता।

(3) बुद्ध्या विशुद्धया युक्तो धृत्यात्मानं नियम्य च।
शब्दादीन्विषयांस्त्यक्त्वा रागद्वेषौ व्युदस्य च॥

विविक्तसेवी लघ्वाशी यतवाक्कायमानसः।
ध्यानयोगपरो नित्यं वैराग्यं समुपाश्रितः।।

अहंकारं बलं दर्पं कामं क्रोधं परिग्रहम्।
विमुच्य निर्ममः शान्तो ब्रह्मभूयाय कल्पते।।१८-५१,५२,५३।।

अत्र सर्वकर्मसंन्यासपूर्वकं ध्यानयोगेनानात्मनिरसनपूर्वकं ज्ञाननिष्ठस्य सर्वभूतात्मभूतस्य ब्रह्मप्राप्तिः ब्रह्मभूयलक्षणा परासिद्धिः भवित्रीत्युक्तम्।।

१५३. एवं ब्रह्मभूयं गतस्य किंफलतीत्याह -

ब्रह्मभूतः प्रसन्नात्मा न शोचति न काङ्क्षति।
समः सर्वेषु भूतेषु मद्भक्तिं लभते पराम्।।

भक्त्या मामभिजानाति यावान्यश्चास्मि तत्त्वतः।
ततो मां तत्त्वतो ज्ञात्वा विशते तदनन्तरम् ।।१८-५४,५५।।

अत्र ब्रह्मभूतस्य स्वभावः शोकाद्यभावः, आत्मौपम्येन समदुःखसुखदृष्टिः, सर्वत्रात्मसमदर्शनम्, तत्स्वरूपेणैवावस्थितिश्च कथिता।।

१५४. अत्र 'निष्ठा ज्ञानस्य या परा' (१८-५०) इति किमुच्यते इत्येतन्निरूपणीयम्, यतः केचिन्मन्यन्ते - ज्ञाननिष्ठेति ज्ञानावृत्तिर्विवक्ष्यते ज्ञानाभ्यासेनैव भगवत्साक्षात्कारस्य प्रादुर्भावादिति। नेदं समीचीनं मतमित्युत्पश्यामो वयम्। यत्कारणं 'यत् साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तरः' (बृ.३-५-१) इति श्रुतिसिद्धं नित्यापरोक्षं ब्रह्म सर्वस्याप्यात्मभूतम्। न ह्यपरोक्षस्वभाव एव सन् परमात्मा, स्वयंज्योतिः सर्वसाक्षी सर्वस्यापि सर्वान्तर आत्मा केनचित् व्यवहितः साधनानुष्ठानानन्तरं साक्षात्क्रियते इति समञ्जसं स्याद् वचः। भगवद्वचनाच्च -

ज्योतिषामपि तज्ज्योतिस्तमसः परमुच्यते।
ज्ञानं ज्ञेयं ज्ञानगम्यं हृदि सर्वस्य विष्ठितम्।।१३-१७।।

इत्यमानित्वादिनिवृत्तिधर्मानुष्ठातुः सर्वस्यापि हृद्येव स्वयंज्योतिर्ज्ञेयं ब्रह्मात्मभावेन स्थितमित्याह भगवान् । किंच ज्ञानं नाम न क्रिया येन तदावृत्त्यादिकमपेक्षेत भगवदभिज्ञानार्थम्। अतो न साधुरयं ज्ञानावृत्ति-लक्षणज्ञाननिष्ठावादः ।।

कीदृशी तर्हि ज्ञाननिष्ठा भगवदभिप्रेतेति? अत्राह **भाष्यकारः** -

**'शास्त्राचार्योपदेशेन ज्ञानोत्पत्तिपरिपाकहेतुसहकारिकारणं बुद्धि विशुद्धत्वादि, अमानित्वादि चापेक्ष्य जनितस्य क्षेत्रज्ञपरमात्मैकत्व-ज्ञानस्य कर्तृत्वादिकारकभेदबुद्धिनिबन्धनसर्वकर्मसंन्याससहितस्य स्वात्मानुभवनिश्चयरूपेण यदवस्थानम्, सा परा ज्ञाननिष्ठा इत्युच्यते। सा इयं ज्ञाननिष्ठा आर्तादिभक्तित्रयापेक्षया परा चतुर्थी भक्तिरित्युक्ता। तया परया भक्त्या भगवन्तं तत्त्वतः अभिजानाति, यदनन्तरमेव ईश्वरक्षेत्रज्ञभेदबुद्धिः अशेषतः निवर्तते। अतो ज्ञाननिष्ठालक्षणया भक्त्या मामभिजानाति इति वचनं न विरुध्यते।।'** (गी.भा. १८-५५)

इति।।

१५५. अथेदं विचिन्त्यम् - यदि ज्ञाननिष्ठानामात्मैकत्वज्ञानस्य स्वात्मानुभवनिश्चयरूपेणावस्थानमुच्यते, कथं तर्हि भगवद्वचनम् -

लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन साङ्ख्यानां कर्मयोगेन योगिनाम्।।३-३।।

इति। अत्राभिधीयते - 'सिद्धिं प्राप्तो यथा ब्रह्म प्राप्नोति' इति 'निष्ठा ज्ञानस्य या परा' (१८-५०) इति च ज्ञानस्य पर्यवसानस्यैवोच्यमानत्वात्। सा फलरूपा ब्रह्मात्मैकत्वावगतिरूपैवेत्यत्र न काचित् संशीतिः। 'अमानित्वमदम्भित्वम्' इत्यादिनोपक्रम्य 'अध्यात्मज्ञाननित्यत्वं तत्त्वज्ञानार्थदर्शनम्। एतज्ज्ञानमिति प्रोक्तमज्ञानं यदतोऽन्यथा।।' (१३-७...१३-११) इति पर्यन्तमुक्तं ज्ञानं तु ज्ञानसाधनरूपमिति क्रियैव।

अतस्तत्र निष्ठा तात्पर्येण स्थितिरित्यपि क्रियैवेति सर्वसंप्रतिपन्नम्। अत एव **भाष्यकारेणा**प्युक्तम् -

**'अधुना तु तज्ज्ञानसाधनगणममानित्वादिलक्षणम्, यस्मिन् सति तज्ज्ञेयविज्ञाने योग्योऽधिकृतो भवति, यत्परः संन्यासी ज्ञाननिष्ठः उच्यते, तम् अमानित्वादिगणं ज्ञानसाधनत्वात् ज्ञानशब्दवाच्यं विदधाति भगवान् ।'**(गी.भा. १३-७)

इति ।।

एवं चामानित्वादिज्ञानसाधनपरत्वं ज्ञाननिष्ठा क्रिया, तादृशसह-कारिसाधनेन योऽयं ज्ञानपरिपाकः तज्जनितविज्ञानं तु ज्ञाननिष्ठा फलमिति विशेषो द्रष्टव्यः ।।

१५६. तदेवं सर्वकर्मसंन्यासपूर्वकात् ज्ञाननिष्ठारूपाद् धर्माद् विज्ञानरूपात्मज्ञाननिष्ठोत्पत्तौ सर्वसंसारहेतुभूताज्ञाननिवृत्तौ भगवद्भा-वप्राप्तिलक्षणं निःश्रेयसं सिद्ध्यतीति गीतोपदेशसार इति सर्वं शुद्धम् ।।

**इति श्रीमत्परमहंसपरिव्राजकाचार्यवरेण्य**
**श्रीपूज्यपादश्रीमच्छङ्करभगवत्पादचरणस्मरणपरिचयावाप्तवेदान्तप्रवेशेन**
**श्रीबोधानन्देन्द्रसरस्वतीशिष्येण श्रीसच्चिदानन्देन्द्रसरस्वत्याख्येन भिक्षुणा**
**प्रणीतायां गीताशास्त्रोपदेशसोपानपङ्क्तौ**
**'ज्ञाननिष्ठोपदेशो' नाम**
**पञ्चविंशं सोपानम्**

# २६.शास्त्रोपदेशसारः

१५७. तदिदं गीताशास्त्रं भगवता समुपदिष्टमादिमध्यावसानेषु भक्तिप्रधानम्, भक्तिश्च भगवच्छरणतारूपमिति भक्तिशास्त्रमित्यपि संज्ञामर्हति। यथा चेदं तथा शास्त्रोपसंहारवाक्यानि कतिचिदुदाहृत्येदं प्रकरणमुपसंह्रियते ।।

१५८. त्रिगुणात्मकमायामोहिताः पापिष्ठा आसुरीं प्रकृतिमाश्रिताः ईश्वरास्तित्वस्याप्यश्रद्दधानाः शास्त्रोक्तं धर्मं नाचरन्ति। आचरन्तो वा दम्भार्थमेवानुतिष्ठन्ति इति **षोडशाध्याये** आसुरसंपत् वर्णिता विस्तरेण तत्परिहारार्थम्। सेयं कामक्रोधादिलक्षणा पापाचरणप्रयोजिका प्रकृतिर्मनुष्येषु स्वाभाविकीति तत्परिवर्जनाय यत्नः करणीय इति तत्र तत्र ज्ञानप्रकरणे योगानुष्ठानोपदेशप्रकरणे च समुपदिष्टम् - तद्यथा **द्वितीये** - (१) 'ध्यायतो विषयान् पुंसः' (२-६२), 'बुद्धिनाशात् प्रणश्यति' (२-६३) इति चास्याः प्रकृतेरनर्थहेतुत्वमुक्त्वा कामप्रहाणं कर्तव्यतयोपदिष्टम्। **तृतीये** च - (२) 'अथ केन प्रयुक्तोऽयं पापं चरति पूरुषः' (३-३६) इति प्रश्नमुत्थाप्य 'काम एष क्रोध एष' (३-३७) इत्यारभ्य कामविनिन्दा पूर्वकम् आ अध्यायसमाप्ति कामप्रहाणोपाय उपदिष्टः। **द्वितीयाध्याये** च (३) 'मात्रास्पर्शास्तु' (२-१४) इति, **पञ्चमे** च 'ये हि संस्पर्शजा भोगाः' (५-२२) इति च भोगासक्तिं विनिन्द्य तितिक्षा समुपदिष्टा। **षष्ठे** च - (४) 'संकल्पप्रभवान् कामान्' (६-२४) इति कामत्यागपूर्वकमुपरतिः कर्तव्यतया समुपदिष्टा - इत्येवं कामादिप्रहाणपूर्वकं प्रत्यगात्मप्रवणतोपदिश्यते। आस्तिका अपि कामिनः परलोकसुखाय यज्ञादिकमनुतिष्ठन्तीति न तेऽपि मोक्षसाधनेऽधिक्रियन्ते इत्युक्तं **सप्तमे नवमे** च[२४] 'कामैस्तैस्तैः हृतज्ञानाः' (७-२०), 'त्रैविद्या मां सोमपाः

२४. अत्र मूले श्लोकसंख्या मात्रं दर्शिता। 'लभते च ततः कामान्' (७-२२) 'अन्तवत्तु फलं तेषाम्' (७-२३) 'ते तं भुक्त्वा स्वर्गलोकं विशालं क्षीणे पुण्ये मर्त्यलोकं विशन्ति (९-२१) इति श्लोका अप्यत्रानुसन्धेयाः। द्वितीयाध्याये 'यामिमां पुष्पितां वाचम्' (२-४२)

पूतपापा यज्ञैरिष्ट्वा स्वर्गतिं प्रार्थयन्ते' (९-२०) इति । अतो मुमुक्षुभिः काम्यकर्मसंन्यासपूर्वकं (१८-२) नित्यकर्माणि सङ्गं त्यक्त्वा फलानि च परित्यज्य करणीयानि (१८-६) । स्वकर्मणा भगवन्तमभ्यर्च्य चित्तशुद्धिलक्षणां सिद्धिं प्राप्नोति (१८-४६) इति **चरमेऽध्याये** उपदिष्टम् । सोऽयं कर्मयोग एव भगवत्संबन्धात् भक्तियोगो भवति। तद्यथा तथोप दिशति **भगवान् भाष्यकारः** -

**'स्वकर्मणा भगवतः अभ्यर्चनभक्तियोगस्य सिद्धिप्राप्तिः फलं ज्ञाननिष्ठायोग्यता, यन्निमित्ता ज्ञाननिष्ठा मोक्षफलावसाना सः भगवद्भक्तियोगः अधुना स्तूयते शास्त्रार्थोपसंहारप्रकरणे शास्त्रार्थ निश्चयदार्ढ्याय ।।'** (गी.भा. १८-५६ अवतरणिका)

१५९. निषिद्धकर्माचरणे रतोऽपि चेत् भक्तियोगमाश्रयते, तदा भगवत्प्रसादात् सन्मार्गमाश्रित्य क्रमेण चित्तशुद्धिमवाप्य परमपुरुषार्थभाक् भवतीति भक्तियोगः स्तूयतेऽत्र -

सर्वकर्माण्यपि सदा कुर्वाणो मद्व्यपाश्रयः ।
मत्प्रसादादवाप्नोति शाश्वतं पदमव्ययम् ।।१८-५६।।

इति। व्याख्यातं चैतत् **भाष्यकृता** -

**'सर्वकर्माण्यपि प्रतिषिद्धान्यपि सदा कुर्वाणः अनुतिष्ठन् मद्व्यपाश्रयः अहं वासुदेवः ईश्वरः व्यपाश्रयः व्यपाश्रयणं यस्य सः मद्व्यपाश्रयः मय्यर्पितसर्वात्मभावः इत्यर्थः। सोऽपि मत्प्रसादात् मम ईश्वरस्य प्रसादात् अवाप्नोति शाश्वतं नित्यं वैष्णवं पदम् अव्ययम् ।।'** (गी.भा. १८-५६)

इति। अत्र मद्व्यपाश्रयः निषिद्धान्यपि कर्माणि इति न संबन्धः। न हि

---

'कामात्मानः स्वर्गपराः' (२-४३), भोगैश्वर्यप्रसक्तानां.... समाधौ न विधीयते' (२-४४) इति श्लोका अप्यत्र ग्राह्याः ।।

भगवद्व्यपाश्रयत्वं प्रतिषिद्धाचरणं जातुचित् सहभाविनी तमः प्रकाशवत् विरुद्धस्वभावत्वात्। अपि तु प्रतिषिद्धान्यपि कुर्वाणः कथञ्चित् सुकृतसंस्कारवशात्, मद्व्यपाश्रयश्चेत् भवतीति अन्वयो द्रष्टव्यः। उक्तं हि **भगवतैव** प्राक् -

अपि चेत्सुदुराचारो भजते मामनन्यभाक्।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः।।

क्षिप्रं भवति धर्मात्मा शश्वच्छान्तिं निगच्छति।
कौन्तेय प्रतिजानीहि न मे भक्तः प्रणश्यति।।

मां हि पार्थ व्यपाश्रित्य येऽपि स्युः पापयोनयः।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यान्ति परां गतिम्।।

किं पुनर्ब्राह्मणाः पुण्या भक्ता राजर्षयस्तथा।
अनित्यमसुखं लोकमिमं प्राप्य भजस्व माम्।।

९-३०,३१,३२,३३।।

